ગુજરાત રાજ્યના શિક્ષણવિભાગના પત્ર-ક્રમાંક
મશબ/1219/450/છ, તા.03/07/2019-થી મંજૂર

# पौरोहित्यम्

## मध्यमा १

## ( ધોરણ 11 )

### प्रतिज्ञापत्रम्

भारतं मम देशः।
सर्वे भारतीयाः मम भ्रातरः भगिन्यः च सन्ति।
मम मानसे देशस्पृहा अस्ति। समृद्धिसहितं
विविधतापरिपूर्णं तस्य संस्कृतिगौरवम् अनुभवामि।
अहं सदा तत्पात्रं भवितुं यत्नं करिष्यामि।
अहं मम पितरौ आचार्यान् गुरुजनान् च प्रति
आदरभावं धारयिष्यामि।
प्रत्येकेन सह शिष्टव्यवहारं करिष्यामि।
अहं मम देशाय देशबान्धवेभ्यः च मम निष्ठाम् अर्पयामि।
तेषां कल्याणे समृद्धौ च एव मम सुखम् अस्ति।

**मूल्यम् : ₹ 25.00**

तमसो मा ज्योतिर्गमय

**गुजरातराज्यशालापाठ्यपुस्तकमण्डलम्**
**'विद्यायनम्', सेक्टर 10-ए, गांधीनगरम् - 382010**

© गुजरातराज्यशालापाठ्यपुस्तकमण्डलम्, गान्धीनगरम्

अस्य पाठ्यपुस्तकस्य सर्वेऽधिकाराः गुजरातराज्यपाठ्यपुस्तकमण्डलहस्तकाः सन्ति। अस्य पाठ्यपुस्तकस्य कश्चिदपि भागः केनापि रुपेण गुजरातराज्य-पाठ्यपुस्तकमण्डलनियामकस्य लिखितानुमत्या विना प्रकाशयितुं न शक्यते।

**विषयमार्गदर्शनम्:**

श्री अनिलकुमारः त्रिवेदी

**लेखनम्**

श्री अजय भट्ट (कन्वीनर)

श्री दिपकः शुक्ला

श्री हितेश पाठकः

**समीक्षणम्**

श्री बालकृष्णः दवे

श्री कुलदीपः पुरोहितः

डॉ. राजेन्द्रः पण्डया

श्री अशोक एस. जोषी

श्री महेश पण्ड्या

**भाषाशुद्धिः**

श्री परमात्मनाथ तिवारी

**संयोजनम्**

डॉ. क्रिष्ना दवे

(विषय-संयोजकः -अंग्रेजी)

**निर्माणायोजनम्**

श्री हरेन शाह

(उपनियामकः - शैक्षणिकः)

**मुद्रणसंयोजनम्**

श्री हरेश एस. लीम्बाचीया

(उपनियामकः- उत्पादनम्)

## प्रस्तावना

प्राच्यगुरुकुलपरम्परानुसारम् अध्ययनं कुर्वतां-छात्राणां कृते प्राचीनार्वाचीनयोः अध्ययनाध्यापनयोः पद्धत्योः समन्वयं कृत्वा गुजरात राज्य-माध्यमिकोच्चतर माध्यमिक शिक्षणसमितिः (बोर्ड) द्वारा नूतना-अभ्यासक्रमसंरचना कृता अस्ति। गुजरातसर्वकारद्वारा प्रमाणिताः मानिताः च अभ्यासक्रमाः सन्ति।

गुजरातसर्वकारद्वारा प्राप्तमान्यतायाः **पौरोहित्यम् मध्यमा 1 (धोरण 11)** इति विषयस्य नूतनाभ्यासक्रमानुसारं सज्जीकृतमिदं पुस्तकं-प्रकाशनात् प्राक् विषयज्ञैः सर्वाङ्गीणतया-समीक्षितं संसूचितपरिवर्तनानुसारं हस्तलिखितेषु लेखेषु योग्यतया संशोधनानन्तरं प्रकाशितमस्ति।

प्रस्तुतं पाठ्यपुस्तकं कक्षानुसारम् उपयोगि परिशुद्धं च कर्तुं मण्डलद्वारा कृते प्रयत्नेऽपि न्यूनतापरिपूर्णार्थं विद्वद्भिः सूचिताः सूचनाः सादरं स्वीकरणीयाः एव।

**पी. भारती** (IAS)
नियामकः
ता.06-07-2019

कार्यवाहकःप्रमुखः
गान्धीनगरम्

**प्रथमावृत्ति : 2019**

**प्रकाशक :** गुजरातराज्यशालापाठ्यपुस्तकमण्डलम्, 'विद्यायन', सेक्टर 10-ए, गान्धीनगरप्रातिनिध्येन पी.भारती, नियामकः

**मुद्रक :**

# मूलभूतकर्तव्यानि

**प्रत्येकं भारतीयनागरिकस्य कर्तव्यानि निम्नानुसारं स्युः। ***

( क ) संविधान प्रति प्रामाणिकत्वम् आदर्शत्वं संस्थानां राष्ट्रध्वजस्य राष्ट्रीयगीतस्य च आदरः।

( ख ) स्वातन्त्र्याय अम्मीयराष्ट्रियसत्याग्रहं प्रेरयताम् आदर्शानां हृदये प्रतिष्ठापनम् अनुसरणं च।

( ग ) भारतस्य सार्वभौमत्वस्य एकतायाः अखण्डिततायाश्च समर्थनं च।

( घ ) देशस्य रक्षणं राष्ट्रियसेवायै उद्घोषाणायां जातायां तदनुसरणञ्च।

( च) धार्मिक-भाषाकीय-प्रादेशिकेभ्यः धार्मिकेभ्यो वा भेदेभ्यः परं स्थित्वा, समस्तभारतीयेषु साम्मनस्यसमानबन्धत्वभावनायाः वृद्धिः, स्त्रीणां गौरवहानिकारकव्यवहारत्यागश्च।

( छ ) अस्माकं समन्वितसंस्कृतेः समृद्धदायस्य मूल्यं ज्ञात्वा तदवग्रहः।

( ज ) वनानां तडागानां नदीनाम् अन्यवन्यपशुपक्षिसहितं प्राकृतिकपर्यावरणरक्षणं तद्वर्धनं तथैव जीवमात्रं प्रति अनुकम्पाभावः।

( झ ) वैज्ञानकिमानसाय मानवतावादाय जिज्ञासायै भावनाभिगमाभिबोधः।

( ट ) सामान्यसम्पत्तिरक्षणं हिंसायाः त्यागश्च।

( ठ ) राष्ट्रं पुरुषार्थस्य सिद्धेश्च अधिकाधिकमुन्नतसोपानानि प्रति सततं प्रगतिशीलं स्यात्तदर्थं वैयक्तिकसामूहिकप्रवृत्तीनां समस्तक्षेत्रेषु श्रेष्ठत्वम् आसादयितुं प्रयत्नः।

(ड) मात्रा पित्रा अथवा अभिभावकेन षड्वर्षतः चतुर्दशवर्षं यावत् (६. तः १४) वयसे बालकाय अथवा पाल्याय शिक्षणलाभाः देयाः।

---

* भारतीय संविधानम् : अधिनियमः 51-क

# अनुक्रमणिका


| | | |
|---|---|---|
| 1. | भद्रसूक्तम् | 1 |
| 2. | योगिनीपूजनम् | 6 |
| 3. | क्षेत्रपालपूजनम् | 14 |
| 4. | कुशकण्डिका | 18 |
| 5. | त्रिंशोपचारपूजनम् | 22 |
| 6. | पात्रासादनम् | 29 |
| 7. | देवीराजोपचारपूजनम्-१ | 37 |
| 8. | देवीराजोपचारपूजनम्-२ | 46 |
| 9. | देवीराजोपचारपूजनम्-३ | 53 |
| 10. | होमतन्त्रम् | 61 |
| 11. | उत्तरतन्त्रम् | 70 |
| 12. | बलिदानम् | 75 |
| 13. | पूर्णाहुतिः | 79 |
| 14. | चौलसंस्कारः | 86 |
| 15. | उपनयनसंस्कारः | 91 |
| 16. | द्विजसंस्कारः | 96 |
| 17. | वेदारम्भ-केशान्तसंस्कारौ | 102 |
| 18. | शिवसङ्कल्पसूक्तम् | 107 |
| 19. | अप्रतिरथसूक्तम् | 111 |
| 20. | मैत्रेयसूक्तम् | 117 |
| 21. | रुद्रसूक्तम्-1 | 122 |
| 22. | रुद्रसूक्तम्-2 | 128 |
| 23. | रुद्रसूक्तम्-3 | 135 |
| 24. | दशविधस्नानम् | 141 |
| 25. | सत्येशपूजनम् | 150 |


●

# 1. भद्रसूक्तम्

**प्रस्तावना**

अस्माकं भारतीय-संस्कृतेः मूलाधाररूपाः निखिलज्ञानराशयः चत्वारो वेदाः सन्ति। तेषु स्तुतिपरकानि संवादपरकानि विविधविषयपरकानि च नैकानि सूक्तानि सन्ति। तत्र भद्रसूक्तमिदम् अन्यतमम्। भद्रसूक्तं शुक्लजुर्वेदस्य पञ्चविंशे (25) अध्याये प्राप्यते। भद्रम् अर्थात् कल्याणम्, यदुक्तम् अमरकोषे-

'श्वः श्रेयसं शिवं भद्रं कल्याणं मङ्गलं शुभम्' इति।

अर्थात् कल्याणविषयकं सूक्तं भद्रसूक्तम्। सूक्तेऽस्मिन् सम्पूर्णे विश्वस्मिन् निवसतां समेषामपि प्राणिनां मङ्गलकामना प्रकटीकृता। विश्वशान्तेश्च सन्देशः प्रदत्तः। तद्वयम् अस्मिन् पाठे भद्रसूक्तस्थानां प्रत्येकमन्त्राणामर्थमाध्यमेन ज्ञास्यामः।

---

**॥ अथ भद्रसूक्तम्॥**

1. हरिः ॐ आनो भद्राः क्रतवो यन्तु विश्श्वतोदब्धासोऽअपरीतासऽउद्भिदः।

देवानो यथा सदमिद्वृधेऽअसन्नप्रायुवोरक्षितारो दिवे दिवे॥ (शु.यजु.14-25)

**अन्वयः** - **(आनो भद्राः....)** विश्वतः नः अदब्धासः, अपरीतासः, उद्भिदः (च) भद्राः क्रतवः आयान्तु। यथा देवाः नः सदमिद् असन्, अप्रायुवः, रक्षितारः (च) दिवे दिवे (स्युः)॥

**शब्दार्थाः विश्वतः** सर्वतः **नः** अस्माकम् **अदब्धासः** अहिंसिताः **अपरीतासः** अपरिज्ञाताः **उद्भिदः** उद्भेत्तारः **भद्राः** सतुत्याः **क्रतवः** यज्ञाः **आयन्तु** आगच्छन्तु **सदम्** सदा **इत्** एव **वृधे** वृद्ध्यर्थम् **असन्** स्युः **अप्रायुवः** आलस्यरहिताः **रक्षितारः** रक्षकाः **दिवे दिवे** दिने दिने।

**अर्थः** - अस्मिन् मन्त्रे ऋषिः कथयति, सर्वतः अस्माकं कृते तादृशाः हिंसारहिताः, अज्ञातफलदातारः, शत्रुभेदकाः कल्याणकारिणः यज्ञाः प्राप्ताः भवन्तु। येषां फलरूपेण देवाः अस्माकम् अभिवृद्धये सदैव स्युः, एवञ्च देवाः प्रतिदिनं प्रमादरहिताः सन्तः अस्माकं संरक्षकाः भवन्तु **॥1॥**

**2. देवानाम्भद्रा सुमतिर्ऋजूयतान्देवाना ᳪ रातिरभिनो निवर्तताम्।**

**देवाना ᳪ सक्ख्यमुपसे दिमाव्वयन्देवानऽआयुः प्रतिरन्तुजीवसे॥ (शु.यजु.15-25)**

**अन्वयः** - (देवानाम्भद्रा...0) देवानां भद्रा सुमतिः नः ऋजूयताम्। देवानां रातिः (नः) अभिनिवर्धताम्। वयं देवानां सख्यम् उपसेदिमा। देवाः नः आयुः जीवसे प्रतिरन्तु॥

**शब्दार्थाः देवानाम्** देवतानाम्, **भद्रा** कल्याणकारिणी, **ऋजूयाताम्** ऋजुरिव आचर्यताम्, **रातिः** दानम्, **नः** अस्मान्, **अभिनिवर्धताम्** प्रतिदीयताम्, **वयम्** उपासकाः (वयमत्यिर्थः), **देवानाम्** देवतानाम्, **सख्यम्** मैत्रीम्, **उपसेदिम (मा)** प्राप्नुयाम, **देवाः** देवताः, **नः** अस्माकम् (भक्तानाम्), **आयुः** आयुष्यम्, **जीवसे** जीवनाय, **प्रतिरन्तु** वर्धयन्तु॥

**अर्थः** - अस्मिन् मन्त्रे ऋषिः कथयति, देवानां कल्याणी सुमतिः अस्माकं कृते ऋजुभावं सरलभावं धारयताम्, देवानां दानं वयं सदैव प्राप्नुयाम। ततः लब्धदानाः सन्तः वयं देवानां मित्रभावं प्राप्नुयाम। ततः देवाः अस्माकं भक्तानाम् आयुष्यं प्रवर्धयन्तु॥2॥

3. **तान्पूर्व्वयानिविदाहूमहेव्वयम्भगम्मित्रमदितिन्दक्षमस्त्रिधम्।**

**अर्य्यमणं व्वरुणगुं सोममश्विना सरस्वतीनः सुभगामयस्करत्॥ (शु.यजु.16-25)**

**अन्वयः** - (तान्पूर्व्वयानिविदा...0) वयं पूर्वया निविदा तान् भगम्, मित्रम्, अदितिम्, अस्त्रिधं दक्षम्, अर्यमणम्, वरुणम्, सोमम्, अश्विनौ (इत्यादीन्) देवान् हूमहे। (यैः सहिता) सुभगा सरस्वती नः मयस्करत्॥

**शब्दार्थाः** **वयम्** भक्ताः **पूर्वया** प्राचीनया **निविदा** वाचा (वाणीद्वारा) **तान्** देवान् **भगम्** शोभनम् **मित्रम्** सखायम् **अदितिम्** देवमातरम् **दक्षम्** प्रजापतिम् **अर्यमणम्** अर्यमा इति नामाख्यं देवम् **अश्विनौ** अश्विनीकुमारौ (इत्यादीन् देवान्) **हूमहे** आवाहयामः (यैः सहिता) **सुभगा** शोभना **सरस्वती** शारदा **नः** अस्माकम् **मयस्करत्** सुखं करोतु।

**अर्थः** - वयं प्राचीनया अकृत्रिमया स्वयंभुवा वाचा तान् भगम्, मित्रम्, अदितिम्, अच्युतसद्भावं दक्षम्, अर्यमाणं, सोमम्, अश्विनौ इत्यादीन् देवान् आह्वयामः। एवं शोभनं भगं भाग्यं यस्याः सा सुभगा भजनीया सरस्वती भगादिसहिता अस्माकं सुखं करोतु॥ 3॥

4. **तन्नोव्वातोमयोभुव्वातुभेखजन्तन्मातापृथिवीतत्त्पिताद्द्यौः।**

**तद्ग्रावाणः सोमसुतोमयोभुवस्तदश्विनाश्रृणुतन्धिष्ण्ण्यायुवम्॥ (शु.यजु.17-25)**

**अन्वयः** - (तन्नोव्वातो...0) मयोभुवातः तत् भेषजं नः वातु। (तच्च) भेषजं माता पृथिवी, पिता द्यौः (अनुगृह्णातु) तच्च (भेषजम्) ग्रावाणः सोमसुतो मयोभुवः (ददातु), (हे घिष्णया) अश्विनौ युवां तद् (भेषज्यार्थनं हितम्) श्रृणुतम्॥

**शब्दार्थाः** **मयोभुः** सुखंप्रति यः गमयति **वातः** वायुः, (तत्) **भेषजम्** औषधम् **ग्रावाणः** प्रस्तराः **सोमसुतः** सोमयज्ञः **मयोभुवः** सुखंप्रति गमयितारः **धिष्ण्या** गृहवर्धयितारौ **युवम्** युवाम्।

**अर्थः** - अस्माकं कृते वायुः भेषजं (औषधम्) हितं यथा स्यात्तथा सुखोत्पादकं हितं ददातु। जगन्माता पृथिवी तत् भेषजप्रार्थनारूपं हितं ददातु। पालकः पिता तत् हितं ददातु। सोमाभिषवकारिणः ग्रावणः दृषदः सुखदातारः तत् हितं ददतु। हे गृहवर्धपितारो! धारयितारौ अश्विनौ युवामपि भेषजप्रार्थनं दत्तवन्तौ॥ 4॥

5. **तमीशानञ्जागतस्तस्थुषसप्पतिन्धियञ्जिन्मवसेहूमहेव्वयम्।**

**पूषानोयथाव्वेदसामसद्वृधेरक्षितापायुरदब्धः स्वस्तये॥ (शु.यजु.18-25)**

**अन्वयः** - (तमीशानज्जगत...0) वयं तत् जगतः तस्थुषः पतिं धियाज्जिन्वनम् ईशानं अवसे हूमहे। यथा रक्षिताः पायुः अदब्धः पूषा (नः) वेदसाम् वृधे असत् नः (च) स्वस्तये (असत्)॥

**शब्दार्थाः** **तस्थुषः** स्थावरस्य **धियञ्जिन्वम्** स्वसङ्कल्पम् जीवम् प्रेरयति।

**अर्थः** - अस्मिन् मन्त्रे ऋषिः कथयति, वयं चराचरस्य जङ्गमस्य स्थावरस्य च जगतः स्वैंमनम् यः सङ्कल्पेन सर्वान् प्रेरयति, तं रुद्रं प्रीणयितुम् आवाहयामः। येन च सः अस्माकं रक्षणकर्ता, पालनकर्ता, अहिंसितश्च सूर्यः अस्माकं धनस्य वर्धनाय अस्मभ्यम् च कल्याणाय भवतु॥ 5॥

6. **स्वस्तिनऽइन्द्रो व्वृद्धश्रवाः स्वस्तिनः पूषाव्विश्श्ववेदाः।**

**स्वस्तिनस्ताक्ष्योंऽअरिष्टनेमिः स्वस्तिनो बृहस्पतिर्द्दधातु॥ (शु.यजु.19-25)**

**अन्वयः** - (स्वस्तिनऽइन्द्रो...0) वृद्धाश्रवाः इन्द्रः नः स्वस्ति दधातु। विश्ववेदाः पूषा नः स्वस्ति (दधातु)। अरिष्टनेमिः तार्क्ष्यः नः स्वस्ति (दधातु)। बृहस्पतिः नः स्वस्ति (दधातु)॥

**शब्दार्थाः** **स्वस्ति** कल्याणम् **वृद्धश्रवाः** महती कीर्तिः यस्य सः **अरिष्टनेमिः** हिंसारहितः **ताक्ष्र्यः** गरुडः **दधातु** धारयतु **बृहस्पतिः** देवानां गुरुः।

**अर्थः** - अस्मिन् मन्त्रे ऋषिः कथयति, महनीयकीर्तिः इन्द्रः अस्मभ्यं कल्याणं ददातु। सर्वधनस्वामी पूषा अस्मभ्यं कल्याणं ददातु। अनुपहतगतिः ताक्ष्र्यदेवोऽपि अस्मभ्यं कल्याणं ददातु। एवञ्च बृहस्पतिः अस्मभ्यं कल्याणं ददातु॥ 6॥

**7. पृषदश्श्वामरुतः पृश्निमातरःशुभँय्यावानो व्विदथेषुजग्मयः।**

**अग्निजिह्वामनवः सूरचक्षसोव्विश्श्वेनो देवाऽअवसागमन्निह॥ ( शु.यजु.20-25 )**

**अन्वयः** - (पृषदश्श्वामरुतः... 0) पृषदश्वाः, पृश्निमातरः, शुभंयावानः, जग्मयः, अग्निजिह्वाः, मनवः, सूरचक्षसः, विश्वेदेवाः, (ते) मरुतः देवाः अवसा नः इह विदधेषु गमन्॥

**शब्दार्थाः** **पृषदश्वा** बलयुताश्वाः **पृश्निमातरः** द्युपुत्राः **शुभंयावानः** शुभं प्रति गमयन्ति ते **जग्मयः** सततं गमनशीलाः **अग्निजिह्वाः** अग्निहोत्रादि-यज्ञस्वरूपाः **मनवः** सर्वज्ञाः **सूरचक्षसः** सूर्यचक्षुषः **विश्वेदेवाः** विश्वस्य देवाः, **मरुतः** वायवः, **अवसा** हविषा **विदथेषु** यज्ञेषु **गमन्** - आगच्छन्तु।

**अर्थः** - अस्मिन् मन्त्रे ऋषिः कथयति, सबलाः अश्वाः येषां ते, द्यौः माता येषां ते, शुभं कर्तुं जनान्प्रति ये यान्ति ते, गमनशीलाः, ये अग्निना खादन्ति-अग्निः, जिह्वा येषां ते, आदित्याः नेत्राणि येषां ते, विश्वेदेवाः, सर्वज्ञाश्च ये वायवः देवाः ते यज्ञे हविर्दानेन अस्माकं यज्ञेषु आगच्छन्तु॥ 7॥

**8. भद्रङ्कर्ण्णेभिः शृणुयामदेवाभद्रम्पश्येमाक्षभिर्य्यजत्राः।**

**स्थिरैरङ्गैस्तुष्टुवाꣳसस्तनूभिर्व्व्यशेमहिदेवहितँयदायुः॥ ( शु.यजु.21-25 )**

**अन्वयः** - (भद्रङ्कर्ण्णेभिः...0) (हे) देवाः वयं कर्णेभिः भद्रं श्रृणुयाम। (हे)यजत्राः अक्षभिः भद्रं पश्येम, स्थिरैरङ्गैः तुष्टुवांसः। यदायुः देवहितम् (तत्) तनुभिः व्यशेमहि॥

**शब्दार्थाः** **भद्रम्** कल्याणम् **कर्णेभिः** कर्णैः **अक्षभिः** नेत्रैः **यजत्राः** यज्ञ कर्तुं योग्याः (यजेलिमाः) **तुष्टुवांसः** स्तुतिं कुर्वन्तः **तनूभिः** शरीरैः **व्यशेमहि** प्राप्नुयाम।

**अर्थः** - अस्मिन् मन्त्रे ऋषिः कथयति, हे देवाः! कर्णेभिः वयं कल्याणमयमेव श्रवणं कुर्याम। हे यजनीयाः देवाः! वयं नेत्रैः कल्याणमेव पश्येम। यत् आयुष्यम् अस्मभ्यं देवैः दत्तं, तत् स्थिरैः अङ्गैः तेषां स्तुतिं कुर्वाणाः, सन्तः अस्माकं शरीरैः प्राप्नुयाम॥ 8॥

**9. शतमिन्नुशरदोऽअन्तिदेवायत्रानश्चक्राजरसन्तनूनाम्।**

**पुत्रासोयत्रपितरोभवन्तिमानोमद्ध्यारीरिषतायुर्गन्तोः ( शु.यजु.22-25 )**

**अन्वयः** - (शतमिन्नुशरदो...0) शतम् इत् नु शरदः अन्ति, देवाः यत्र नः तनूनां जरसः चक्राः। (तत्र) यत्र पुत्रासः पितरः भवन्ति। नः गन्तोः आयुः मध्या मा रीरिषत॥

**शब्दार्थाः** **इत्** अपि **नु** खलु **अन्ति** समीपे **जरसम्** जरानिमित्तां शक्तिम् **चक्राः** चक्रे **पुत्रासः** पुत्राः **गन्तोः** गच्छताम् **मध्या** मध्ये **मा** न **रीरिषत्** समाप्तिं कुर्वन्ति।

**अर्थः** - अस्मिन् मन्त्रे ऋषः कथयति हे देवाः! शतमपि खलु शरदः अन्तिकः आयुःकालः निर्धारितः, तत्र च देवैः अस्माकं शरीरे जरावस्था, रुग्णावस्था निर्धारिता वर्तते। अस्मिन्नेव काले पुत्राः अपि पितरः भवन्ति। हे देवाः! जीवनयात्रां कुर्वताम् अस्माकम् अस्मिन् आयुषि मध्ये अवरोधं न कुर्वन्तु। जीवनं मध्ये न समाप्नुवन्तु। इति भावः॥ 9॥

**10. अदितिर्द्योरदितिरन्तरिक्षमदितिर्म्मातासपितासपुत्त्रः।**

**विश्वेदेवाऽअदितिः पञ्चजनाऽअदितिर्ज्जातमदितिर्ज्जनित्त्वम्॥ (शु.यजु.23-25)**

**अन्वयः** - (अदितिद्र्धौ...0) अदितिः द्यौः (अस्ति), अदितिः अन्तरिक्षम्, अदितिः माता, स पिता, स पुत्रः। विश्वेदेवाः अदितिः, पञ्चजनाः अदितिः, अदितिः जातम्, अदितिःजनित्वम्॥

**शब्दार्थाः अदितिः** महाभाग्ययुक्तत्वम् **पञ्चजनाः** मनुष्याः **जनित्वम्** प्रजननशक्तिः।

**अर्थः** - अस्मिन् मन्त्रे ऋषिः कथयति, अदितिः अर्थात् अदीनः, महाभाग्ययुक्तः इति। द्यौः अदीना अन्तरिक्षम् अदीनम्, माता अदीना, पिताः अदीनः, पुत्रः अदीनः, विश्वदेवाः अदीनाः, मनुष्याः अदीनाः, यत्किञ्चिदपि जातं तत्सर्वमपि अदीनम्, प्रजननशक्तिरपि अदीना एव। अतः सर्वमपि महाभाग्ययुक्तमेव॥ 10॥

**11. द्यौः शान्तिरन्तरिक्षद्द शान्तिः पृथिवीशान्तिरायः शान्तिरोषधयः।**

**व्वनस्प्पतयः शान्तिर्व्विश्श्वेदेवाः शान्तिर्ब्र्ह्मशान्तिः**

**सर्वःद्द शान्तिः शान्तिरेवशान्तिः सामा शान्तिरेधि॥ (शु.यजु.17-36)**

**अन्वयः** - (द्यौः शान्ति...0) द्यौः शान्तिः, अरन्तरिक्षं शान्तिः, पृथिवी शान्तिः, आपः शान्तिः, ओषधयः शान्तिः, वनस्पतयः शान्तिः, विश्वेदेवाः शान्तिः, ब्रह्म शान्तिः, सर्वं शान्तिः, शान्तिः एव शान्तिः सा शान्तिः मा एधि॥

**शब्दार्थाः आपः** जलानि **एधि** भव **मा** माम्।

**अर्थः** - अस्मिन् मन्त्रे ऋषिः कथयति, या स्वर्गलोके शान्तिः, या च अन्तरिक्षे, पृथिव्याम्, जलेषु, ओषधीषु, वनस्पतिषु, विश्वेषु देवेषु, ब्रह्मणि, सर्वस्मिन् स्थिता तथा च स्वरूपतः अपि या शान्तिः सा मयि अपि तिष्ठेत्॥ 11॥

**12. यतोयतः समीहसे ततोनोऽअभयंकुरु॥**

**शन्नः कुरुप्रजाभ्योभयन्नः पशुभ्यः॥ (शु.यजु.22-36)**

**अन्वयः** - (यतोयतः समीहसे...0) यतः यतः समीहसे ततः नः अभयं कुरु। प्रजाभ्यः नः (च) शं पशुभ्यः नः (च) अभयं कुरु॥

**शब्दार्थाः यतः** यस्मात् स्थानात् **समीहसे** समीच्छसि **ततः** तस्मात् स्थानात् **नो** अस्मान् **शम्** शान्तिः **अभयम्** निर्भयताम्।

**अर्थः** - अस्मिन् मन्त्रे ऋषिः कथयति, यथा यथा (भवदिच्छानुसारम्) हे भगवन् ! त्वम् इच्छसि तथा अस्मभयम् अभयतां देहि। अस्मभ्यं प्रजाभ्यश्च शान्तिं तथा अस्मयभ्यम् अस्माकं पशुभ्यश्च अभयतां देहि॥ 12॥

**13. विश्वश्वानिदेवसवितर्दुरितानि परासुव। यद्भद्रन्तन्नऽआसुव॥ (शु.यजु.3-30)**

**अन्वयः** - (विश्वश्वादिदेव...0) (हे) देव सवितः! (नः) दुरितानि परासुव। यत् भद्रं तत् नः आसुव॥

**शब्दार्थाः सवितः** सूर्यदेवस्य **दुरितानि** दुर्गुणाः **परासुव** दुरीकुरु **भद्रम्** कल्याणम् **आसुव** देहि॥

**अर्थः** - अस्मिन् मन्त्रे ऋषिः कथयति, हे सविता देव! त्वम् अस्मत् अस्माकं समस्तान् दुर्गुणान् दूरीकुरु। तथा च यत् कल्याणं तत् अस्मभ्यं देहि॥ 13॥

## स्वाध्यायः

**1. अधस्तनेभ्यः विकल्पेभ्यः योग्यं विकल्पं चित्वा उत्तरं यच्छत।**

(1) 'भद्रम्' इति शब्दस्य कोऽर्थः?

(क) कल्याणम् (ख) प्रियम् (ग) दयितम् (घ) सर्वतः

(2) 'भद्रसूक्तम्' यजुर्वेदस्य कस्मिन् अध्याये प्राप्यते ?

(क) पञ्चदशे (ख) पञ्चविंशे (ग) द्वितीये (घ) त्रयोविंशे

(3) अधोदत्तेषु कः शब्दः यज्ञवाचकः ?

(क) अपरीतासः (ख) अदब्धासः (ग) क्रतवः (घ) देवासः

(4) इन्द्रः अस्मभ्यं किं ददातु ?

(क) धनम् (ख) यज्ञसमृद्धिम् (ग) हितम् (घ) स्वस्ति

(5) वयं कर्णैः किं श्रृणुयाम ?

(क) मन्त्रम् (ख) भद्रम् (ग) देवस्तवम् (घ) गानम्

**2. निम्नलिखितानाम् उत्तरं लिखत।**

(1) के-के देवाः अस्मभ्यं स्वस्ति ददतु ?

(2) भद्रं कर्णेभिः इति मन्त्रस्य सान्वयमर्थं लिखत ?

(3) भद्रसूक्तस्य सारांशः स्वकीयशब्देषु लिखत ?

(4) देवानां भद्रा.... इति मन्त्रे कीदृशी भावना प्रकटीकृता ?

**3. मन्त्राणां पूर्तिं कुरुत।**

(1) आनो भद्राः क्रतवो.... (2) भद्रं कर्णेभिः.... (3) तान्पूर्वया... (4) शतमिन्नु शरदो....

**शिक्षक-प्रवृत्तिः**

शिक्षकः वेदस्थ-विविधसूक्तानां चर्चा कुर्यात्।

**छात्रप्रवृत्तिः**

छात्राः मन्त्राणां कण्ठस्थीकरणं कुर्युः।

वेदस्थ-विविधसूक्तानां तालिकायाः लेखनं कुर्युः।

**सूक्तिः - वेदो नारायणो हरिः।**

●

| 2. | # योगिनीपूजनम् |
|---|---|

**प्रस्तावना**

देवीप्रतिष्ठाकर्मणि देव्या साकं याः परिचारिकाः देव्यः भवन्ति, ताः 'योगिन्यः' इति नाम्ना आख्यायन्ते। ताः योगिन्यः चतुष्षष्टिः सन्ति। यज्ञकर्मणि देव्या साकम् आसां पूजनादिकं भवति। अस्माकं शास्त्रेषु कर्मणः साङ्गतासिद्ध्यर्थं कर्मणः परिसमाप्त्यर्थं वा योगिनीनां पूजनम् अवश्यं विधेयम् इति निर्दिष्टम्। पूजनार्थम् आग्नेय्यां दिशि हस्तपरिमिते श्वेतादि वस्त्रे अष्ट-अष्टत्रिकोणानाम् अष्टपङ्क्त्यः प्राक्संस्थाः कार्याः। तत्र योगिनीदेवतानां पीठः भवति। पाठेऽस्मिन् योगिनीनां पीठः भवति। पाठेऽस्मिन् योगिनीनां त्रयः प्रकाराः निर्दिष्टाः। तासाञ्च पूजनसङ्कल्पादिकञ्च दत्तमस्ति।

---

**॥ अथ योगिनीपूजनम्॥**

**अथ सङ्कल्पः -**

**हस्ते जलमादाय**

अद्य पूर्वोच्चारित-शुभपुण्यतिथौ यज्ञकालिक-समस्तविघ्न-विध्वंसनार्थं प्रतिष्ठाङ्गत्वेन योगिनीस्थापनादिकं करिष्ये।

हस्ते अक्षतान् गृहीत्वा-

**मन्त्रः - योगे योगे तवस्तरं व्वाजे व्वाजे हवामहे। सखायऽ इन्द्रमूतये॥ 1॥ ।शु.य.11।18।**

**चतुःषष्ठीयोगिनीनां नामावली**

गजानना सिंहमुखी गृध्रास्याकाकतुण्डिका। उष्ट्रग्रीवा हयग्रीवा वाराही शरभानना ॥ 1॥

उलूकिका शिवारावा मयूरी विकटानना। अष्टवक्रा कोटराक्षी कुब्जा विकटलोचना॥ 2॥

शुष्कोदरी ललज्जिह्वा श्वदंष्ट्रा वानरानना। रुक्षाक्षी केकराक्षी च बृहत्तुण्डा सुराप्रिया॥ 3॥

कपालहस्ता रक्ताक्षी शुकी श्येनी कपोतिका। पाशहस्ता दण्डहस्ता प्रचण्डा चण्डविक्रमा॥ 4॥

शिशुघ्नी पापहन्त्री च काली रुधिरपायिनी। वसाधया गर्भभक्षा शवहस्तान्त्रमालिनी॥ 5॥

स्थूलकेशी बृहत्कुक्षी सर्पास्या प्रेतवाहना। दन्दशूककरा क्रौञ्ची मृगशीर्षा वृषानना॥ 6॥

व्यात्तास्या धूमनिःश्वासा व्योमैकचरणोर्ध्वदृक्। तापिनी शोषिणी दृष्टिः कोटरी स्थूलनासिका॥ 7॥

विद्युत्प्रभा बलाकास्या मार्जारी कटपूतना। अट्टाट्टहासा कामाक्षी मृगाक्षी मृगलोचना॥ 8॥

**अथ गजाननादि-चतुष्षष्ठियोगिनीनाम् आवाहनं प्रतिष्ठापनञ्च॥**

**ॐ ऐं महाकाल्यै नमः महाकालीम् आवाहयामि, स्थापयामि॥**

**ॐ ऐं महालक्ष्म्यै नमः महालक्ष्मीम् आवाहयामि, स्थापयामि॥**

**ॐ ऐं महासरस्वत्यै नमः महासरस्वतीम् आवाहयामि, स्थापयामि॥**

| क्रम | ॐ | देवतायै | नमः | देवताम् | आवाहयामि | स्थापयामि |
|---|---|---|---|---|---|---|
| 1. | ॐ | गजाननायै | नमः | गजाननाम् | आवाहयामि | स्थापयामि |
| 2. | ॐ | सिंहमुख्यै | नमः | सिंहमुखीम् | आवाहयामि | स्थापयामि |
| 3. | ॐ | गृध्रास्यायै | नमः | गृध्रास्याम् | आवाहयामि | स्थापयामि |
| 4. | ॐ | काकतुण्डिकायै | नमः | काकतुण्डिकाम् | आवाहयामि | स्थापयामि |
| 5. | ॐ | उष्ट्रग्रीवायै | नमः | उष्ट्रग्रीवाम् | आवाहयामि | स्थापयामि |
| 6. | ॐ | हयग्रीवायै | नमः | हयग्रीवाम् | आवाहयामि | स्थापयामि |
| 7. | ॐ | वाराह्यै | नमः | वाराहीम् | आवाहयामि | स्थापयामि |
| 8. | ॐ | शरभाननायै | नमः | शरभाननाम् | आवाहयामि | स्थापयामि |
| 9. | ॐ | उलूकिकायै | नमः | उलूकिकाम् | आवाहयामि | स्थापयामि |
| 10. | ॐ | शिवारावायै | नमः | शिवारावाम् | आवाहयामि | स्थापयामि |
| 11. | ॐ | मयूर्यै | नमः | मयूरीम् | आवाहयामि | स्थापयामि |
| 12. | ॐ | विकटाननायै | नमः | विकटाननाम् | आवाहयामि | स्थापयामि |
| 13. | ॐ | अष्टवक्रायै | नमः | अष्टवक्राम् | आवाहयामि | स्थापयामि |
| 14. | ॐ | कोटराक्ष्यै | नमः | कोटराक्षीम् | आवाहयामि | स्थापयामि |
| 15. | ॐ | कुब्जायै | नमः | कुब्जाम् | आवाहयामि | स्थापयामि |
| 16. | ॐ | विकटलोचनायै | नमः | विकटलोचनाम् | आवाहयामि | स्थापयामि |
| 17. | ॐ | शुष्कोदर्यै | नमः | शुष्कोदरीम् | आवाहयामि | स्थापयामि |
| 18. | ॐ | लोलजिह्वायै | नमः | लोलजिह्वाम् | आवाहयामि | स्थापयामि |
| 19. | ॐ | श्वदंष्ट्रायै | नमः | श्वदंष्ट्राम् | आवाहयामि | स्थापयामि |
| 20. | ॐ | वानराननायै | नमः | वानराननाम् | आवाहयामि | स्थापयामि |
| 21. | ॐ | रुक्षाक्ष्यै | नमः | रुक्षाक्षीम् | आवाहयामि | स्थापयामि |
| 22. | ॐ | केकराक्ष्यै | नमः | केकराक्षीम् | आवाहयामि | स्थापयामि |
| 23. | ॐ | बृहत्तुण्डायै | नमः | बृहत्तुण्डाम् | आवाहयामि | स्थापयामि |
| 24. | ॐ | सुराप्रियायै | नमः | सुराप्रियाम् | आवाहयामि | स्थापयामि |
| 25. | ॐ | कपालहस्तायै | नमः | कपालहस्ताम् | आवाहयामि | स्थापयामि |
| 26. | ॐ | रक्ताक्ष्यै | नमः | रक्ताक्षीम् | आवाहयामि | स्थापयामि |
| 27. | ॐ | शुक्यै | नमः | शुकीम् | आवाहयामि | स्थापयामि |

| | | | | | | |
|---|---|---|---|---|---|---|
| 28. | ॐ | श्येन्यै | नमः | श्येनीम् | आवाहयामि | स्थापयामि |
| 29. | ॐ | कपोतिकायै | नमः | कपोतिकाम् | आवाहयामि | स्थापयामि |
| 30. | ॐ | पाशहस्तायै | नमः | पाशहस्ताम् | आवाहयामि | स्थापयामि |
| 31. | ॐ | दण्डहस्तायै | नमः | दण्डहस्ताम् | आवाहयामि | स्थापयामि |
| 32. | ॐ | प्रचण्डायै | नमः | प्रचण्डाम् | आवाहयामि | स्थापयामि |
| 33. | ॐ | चण्डविक्रमायै | नमः | चण्डविक्रमाम् | आवाहयामि | स्थापयामि |
| 34. | ॐ | शिशुघ्न्यै | नमः | शिशुघ्नीम् | आवाहयामि | स्थापयामि |
| 35. | ॐ | पापहन्त्र्यै | नमः | पापहन्त्रीम् | आवाहयामि | स्थापयामि |
| 36. | ॐ | काल्यै | नमः | कालीम् | आवाहयामि | स्थापयामि |
| 37. | ॐ | रुधिरपायिन्यै | नमः | रुधिरापायिनीम् | आवाहयामि | स्थापयामि |
| 38. | ॐ | वसाधयाये | नमः | वसाधयाम् | आवाहयामि | स्थापयामि |
| 39. | ॐ | गर्भभक्षायै | नमः | गर्भभक्षाम् | आवाहयामि | स्थापयामि |
| 40. | ॐ | शवहस्तायै | नमः | शवहस्ताम् | आवाहयामि | स्थापयामि |
| 41. | ॐ | आन्त्रमालिन्यै | नमः | आन्त्रमालिनीम् | आवाहयामि | स्थापयामि |
| 42. | ॐ | स्थूलकेश्यै | नमः | स्थूलकेशीम् | आवाहयामि | स्थापयामि |
| 43. | ॐ | बृहत्कुक्ष्यै | नमः | बृहत्कुक्षीम् | आवाहयामि | स्थापयामि |
| 44. | ॐ | सर्पास्यायै | नमः | सर्पास्याम् | आवाहयामि | स्थापयामि |
| 45. | ॐ | प्रेतवाहनायै | नमः | प्रेतवाहनाम् | आवाहयामि | स्थापयामि |
| 46. | ॐ | दन्दशूकायै | नमः | दन्दशूकाम् | आवाहयामि | स्थापयामि |
| 47. | ॐ | क्रोञ्च्यै | नमः | क्रोञ्चीम् | आवाहयामि | स्थापयामि |
| 48. | ॐ | मृगशीर्षायै | नमः | मृगशीर्षाम् | आवाहयामि | स्थापयामि |
| 49. | ॐ | वृषाननायै | नमः | वृषाननाम् | आवाहयामि | स्थापयामि |
| 50. | ॐ | व्यात्तास्यायै | नमः | व्यात्तास्याम् | आवाहयामि | स्थापयामि |
| 51. | ॐ | धूमनिःश्वासायै | नमः | धूमनिःश्वासाम् | आवाहयामि | स्थापयामि |
| 52. | ॐ | व्योमैकचरणोर्ध्वदृश्यै | नमः | व्योमैकचरणोर्ध्वदृशीम् | आवाहयामि | स्थापयामि |
| 53. | ॐ | तापिन्यै | नमः | तापिनीम् | आवाहयामि | स्थापयामि |
| 54. | ॐ | शोषिणीदृष्ट्यै | नमः | शोषिणीदृष्टीम् | आवाहयामि | स्थापयामि |
| 55. | ॐ | कोटर्यै | नमः | कोटरीम् | आवाहयामि | स्थापयामि |

| | | | | | | |
|---|---|---|---|---|---|---|
| 56. | ॐ | स्थूलकेश्यै | नमः | स्थूलकेशीम् | आवाहयामि | स्थापयामि |
| 57. | ॐ | विद्युत्प्रभायै | नमः | विद्युत्प्रभाम् | आवाहयामि | स्थापयामि |
| 58. | ॐ | बलाकास्यायै | नमः | बलाकास्याम् | आवाहयामि | स्थापयामि |
| 59. | ॐ | मार्जार्यै | नमः | मार्जारीम् | आवाहयामि | स्थापयामि |
| 60. | ॐ | कटपूतनायै | नमः | कटपूतनाम् | आवाहयामि | स्थापयामि |
| 61. | ॐ | अट्टाहासायै | नमः | अट्टाहासाम् | आवाहयामि | स्थापयामि |
| 62. | ॐ | कामाक्ष्यै | नमः | कामाक्षीम् | आवाहयामि | स्थापयामि |
| 63. | ॐ | मृगाक्ष्यै | नमः | मृगाक्षीम् | आवाहयामि | स्थापयामि |
| 64. | ॐ | मृगवाहनायै | नमः | मृगवाहनाम् | आवाहयामि | स्थापयामि |

**मण्डलाद् बहिः**

| | | | | | | | |
|---|---|---|---|---|---|---|---|
| 1. | पूर्वे | ॐ | इन्द्राण्यै | नमः | इन्द्राणीम् | आवाहयामि | स्थापयामि |
| 2. | आग्नेय्याम् | ॐ | दुर्गायै | नमः | दुर्गाम् | आवाहयामि | स्थापयामि |
| 3. | दक्षिणे | ॐ | जयायै | नमः | जयाम् | आवाहयामि | स्थापयामि |
| 4. | नैर्ऋत्याम् | ॐ | विजयायै | नमः | विजयाम् | आवाहयामि | स्थापयामि |
| 5. | पश्चिमे | ॐ | अजितायै | नमः | अजिताम् | आवाहयामि | स्थापयामि |
| 6. | वायव्याम् | ॐ | विश्वमङ्गलायै | नमः | विश्वमङ्गलाम् | आवाहयामि | स्थापयामि |
| 7. | उत्तरे | ॐ | भद्ररूपिण्यै | नमः | भद्ररूपिणीम् | आवाहयामि | स्थापयामि |
| 8. | ईशान्याम् | ॐ | भुवनेश्वर्यै | नमः | भुवनेश्वरीम् | आवाहयामि | स्थापयामि |
| 9. | मध्ये | ॐ | राजराजेश्वर्यै | नमः | राजराजेश्वरीम् | आवाहयामि | स्थापयामि |

**ॐ मनोजूतिर्जुषतामाज्यस्यबृहस्पतिर्य्यावज्ञमिमन्तनोत्वरिष्टँय्याज्ञꣳ समिमन्दधातु।**
**विश्वेदेवासऽइहमादयन्तामोइँप्रतिष्ठ॥ (शु.यजु.13-02)**

इति प्रतिष्ठाप्य '**ॐ महाकालीमहालक्ष्मीमहासरस्वतीसहितगजानादियोगिनीभ्यो नमः**' इति यथोपचारैः सम्पूजयेत्।

अनेन पूजनेन महाकाल्यादिसहित-**गजाननादि**-योगिन्यः प्रीयन्ताम्।

**पायसबलिं** - तन्त्रेण वा पृथक्-पृथक् नाममन्त्रेण दद्यात्। 'ॐ महाकालीमहालक्ष्मीमहासरस्वती सहित गजानादियोगिनीभ्यो नमः' **पायसबलिं** समर्पयामि।

अनेन पायसबलिदानेन महाकालीमहालक्ष्मीमहासरस्वतीसहित-**गजाननादियोगिन्यः** प्रीयन्ताम्॥

**अथ विश्वदुर्गादि-योगिनीपूजनम्॥**

**अथ सङ्कल्पः**

**हस्ते जलमादाय**

अद्य पूर्वोच्चारितशुभपुण्यतिथौ यज्ञकालिकसमस्तघ्निविध्वंसनार्थं प्रतिष्ठाङ्गत्वेन विश्वदुर्गादि योगिनीस्थापनादिकं करिष्ये।

हस्ते अक्षतान् गृहीत्वा-

**मन्त्रः योगे योगे तवस्तरं व्वाजे व्वाजे हवामहे। सखाय इन्द्रमूतये॥1॥**

**अथ विश्वदुर्गादि-योगिनीनाम् आवाहनं प्रतिष्ठापनञ्च॥**

ॐ ऐं महाकाल्यै नमः महाकालीम् आवाहयामि, स्थापयामि॥

ॐ ऐं महालक्ष्म्यै नमः महालक्ष्मीम् आवाहयामि, स्थापयामि॥

ॐ ऐं महासरस्वत्यै नमः महासरस्वतीम् आवाहयामि, स्थापयामि॥

| क्रम | ॐ | देवतायै | नमः | देवताम् | आवाहयामि | स्थापयामि |
|---|---|---|---|---|---|---|
| 1. | ॐ | विश्वदुर्गायै | नमः | विश्वदुर्गाम् | आवाहयामि | स्थापयामि |
| 2. | ॐ | उद्योतिन्यै | नमः | उद्योतिनीम् | आवाहयामि | स्थापयामि |
| 3. | ॐ | मालधर्यै | नमः | मालाधरीम् | आवाहयामि | स्थापयामि |
| 4. | ॐ | महामायायै | नमः | महामायाम् | आवाहयामि | स्थापयामि |
| 5. | ॐ | मायावत्यै | नमः | मायावतीम् | आवाहयामि | स्थापयामि |
| 6. | ॐ | शुभायै | नमः | शुभाम् | आवाहयामि | स्थापयामि |
| 7. | ॐ | यशस्विन्यै | नमः | यशस्विनीम् | आवाहयामि | स्थापयामि |
| 8. | ॐ | त्रिनेत्रायै | नमः | त्रिनेत्राम् | आवाहयामि | स्थापयामि |
| 9. | ॐ | लोलजिह्वायै | नमः | लोलजिह्वाम् | आवाहयामि | स्थापयामि |
| 10. | ॐ | शङ्खिन्यै | नमः | शङ्खिनीम् | आवाहयामि | स्थापयामि |
| 11. | ॐ | यमघण्टायै | नमः | यमघण्टाम् | आवाहयामि | स्थापयामि |
| 12. | ॐ | कालिकायै | नमः | कालिकाम् | आवाहयामि | स्थापयामि |
| 13. | ॐ | चर्चिकायै | नमः | चर्चिकाम् | आवाहयामि | स्थापयामि |
| 14. | ॐ | यक्षिण्यै | नमः | यक्षिणीम् | आवाहयामि | स्थापयामि |
| 15. | ॐ | सरस्वत्यै | नमः | सरस्वतीम् | आवाहयामि | स्थापयामि |
| 16. | ॐ | चण्डिकायै | नमः | चण्डिकाम् | आवाहयामि | स्थापयामि |
| 17. | ॐ | चित्रघण्टायै | नमः | चित्रघण्टाम् | आवाहयामि | स्थापयामि |
| 18. | ॐ | सुगन्धायै | नमः | सुगन्धाम् | आवाहयामि | स्थापयामि |

| | | | | | | |
|---|---|---|---|---|---|---|
| 19. | ॐ | कामाक्ष्यै | नमः | कामाक्षीम् | आवाहयामि | स्थापयामि |
| 20. | ॐ | भद्रकाल्यै | नमः | भद्रकालीम् | आवाहयामि | स्थापयामि |
| 21. | ॐ | परायै | नमः | पराम् | आवाहयामि | स्थापयामि |
| 22. | ॐ | कान्तराक्ष्यै | नमः | कान्तराक्षीम् | आवाहयामि | स्थापयामि |
| 23. | ॐ | नीलाङ्कायै | नमः | नीलाङ्काम् | आवाहयामि | स्थापयामि |
| 24. | ॐ | कोटराक्ष्यै | नमः | कोटराक्षीम् | आवाहयामि | स्थापयामि |
| 25. | ॐ | सर्वमङ्गलायै | नमः | सर्वमङ्गलाम् | आवाहयामि | स्थापयामि |
| 26. | ॐ | ललितायै | नमः | ललिताम् | आवाहयामि | स्थापयामि |
| 27. | ॐ | त्वरितायै | नमः | त्वरिताम् | आवाहयामि | स्थापयामि |
| 28. | ॐ | भुवनेश्वर्यै | नमः | भुवनेस्वरीम् | आवाहयामि | स्थापयामि |
| 29. | ॐ | खड्गपाण्यै | नमः | खड्गपाणिम् | आवाहयामि | स्थापयामि |
| 30. | ॐ | शूलिन्यै | नमः | शूलिनीम् | आवाहयामि | स्थापयामि |
| 31. | ॐ | दण्डिकायै | नमः | दण्डिकाम् | आवाहयामि | स्थापयामि |
| 32. | ॐ | अम्बिकायै | नमः | अम्बिकाम् | आवाहयामि | स्थापयामि |
| 33. | ॐ | शूलेश्वर्यै | नमः | शूलेश्वरीम् | आवाहयामि | स्थापयामि |
| 34. | ॐ | बाणवत्यै | नमः | बाणवतीम् | आवाहयामि | स्थापयामि |
| 35. | ॐ | धनुर्धरायै | नमः | धनुर्धराम् | आवाहयामि | स्थापयामि |
| 36. | ॐ | महोल्लासायै | नमः | महोल्लासाम् | आवाहयामि | स्थापयामि |
| 37. | ॐ | विशालाक्ष्यै | नमः | विशालाक्षीम् | आवाहयामि | स्थापयामि |
| 38. | ॐ | त्रिपुरायै | नमः | त्रिपुराम् | आवाहयामि | स्थापयामि |
| 39. | ॐ | भगमालिन्यै | नमः | भगमालिनीम् | आवाहयामि | स्थापयामि |
| 40. | ॐ | दीर्घकेश्यै | नमः | दीर्धकेशीम् | आवाहयामि | स्थापयामि |
| 41. | ॐ | घोरघोणायै | नमः | घोरघोणाम् | आवाहयामि | स्थापयामि |
| 42. | ॐ | वाराह्यै | नमः | वाराहीम् | आवाहयामि | स्थापयामि |
| 43. | ॐ | महोदर्यै | नमः | महोदरीम् | आवाहयामि | स्थापयामि |
| 44. | ॐ | कामेश्वर्यै | नमः | कामेश्वरीम् | आवाहयामि | स्थापयामि |
| 45. | ॐ | गुह्येश्वर्यै | नमः | गुह्येश्वरीम् | आवाहयामि | स्थापयामि |
| 46. | ॐ | भूतनाथायै | नमः | भूनाथाम् | आवाहयामि | स्थापयामि |

| | | | | | | |
|---|---|---|---|---|---|---|
| 47. | ॐ | महारवायै | नमः | महारवाम् | आवाहयामि | स्थापयामि |
| 48. | ॐ | ज्योतिष्मत्यै | नमः | ज्योतिष्मतीम् | आवाहयामि | स्थापयामि |
| 49. | ॐ | कृत्तिवासायै | नमः | कृत्तिवासाम् | आवाहयामि | स्थापयामि |
| 50. | ॐ | मुण्डिन्यै | नमः | मुण्डिनीम् | आवाहयामि | स्थापयामि |
| 50. | ॐ | राववाहिन्यै | नमः | शववाहिनीम् | आवाहयामि | स्थापयामि |
| 52. | ॐ | शिवाङ्कायै | नमः | शिवाङ्काम् | आवाहयामि | स्थापयामि |
| 53. | ॐ | लिङ्गहस्तायै | नमः | लिङ्गहस्ताम् | आवाहयामि | स्थापयामि |
| 54. | ॐ | भगवक्त्रायै | नमः | भगवक्त्राम् | आवाहयामि | स्थापयामि |
| 55. | ॐ | गगनायै | नमः | गगनाम् | आवाहयामि | स्थापयामि |
| 56. | ॐ | मेघवाहनायै | नमः | मेघवाहनाम् | आवाहयामि | स्थापयामि |
| 57. | ॐ | मेघघोषायै | नमः | मेघघोषाम् | आवाहयामि | स्थापयामि |
| 58. | ॐ | नारसिंह्यै | नमः | नारसिंहीम् | आवाहयामि | स्थापयामि |
| 59. | ॐ | कालिन्द्यै | नमः | कालिन्दीम् | आवाहयामि | स्थापयामि |
| 60. | ॐ | श्रीधर्यै | नमः | श्रीधरीम् | आवाहयामि | स्थापयामि |
| 61. | ॐ | तेजस्यै | नमः | तेजसीम् | आवाहयामि | स्थापयामि |
| 62. | ॐ | श्यामायै | नमः | श्यामाम् | आवाहयामि | स्थापयामि |
| 63. | ॐ | मातङ्ग्यै | नमः | मातङ्गीम् | आवाहयामि | स्थापयामि |
| 64. | ॐ | नरवाहनायै | नमः | नरवाहनाम् | आवाहयामि | स्थापयामि |

**ॐ मनोजूतिर्ज्जुषतामाज्यस्यबृहस्पतिर्य्यज्ञमिमन्तनोत्वरिष्टँयज्ञᳬ समिमन्दधातु।**
**व्विश्वेदेवासऽ इहमादयन्तामो इँप्रतिष्ठ॥ ( शु.यजु.13-02 )**

इति प्रतिष्ठाप्य '**ॐ महाकालीमहालक्ष्मीमहासरस्वतीसहितविश्वदुर्गादियोगिनीभ्यो नमः**' इति यथोपचारैः समपूजयेत्।

अनेन पूजनेन महाकाल्यादिसहित-**विश्वदुर्गादि**-योगिन्यः प्रीयन्ताम्।

**पायसबलिं** तन्त्रेण वा पृथक् पृथक् नाममन्त्रेण दद्यात् ।

'**ॐ महाकालीमहालक्ष्मीमहासरस्वतीसहितविश्वदुर्गादि योगिनीभ्योः नमः**' **पायसबलिं** समर्पयामि।

अनेन पायसबलिदानेन महाकालीमहालक्ष्मीमहासरस्वतीसहित-**विश्वदुर्गादि योगिन्यः** प्रीयन्ताम्॥

**वैदिकध्यानम् मन्त्रः** - योगे योगे तवस्तरं वाजे व्वाजे हवामहे। सखाय इन्द्रमूतये॥ 1॥

**पदच्छेदः** - योगे योग इति योगे योगे, तवस्तरम् इति इतवः तरम्, वाजे वाजे इति वाजे हवामहे सखायः इन्द्रम् ऊतये॥

**अर्थः** – सखायः परस्परं सख्यं प्राप्ताः ऋत्विग्यजमानाः, वयम् इन्द्रियवन्तं वीर्यवन्तम् इन्द्रियप्रदं वा अजमूर्तये अवनायनरक्षणाय हवामहे आह्वयामः॥

**शब्दार्थाः**

**प्रीताः** प्रसन्नाः **पान्तु** रक्षन्तु रक्षां कुर्वन्तु वा **प्रीयन्ताम्** प्रसन्नाः भवन्तु **भद्ररूपिणी** कल्याणरूपा **स्थूलकेशी** दृढकेशयुक्ता॥

**स्वाध्यायः**

**1. अधस्तनेभ्यः विकल्पेभ्यः योग्यं विकल्पं चित्वा उत्तरं यच्छत।**

(1) कतिसंख्याकाः योगिन्यः भवन्ति?

(क) 64 (ख) 66 (ग) 25 (घ) 23

(2) कस्यां दिशि योगिनीनां स्थापनं भवति?

(क) उत्तरस्याम् (ख) आग्नेय्याम् (ग) पूर्वस्याम् (घ) वायव्याम्

(3) योगिनीदेवतानां कति प्रकाराः?

(क) त्रयः (ख) चत्वारः (ग) द्वौ (घ) पञ्च

(4) 'घोरघोणा' इति शब्दस्य कोऽर्थः?

(क) भीषणास्या (ख) भयङ्करनासिकायुक्ता (ग) घोरकेशा (घ) भययुक्ता

**2. निम्नलिखितानां उत्तरम् लिखत।**

(1) विश्वदुर्गादि-योगिनीनां कानिचन दश नामानि लिखत?

(2) योगिनीदेवतानां स्थापनसङ्कल्पं लिखत?

(3) केन मन्त्रेण योगिनीनां प्रतिष्ठापनं भवति इति लिखत?

(4) गजाननादियोगिनीनां कानिचन दश नामानि लिखत?

(5) योगिनीनां ध्यानस्य श्लोकं लिखत?

(6) योगे योगे मन्त्रपूर्तिं कृत्वा भावार्थो लेख्यः?

**शिक्षक-प्रवृत्तिः**

शिक्षकः पुराणगताः लोकगताः च योगिनीदेवतानां कथाः छात्रेभ्यः कथयेत्।

**छात्रप्रवृत्तिः**

छात्राः योगिनी देवतानां नाम्नाम् अर्थविषये चर्चां कुर्युः, तासां कथामहत्त्वञ्च लिखेयुः।

सूक्तिः – **'करोतु सा नः शुभहेतुरीश्वरी शुभानि भद्राण्यभिहन्तु चापदः'**

●

# 3. क्षेत्रपालपूजनम्

**प्रस्तावना**

देव-देवी-प्रतिष्ठायां रक्षकरूपा: देवा: क्षेत्रपाला: कथ्यन्ते। शास्त्रानुसारं यज्ञकालिकविघ्नपरिहारार्थं यज्ञभूमिरक्षणार्थं च क्षेत्रपालनपूजनं दर्शितं वर्तते।

देवीरुद्रयजनं विहाय अन्यत्र एकपञ्चाशत् क्षेत्रपालानां स्थापनं भवति। अस्मिन् पाठे क्षेत्रपाल-देवतानां स्थापन-प्रतिष्ठापूजनादिकं च वयं पठिष्याम:।

वायव्य कोणे हस्तपरिमिते श्वेतादिवस्त्रभूषिते पीठे चतुरस्रं कृत्वा तिर्यङ्प्राच्यां च सूत्रद्वन्द्वं समान्तरालं दद्यात्। एवं समा नवकोष्ठा भवति। ततश्च पूर्वादि-दिक्कोणेषु षड्-षड् दलानि निमार्य क्षेत्रपालदेवतानां पूजनं विधेयम्।

---

**॥ अथ अजरादिक्षेत्रपालपूजनम्॥**

**अथ सङ्कल्प:- हस्ते जलमादाय**

अद्य पूर्वोच्चारितशुभपुण्यतिथौ यज्ञकालिकसमस्तविघ्नविध्वंसनार्थं प्रतिष्ठाङ्गत्वेन **अजरादिक्षेत्रपाल-स्थापनादिकं** करिष्ये।

**ध्यानम् - न हि स्पशमविदन्नन्यमस्माद्वैश्वानरात् पुर एतारमग्ने:। एमेनमवृधन्नमृता अमर्त्यं वैश्वानरं क्षैत्रजित्याय देवा:॥ 1॥**

**अथ अजरादिक्षेत्रपालदेवतानां नामावली -**

अजर: व्यापकश्चैव इन्द्रचौर: तृतीयक:। इन्द्रमूर्ति: चतुर्थस्तु उक्ष: पञ्चम उच्यते॥ 1॥

षष्ठ: कूष्माण्डनामा च वरुण: सप्तम: स्मृत:। अष्टमो बटुकश्चैव विमुक्त: नवमस्था॥ 2॥

लिप्तकाय: तु दशम: लीलाक: रुद्रसंख्यक:। एकदंष्ट्र: द्वादशक: तथा च ऐरावत: स्मृत:॥ 3॥

ओषधिघ्न:तत:प्रोक्तो बन्धन: दिव्यक: तथा। कम्बल: भीषण: चैव गवय: घण्ट एव च ॥ 4॥

व्याल: चैव तथाणुश्च चन्द्रवारुण एव च। पटाटोप: चतुर्विंश: जटाल: पञ्चविंशक:॥ 5॥

ऋतु नामा च षड्विंश: तथा घण्टेश्वर: स्मृत:। विटङ्क: मणिमान: च गणबन्धश्च डामर:॥ 6॥

ढुंढिकर्णोपर: प्रोक्त: स्थविरस्तु तत: पर:। दन्तुर: धनदश्चैव नागकर्णो महाबल:॥ 7॥

फेत्कारश्चीकर: सिंह: मृगो यक्षस्तथापर:। मेघवाहन नामा च तीक्ष्णोष्ठो ह्यनलस्तथा॥ 8॥

शुक्लतुण्ड: सुधालापस्तथा बर्बरक: स्मृत:। पवन: पावश्चैव ह्येवं क्षेत्रैधपा: स्मृता:॥ 9॥

पञ्चाशदजराद्यास्ते पावनान्ता: प्रकीर्तिता:। प्रतिष्ठादिसु वै स्थाप्या: क्षेत्राधिपयुतश्च ते॥ 10॥

अथ अजरादिक्षेत्रपालदेवतानाम् आवाहनं प्रतिष्ठापनञ्च॥

| क्रम | ॐ | देवाय | नम: | देवम् | आवाहयामि | स्थापयामि |
|---|---|---|---|---|---|---|
| 1. | ॐ | अजराय | नम: | अजरम् | आवाहयामि | स्थापयामि |
| 2. | ॐ | व्यापकाय | नम: | व्यापकम् | आवाहयामि | स्थापयामि |

| | | | | | | |
|---|---|---|---|---|---|---|
| 3. | ॐ | इन्द्रचौराय | नमः | इन्द्रचौरम् | आवाहयामि | स्थापयामि |
| 4. | ॐ | इन्द्रमूर्तये | नमः | इन्द्रमूर्तिम् | आवाहयामि | स्थापयामि |
| 5. | ॐ | उक्षाय | नमः | उक्षम् | आवाहयामि | स्थापयामि |
| 6. | ॐ | कूष्माण्डाय | नमः | कूष्माण्डम् | आवाहयामि | स्थापयामि |
| 7. | ॐ | वरुणाय | नमः | वरुणम् | आवाहयामि | स्थापयामि |
| 8. | ॐ | बटुकाय | नमः | बटुकम् | आवाहयामि | स्थापयामि |
| 9. | ॐ | विमुक्ताय | नमः | विमुक्तम् | आवाहयामि | स्थापयामि |
| 10. | ॐ | लिप्तकायाय | नमः | लिप्तकायम् | आवाहयामि | स्थापयामि |
| 11. | ॐ | लीलाकाय | नमः | लीलाकम् | आवाहयामि | स्थापयामि |
| 12. | ॐ | एकदंष्ट्राय | नमः | एकदंष्ट्रम् | आवाहयामि | स्थापयामि |
| 13. | ॐ | ऐरावताय | नमः | ऐरावतम् | आवाहयामि | स्थापयामि |
| 14. | ॐ | ओषधिघ्नाय | नमः | ओषधिघ्नम् | आवाहयामि | स्थापयामि |
| 15. | ॐ | बन्धनाय | नमः | बन्धनम् | आवाहयामि | स्थापयामि |
| 16. | ॐ | दिव्यकाय | नमः | दिव्यकम् | आवाहयामि | स्थापयामि |
| 17. | ॐ | कम्बलाय | नमः | कम्बलम् | आवाहयामि | स्थापयामि |
| 18. | ॐ | भीषणाय | नमः | भीषणम् | आवाहयामि | स्थापयामि |
| 19. | ॐ | गवयाय | नमः | गवयम् | आवाहयामि | स्थापयामि |
| 20. | ॐ | घण्टाय | नमः | घण्टम् | आवाहयामि | स्थापयामि |
| 21. | ॐ | व्यालाय | नमः | व्यालम् | आवाहयामि | स्थापयामि |
| 22. | ॐ | अणवे | नमः | अणुम् | आवाहयामि | स्थापयामि |
| 23. | ॐ | चन्द्रवारुणाय | नमः | चन्द्रवारुणम् | आवाहयामि | स्थापयामि |
| 24. | ॐ | घटाटोपाय | नमः | घटाटोपम् | आवाहयामि | स्थापयामि |
| 25. | ॐ | जटालाय | नमः | जटालम् | आवाहयामि | स्थापयामि |
| 26. | ॐ | ऋतवे | नमः | ऋतुम् | आवाहयामि | स्थापयामि |
| 27. | ॐ | घण्टेश्वराय | नमः | घण्टेश्वरम् | आवाहयामि | स्थापयामि |
| 28. | ॐ | विटङ्काय | नमः | विटङ्कम् | आवाहयामि | स्थापयामि |
| 29. | ॐ | मणिमानाय | नमः | मणिामानम् | आवाहयामि | स्थापयामि |
| 30. | ॐ | गणबन्धवे | नमः | गणबन्धुम् | आवाहयामि | स्थापयामि |

| | | | | | | |
|---|---|---|---|---|---|---|
| 31. | ॐ | डामराय | नमः | डामरम् | आवाहयामि | स्थापयामि |
| 32. | ॐ | ढुण्ढिकर्णाय | नमः | ढुण्ढिकर्णम् | आवाहयामि | स्थापयामि |
| 33. | ॐ | स्थविराय | नमः | स्थविरम् | आवाहयामि | स्थापयामि |
| 34. | ॐ | दन्तुराय | नमः | दन्तुरम् | आवाहयामि | स्थापयामि |
| 35. | ॐ | धनदाय | नमः | धनदम् | आवाहयामि | स्थापयामि |
| 36. | ॐ | नागकर्णाय | नमः | नागकर्णम् | आवाहयामि | स्थापयामि |
| 37. | ॐ | महाबलाय | नमः | महाबलम् | आवाहयामि | स्थापयामि |
| 38. | ॐ | फेत्काराय | नमः | फेत्कारम् | आवाहयामि | स्थापयामि |
| 39. | ॐ | चीत्काराय | नमः | चीत्कारम् | आवाहयामि | स्थापयामि |
| 40. | ॐ | सिंहाय | नमः | सिंहम् | आवाहयामि | स्थापयामि |
| 41. | ॐ | मृगाय | नमः | मृगम् | आवाहयामि | स्थापयामि |
| 42. | ॐ | यक्षाय | नमः | यक्षम् | आवाहयामि | स्थापयामि |
| 43. | ॐ | मेघवाहनाय | नमः | मेघवाहनम् | आवाहयामि | स्थापयामि |
| 44. | ॐ | तीक्ष्णोष्ठाय | नमः | तीक्ष्णोष्ठम् | आवाहयामि | स्थापयामि |
| 45. | ॐ | अनलाय | नमः | अनलम् | आवाहयामि | स्थापयामि |
| 46. | ॐ | शुक्लतुण्डाय | नमः | शुक्लतुण्डम् | आवाहयामि | स्थापयामि |
| 47. | ॐ | सुधालापाय | नमः | सुधालापम् | आवाहयामि | स्थापयामि |
| 48. | ॐ | बर्बरकाय | नमः | बर्बरकम् | आवाहयामि | स्थापयामि |
| 49. | ॐ | पवनाय | नमः | पवनम् | आवाहयामि | स्थापयामि |
| 50. | ॐ | पावनाय | नमः | पावनम् | आवाहयामि | स्थापयामि |
| 51. | ॐ | क्षेत्रपालाय | नमः | क्षेत्रपालम् | आवाहयामि | स्थापयामि |

**ॐ मनोजूतिर्जुषतामाज्यस्यबृहस्पतिर्य्यज्ञमिमन्तनोत्वरिष्टँयज्ञꣳ समिमन्दधातु।**

**व्विश्वेदेवासऽइह मादयन्तामोरइँप्रतिष्ठ॥ ( शु.यजु.13-02 )**

इति प्रतिष्ठाप्य '**ॐ अजरादि-एकपञ्चाशत् क्षेत्रपालदेवताभ्यो नमः**' इति यथोपचारैः सम्पूजयेत्। पायसबलिदानादि पूर्ववत्॥

प्रार्थना -

**यं यं यं यक्षरूपं दश दिशि वदनं भूमिकम्पायमानं**

**सं सं संहारमूर्तिं शिरमुकुटजटाशेखरं चन्द्रबिम्बम्।**

दं दं दं दीर्घकेशं विकृतनखमुखं चोर्ध्व-रेखाकपालं

पं पं पं पापनाशं प्रणतपशुपतिं भैरवं क्षेत्रपालम्॥

**शब्दार्थाः** - **दन्तुरः** उन्नतदन्तयुक्तः, **भीषणः** भयङ्करः, **ढुण्ढिकर्णः** गणपतिसमकर्णः, **पावनः** पवित्रः, **क्षेत्रपालः** क्षेत्ररक्षकः, **वायव्यकोणे** पश्चिमोत्तरयोः मध्ये, **वरुणः** जलाधिपतिः, **अजरः** देवता, **पावनः** पवित्रः।

## स्वाध्यायः

**1. प्रदत्तविकल्पेभ्यः योग्यविकल्पं चित्वा उत्तरं यच्छत।**

(1) क्षेत्रपालानां नामानि कति ?

(क) 66 (ख) 64 (ग) 55 (घ) 77

(2) भैरवध्यान (वैदिक) मन्त्रः कः ?

(क) मठीद्यौः (ख) नहिस्पशम् (ग) योगे योगे (घ) आयङगौः

(3) इन्द्रमूर्ति क्षेत्रपालः कस्मिन् क्रमे आगच्छति ?

(क) 3 (ख) 4 (ग) 7 (घ) 9

(4) बलिदाने कः पदार्थः देयः।

(क) यनसं (ख) कूष्माण्ड (ग) कहलीफलम् (घ) गोधूमः

**2. निम्नलिखितानाम् उत्तरं लिखत।**

(1) पञ्चक्षेत्रपालानां क्रमशः नामानि लिखत ?

(2) लीलाकाय.... इत्यारभ्य क्रमशः दश नामानि लिखत ?

(3) तीक्ष्णोष्ठ.... इत्यारभ्य क्रमशः दश नामानि लिखत ?

(4) क्षेत्रपालस्य वेदोक्त-मन्त्रं लिखत ?

(5) यं यं यं यक्ष... इति श्लोकपूर्तिं कुरुत ?

**शिक्षक-प्रवृत्तिः**

शिक्षकः पुराणगताः लोकगताः च क्षेत्रपालदेवतानां कथाः छात्रेभ्यः कथयेत्।

**छात्रप्रवृत्तिः**

छात्राः क्षेत्रपालदेवतानां नाम्नाम् अर्थविषये चर्चां कुर्युः।

**सूक्तिः - करकलितकपालः कुण्डलीदण्डपाणिः,**
**तरुणतिमिरनीलव्यालयज्ञोपवीतती।**
**क्रतुसमयसपर्याविघ्नविच्छेदहेतुः**
**जयति बटुकनाथः सिद्धिदः साधकानाम्॥**

# 5. विष्णोस्त्रिंशोपचारपूजा

**प्रस्तावना**

अस्माकं भारतीय संस्कृतौ देवपूजायाः बहुमाहात्म्यं वर्तते। इयं परंपरा द्राविडैः स्थापिता प्रचारिता चासीत्।

प्रकृतिं प्रति अस्माकं कृतार्थभावस्य समर्पणरूपा इयं पूजा।

तत्रापि पूजायाः बहवः प्रकाराः सन्ति। यथा मानसोपचारपूजा, एकोपचारपूजा, पञ्चोपचारपूजा इत्यादयः।

तथैव भगवतः विष्णोः विशेषाराधनाय 'त्रिंशोपचारपूजा' वर्तते। अत्र भगवतः त्रिंशत् उपचारैः विशिष्टा पूजा क्रियते। पाठेऽस्मिन् भगवतः विष्णोराराधनाय पूजेयं पठामः॥

---

**॥ अथ विष्णोस्त्रिंशोपचारपूजा ॥**

**अथ सङ्कल्पः-**

**हस्ते जलमापदाय**

ॐ अत्राद्य महामाङ्गल्य-फलप्रदमासोत्तमे मासे... मम सर्वाभीष्टप्राप्त्यर्थं सर्वसौख्यप्राप्त्यर्थम्

अस्मिन् अनुष्ठानकर्मणि **विष्णोस्त्रिंशोपचारपूजनम्** अहं करिष्ये।

विष्णोः त्रिंशोपचारपूजनावसरे सर्वप्रथमं ध्यानम्।

**ध्यानम्** - (यजमानः हस्ते गन्धाक्षतपुष्पं गृहीत्वा)

**मन्त्रः** - **ॐ इदं विष्णुर्विचक्रमे त्रेधानिदधे पदम्। समूढमस्यपाँ ᳲ, सुरे स्वाहा॥**

**श्लोकः** - **सुरकदम्बकैः प्रश्रयेण वै, नियतसेवितं गोकुलोत्सवम्।**

**किरिटकुण्डलं पीतजाम्बरं, खलनिषूदनं कृष्णमाह्वये ॥1॥**

ॐ भूर्भुवः स्वः महाविष्णवे नमः **ध्यानं** समर्पयामि।

**आवाहनम्** - (यजमानः हस्ते अक्षतान् गृहीत्वा)

**मन्त्रः** - **ॐ सहस्त्रशीर्षा पुरुषः सहस्त्राक्षः सहस्त्रपात्। सभूमि ᳲ सर्व्वतस्पृत्वात्यतिष्ठद्दशाङ्गुलम्॥**

**श्लोकः** - **खगपवाहनं क्षीरजाप्रियं, भवभयापहं भुक्तिमुक्तिदम्।**

**सुरपतिं जगन्नाथमीश्वरं, कमलभासमावाहयाम्यहम्॥ 2॥** ॐ भूर्भुवः...0**आवाहनं** सम...0।

**आसनम्** - (यजमानः हस्ते पुष्पासनं गृहीत्वा)

**मन्त्रः** - **ॐ पुरुष एवेदᳲ सर्व्वंय्यद्भूतँयच्च भाव्यम्। उतामृतत्त्वस्येशानो यदन्नेनातिरोहति॥**

**श्लोकः** - **विधिमुखामरैर्नम्रमूर्तिभिः प्रणतसंश्रितं दुर्धरादिमत्।**

**वरमणिप्रभाभासुरं नवं जनपगृह्यतां स्वर्णमासनम्॥3॥** ॐ भूर्भुवः...0**आसनं** सम...0।

**पाद्यम्** - (यजमानः हस्ते **पाद्यपात्रं** गृहीत्वा)

**मन्त्रः** - **ॐ एतावानस्य महिमातो ज्यायाँश्च पूरुषः। पादोस्य विश्वाभूतानित्रिपादस्यामृतन्दिवि॥**

**श्लोकः** - **कुसुमवासितं गन्धविस्तृतं मुनिनिसेवितं सादरेण वै।**

**ध्रुवपराशराभीष्टदप्रभो जनपगृह्यतां पाद्यमुत्तमम्॥4॥** ॐ भूर्भुवः...0**पाद्यं** सम...0।

**अर्घ्यम्** - (यजमानः हस्ते **अर्घ्यपात्रं** गृहीत्वा)

**मन्त्रः** - **ॐ त्रिपादूर्ध्वऽउदैत्पुरुषः पादोस्येहा भवत्पुनः। ततो विष्वङ्व्यत्क्रामसत्साशनानशनेऽभि॥**

**श्लोकः** - **ॐ कनकसंपुटे स्थापितं वरं, जलसुवर्णमुक्ताफलैर्युतम्।**

**करसरोरुहाभ्यां धृतं मया जनप गृह्यतामर्घ्यमुत्तमम् ॥5॥** ॐ भूर्भुवः...0**अर्घ्यं** सम...0।

आचमनीयम् - (यजमानः हस्ते आचमनीयं जलं गृहीत्वा)

**मन्त्रः** - **ॐ ततो विराडजायतविराजोऽअधिपूरुषः। सजातोऽअत्यरिच्यतपश्चाद्भूमिमथो पुरः॥**

**श्लोकः** - **तव रमायुजः सेवनाज्जनाः, नृपतिसन्निभाः संभवन्ति हि।**

**सुरतरङ्गिणी शुद्धवारिभिर्जनपगृह्यतामाचमं शुभम्॥6॥** ॐ भूर्भुवः...0आचमनीयं सम...0।

**पयः स्नानम्** -(यजमानः हस्ते पयः/ पञ्चामृतं वा गृहीत्वा)

**मन्त्रः** - **ॐ पयः पृथिव्याम्पयऽओषधीषुपयोदिव्यन्तरिक्षे पयोधाः। पयस्वतीः प्प्रदिशः सन्तुमह्यम्॥**

**श्लोकः** - **सुरगवुद्भवं वीर्यवर्धकं निखिलदेहिनां जीवनप्रदम्।**

**शशधरप्रभं फेनसंयुतं जनपगृह्यतामर्पितं पयः॥7॥** ॐ भूर्भुवः...0 **पयः स्नानं** सम...0।

**पयः** स्नानान्ते **शुद्धोदक**-स्नानं **शुद्ध-आचमनीयजलं** सम...0।

**दधिस्नानम्** - (यजमानः हस्ते दधि/पञ्चामृतं वा गृहीत्वा)

**मन्त्रः** - **ॐ दधिक्राव्णोऽअकारिषंजिष्णोरश्वस्य वाजिनः। सुरभिनो मुखाकरत्प्रणऽआयुꣳ षितारिषत्।**

**श्लोकः** - **शुचिपयः समुद्भूतमुत्प्रदं व्रजनिवासिभिः स्वादितं शुभम्।**

**रजतसन्निभं शीततामयं जनप गृह्यतामर्पितं दधि॥8॥** ॐ भूर्भुवः...0**दधिस्नानं** सम...0।

**दधिस्नानान्ते शुद्धोदक**-स्नानं **शुद्ध-आचमनीयजलं** सम...0।

**घृतस्नानम्** - (यजमानः हस्ते घृतं/पञ्चामृतं वा गृहीत्वा)

**मन्त्रः** - **ॐ घृतं घृतपावानः पिबतव्वसांव्वसापावानः पिबतान्तरिक्षस्य हविरसि स्वाहा।**

**दिशः प्प्रदिशऽआदिशो विदिश उद्दिशो दिग्भ्यः स्वाहा॥**

**श्लोकः** - **हुतवहप्रियं क्षीरजोद्भवं सकलदेहिनां सत्त्ववर्धकम्।**

**कुमुदसदृशं विष्णुदैवतं जनपगृह्यतामर्पितं घृतम्॥9॥**ॐ भूर्भुवः...0 **घृतस्नानं** सम...0।

घृतस्नानान्ते शुद्धोदक-स्नानं शुद्ध-आचमनीयजलं सम...0।

**मधुस्नानम्** - (यजमानः हस्ते मधु/पञ्चामृतं वा गृहीत्वा)

**मन्त्रः** - **ॐ स्वाहा मरुद्भिः परिश्रीयस्वदिवः। स ७ स्पृशस्पाहि॥ मधु मधु मधु॥**

**श्लोकः** - **मधुलतोद्भवं स्वादु मञ्जुलं मधुपमक्षिकाद्यैर्विनिर्मितम्।**

**मधुरतामयं गन्धसंप्रदं मधुह तेऽर्पितं गृह्यतां मधु॥10॥** ॐ भूर्भुवः...0**मधुस्नानं** सम...0।

मधुस्नानान्ते शुद्धोदक-स्नानं शुद्ध-आचमनीयजलं सम...0।

**शर्करास्नानाम्** - (यजमानः हस्ते शर्करां/पञ्चामृतं वा गृहीत्वा)

**मन्त्रः** - **ॐ अपा ७ रसमुद्वयसः सूर्ये सन्तः समाहितम्। अपा ७ रस्य यो रसस्तन्वो**

**गृह्णाम्युत्तममुपयाम गृहीतोसीन्द्रायत्त्वाजुष्टं गृह्णाम्येषते योनिरिन्द्रयत्त्वाजुष्टतमम्॥**

**श्लोकः** - **मदनकार्मुकाद्याविनिर्मिता मधुरतान्विता सर्वपापहा।**

**सरसतां गता तारकोपमा जनप गृह्यतां शुद्धशर्करा॥ 11॥** ॐ भूर्भुवः...0**शर्करास्नानं** सम...0।

**र्शकरा**स्नानान्ते **शुद्धोदक**-स्नानं **शुद्ध-आचमनीयजलं** सम....0।

उद्वर्तन/अभ्यङ्गस्नानम् - (यजमानः हस्ते उद्वर्तनं गृहीत्वा)

**मन्त्रः** - **अ७शुनाते अ७ शुः पृच्यतां परुषाफ्रू ।**

**गन्धस्ते सोममवतु महाय रसोऽअच्युतः।**

**श्लोक :** - **कदम्बकेतकी पुष्पसंभवं मृगमदान्वितं यंत्रनिर्मितम्।**

**अनुपकारिणी भक्तितो मया जनप गृह्यतां तैलमर्पितम् ॥ 12॥** ॐ भूर्भुवः...0**उद्वर्तनस्नानं** सम...0।

**उद्वर्तन** स्नानान्ते शुद्धोदक-स्नानं **शुद्ध-आचमनीयजलं** सम...0।

**तीर्थोदकस्नानाम्** - (यजमानः हस्ते शुद्धजलं गृहीत्वा)

**मन्त्रः** - **ॐ शुद्धवालः सर्व्वशुद्धवालो मणिवालस्तऽआश्विनाः।**

**श्येतः श्येताक्षोरुणस्ते रुद्राय पशुपतयेकर्ण्णायामाऽअवलिप्तारौद्रानभोरूपाः पार्ज्जन्याः॥**

**श्लोकः** - **हरिपदाम्बुजानर्मदामही-सरयुचन्द्र भागाभ्यआहृतम्।**

**जलजवासितं स्नानहेतवे जनपगृह्यतामर्पितं जलम्॥13॥** ॐ भूर्भुवः...0**तीर्थोदकस्नानां** सम...0।

**तीर्थोदक**स्नानान्ते **शुद्धोदक**-स्नानं **शुद्ध-आचमनीयजलं** सम....0।

**वस्त्रम्** - (यजमानः हस्ते वस्त्रं गृहीत्वा)

**मन्त्रः** - **ॐ सुजातो ज्योतिषा सह शर्म्म व्वरूथमासदत्त्सवः।**

**व्वासोऽअग्ग्ने विश्वरूप ७ सँव्व्यस्य व्विभावसो।**

**श्लोकः** - **विविधतन्तुभिर्गुम्फितं नवं सुतपनीयभं सोत्तरीयकम्।**

**मधुरिपो जगन्नाथ माधव जनप गृह्यतां वस्त्रमर्पितम्॥14॥** ॐ भूर्भुवः...0**वस्त्रं** सम...0।

वस्त्रान्ते शुद्ध-आचमनीयजलं सम...0।

**यज्ञोपवीतम्** - (यजमानः हस्ते यज्ञोपवीतं गृहीत्वा)

**मन्त्रः** - **ॐ यज्ञो देवानाम्प्रत्येति सुम्नमादित्यासो भवता मृडयन्तः।**

**आवोर्व्वाची सुमतिर्व्ववृत्याद ँ् होश्चिद्या वरिवो व्वित्तरा सदादित्येब्भ्यस्त्वा॥**

**श्लोकः** - **त्रिगुणितं सितैरर्कतन्तुभिः कृतमिदं मया शुद्धचेतसा।**

**निगमसम्मतं बन्धमोचकं जनप गृह्यतामुपवीतकम्॥ 15॥** ॐ भूर्भुवः...0 **यज्ञोपवीतं** सम...0।

यज्ञोपवीतान्ते **शुद्ध-आचमनीयजलं** सम...0।

**गन्धः** - (यजमानः हस्ते गन्धं गृहीत्वा)

**मन्त्रः** - **ॐ त्वाड्गन्धर्व्वाऽअखनँस्त्वामिन्द्रस्त्वां बृहस्पतिः।**

**त्वामोषधे सोमो राजा विद्द्वान्यक्ष्मादमुच्च्यत॥**

**श्लोकः** - **मलयसंभवं पीतवर्णकं मृगमदादिभिर्वासितं वरम्।**

**मुदितषट्पदं कुंकुमान्वितं जनप गृह्यतां गन्धमर्पितम्॥ 16॥** ॐ भूर्भुवः...0 **गन्धं** सम...0।

**अक्षताः** - (यजमानः हस्ते **अक्षतान्** गृहीत्वा)

**मन्त्रः** - **ॐ अक्षन्नमीमदन्तह्यवप्प्रियाऽअधूषत।**

**अस्तोषस्वभानवोव्विप्प्रानविष्ठयामतीयोयान्विन्द्रते हरी॥**

**श्लोकः** - **कलमसंभवा मौक्तिकोपमास्त्रिपथगोदकैः क्षालिताः शिवाः।**

**अगरुकुंकुमैर्मिश्रिता वरा जनप गृह्यतामर्पिताक्षताः ॥17॥** ॐ भूर्भुवः...0 **अक्षतान्** सम...0।

**पुष्पमालिका/पुषणि** - (यजमानः हस्ते पुष्पमालिकां गृहीत्वा)

**मन्त्रः** - **ॐ ओषधीःप्प्रतिमोदद्ध्वंपुष्पवतीः प्प्रसूवरीः। अश्श्वाऽइवसजित्वरीव्वीरुधः पारयिष्ण्वः॥**

**श्लोकः** - **तरुणमल्लिका-कुंदमालती-बकुलपङ्कजानां समुच्चयैः।**

**सततसूत्रितं भक्तितो मया जनप गृह्यतां हारमर्पितम्॥18॥** ॐ भूर्भुवः...0 **पुष्पमालिकां** सम...0।

**श्वेतचूर्णम्** - (यजमानः हस्ते श्वेतचूर्णं गृहीत्वा)

**मन्त्रः** - **ॐ अहिरिवभोगैः पर्व्येति बाहुञ्ज्यायाहेतिम्परिबाधमानः।**

**हस्तग्घ्नो व्विश्श्वाव्वयुनानिव्विद्वान्पुमान्पुमा ऽ सम्परिपातु व्विश्वतः॥**

**श्लोकः** - **कदंबकेतकीवृक्षसंभवं विविधसौख्यदं कांतिवर्धनम्।**

**सितकरोपमं स्नेहसत्कृतं जनप गृह्यतां श्वेतचूर्णकम्॥ 19॥** ॐ भूर्भुवः...0 **श्वेतचूर्णं** सम...0।

**रक्तचूर्णम्** - (यजमानः हस्ते रक्तचूर्ण गृहीत्वा)

**मन्त्रः** - **ॐ गन्धर्व्वस्त्वाव्विश्श्वावसुः परिदधातुव्विश्वस्यारिष्ट्यै यजमानस्य परिधिरस्यग्ग्निरिडऽईडितः॥**

**श्लोकः** - **अमराजादिभिर्देववृन्दकैः शिरसि वै धृतं प्रश्रयेण वै।**

**तपनसदृशं दृष्टिमुत्कलं जनप गृह्यतां रक्तचूर्णकम्॥20॥** ॐ भूर्भुवः...0 **रक्तचूर्णं** सम...0।

**सिंदूरम्** – (यजमानः हस्ते सिंदूरं गृहीत्वा)

**मन्त्रः** – **ॐ सिन्धोरिवप्प्राध्वनेशूघनासोव्वातप्प्रमियः पतयन्तियह्व्वाः॥**

**घृतस्य धाराऽअरुषोनव्वाजीकाष्ठाभिन्दन्नूर्मिभिः पिन्नवमानः॥**

**श्लोक :** – **गणपतिप्रियं बालसूर्यभं पवनसूनुना स्वीकृतं सदा।**

**सुरभिवासितं सूक्ष्मचूर्णकं जनप गृह्यतां नागसंभवम्॥ 21॥**ॐ भूर्भुवः...0**सिंदूरं** सम...0।

**धूपः** – (यजमानः हस्ते धूपं गृहीत्वा, घण्टानादं कुर्यात्)

**मन्त्रः** – **ॐ ब्राह्मणोस्यमुखमासीद्बाहूराजन्यः कृतः। ऊरूतदस्ययद्वैश्यः पद्भ्याꣳशूद्रोऽअजायत॥**

**श्लोकः** – **अगुरुगुग्गुलाज्यादिमिश्रितं तपनयोगजोद्भूतसौरभम्।**

**अमरवृन्दकैः स्नेहसत्कृतं जनप गृह्यतां धूपमुत्तमम्।॥22॥** ॐ भूर्भुवः...0**धूपं** सम...0।

**दीपम्** – (यजमानः स्थाल्यां पात्रे वा **दीपं** गृहीत्वा)

**मन्त्रः** – **ॐ चन्द्रमामनसोजातश्चक्षोः सूर्य्योऽअजायत। श्रोत्राद्वायुश्चप्प्राणश्चमुखादग्निरजायत॥**

**श्लोकः** – **अनलतैलिनी गोघृतान्वितं तिमिरनाशकं दीप्ततन्तुभिः।**

**कनकभाजने स्थापितं मया जनप गृह्यतां दीपमुत्तमम्।॥23॥** ॐ भूर्भुवः...0**दीपं** सम...0।

**नैवेद्यम्** – (यजमानः स्थाल्यां पात्रे वा **नैवेद्यं** गृहीत्वा, **नैवेद्यं देवसमीपे** निधाय जलेन प्रोक्षयेत्)

**मन्त्रः** – **ॐ नाभ्याऽआसीदन्तरिक्षꣳ शीर्ष्णोद्यौः समवर्त्तत।**

**पद्भ्याम्भूमिर्द्दिशः श्रोत्रात्तथाल्लोकाँऽअकल्पयन्॥**

**श्लोकः** – **पनसदाडिमाम्रादि-सत्फलं-सुघृत-मोदकापूप-पायसम्।**

**रजतभाजने स्थापितं मया जनप गृह्यतां खाद्यमुत्तमम्।॥24॥** ॐ भूर्भुवः...0**नैवेद्यं** सम...0।

**आचमनीयम्** – (यजमानः हस्ते **शुद्धोदकं** गृहीत्वा)

**मन्त्रः** – **ॐ त्रिपादूर्ध्वऽउदैत्पुरुषः पादोस्येहा भवत्पुनः। ततो व्विष्वंङ्व्यक्रामत्साशनानशनेऽअभि॥**

**श्लोकः** – **जलधिगोद्भवं शीततामयं सकलप्राणिनां प्राणदायकम्।**

**विधिसमर्पितं शुद्धचेतसा जनप गृह्यतामाचमं शुभम्।॥25॥** ॐ भूर्भुवः...0**आचमनीयं** सम...0।

**ताम्बूलम्** – (यजमानः हस्ते एलादिताम्बूलं गृहीत्वा)

**मन्त्रः** – **ॐ उतस्म्मास्यद्द्रवतस्त्तुरण्यतः पर्ण्णन्नवेरनुव्वातिप्प्रगर्धिनः।**

**श्येनस्येवध्रजतोऽअङ्कसम्परिदधिक्राव्णः सहोर्ज्जातरित्रतः स्वाहा॥**

**श्लोकः** – **खपुरसंभवं पूगचूर्णयुग् मृगमदेलुका वासितं वरम्।**

**फणितलतादलैः क्लप्तवीडकं जनप गृह्यतामास्य भूषणम्॥ 26॥** ॐ भूर्भुवः...0**ताम्बूलं** सम...0।

दक्षिणाः – (यजमानः हस्ते लौकिकद्रव्यं गृहीत्वा)

**मन्त्रः** - **ॐ हिरण्यगर्ब्भः समवर्त्तताग्रे भूतस्य जातः पतिरेक आसीत्।**

**सदाधारपृथिवीन्द्यामुतेमाङ्कस्मैदेवायहविषाव्विधेम॥**

**श्लोकः** - **निखिलयाचिनां श्रेष्ठभोगदा निगमसम्मता कर्मपूर्णदा।**

**सकलभूजनैः वांछिता सदा जनप गृह्यतां हेमदक्षिणा॥ 27॥** ॐ भूर्भुवः...0 **हेमदक्षिणां** सम...0।

**आरार्तिक्यम्/नीराजनम्** - (यजमानः हस्ते आरार्तिक्यम् गृहीत्वा)

**मन्त्रः** - **ॐ इदꣳ हविः प्प्रजननंमेऽअस्तुदशव्वीरꣳसर्व्वगणꣳस्वस्तये। आत्म्मशनिप्प्रजासनि पशुसनिलोकसन्न्यभयसनि॥ अग्ग्निः प्प्रजाम्बहुलाम्मे करोत्त्वन्नं पयोरेतोऽअस्म्मासुधत्त॥**

**श्लोकः** - **हुतवहप्रियैर्मिश्रितं वरं जलधिजैर्युतं सर्वपापहम्।**

**मुखविलोकनार्थाय संत्कृतं जनप गृह्यतामार्तिकं शुभम्॥28॥** ॐ भूर्भुवः...0**नीराजनं** सम...0।

**प्रदक्षिणा** - (यजमानः **हस्तभ्यां प्रदक्षिणां** कुर्यात्)

**मन्त्रः** - **ॐ सप्प्तास्यासन्न्परिधयस्त्रिः सप्तसमिधः कृताः।**

**देवायद्द्यज्ञन्तन्न्वानाऽअबद्ध्नन्न्पुरुषं पशुम्॥**

**श्लोकः** - **वरदसंचितं पूर्वजन्मभिर्दहति किल्बिषं त्वत्प्रदक्षिणा।**

**नरहरिं मुदा शुद्धचेतसा सततमीश्वरं त्वां नमाम्यहम्॥29॥** ॐ भूर्भुवः...0 **प्रदक्षिणां** सम...0।

**नमस्कारः** - (यजमानः हस्ताभ्यां नमस्कारान् कुर्यात्)

**मन्त्रः** - **ॐ व्विष्णोः कर्म्माणिपश्यतयतोव्व्रतानिपस्पशे। इन्द्रस्ययुज्ज्यः सखा॥**

**श्लोकः** - **जय जय प्रभो सात्वतां पते शरणवत्सलाभीष्टसाधक।**

**यदुपते जगन्नाथ शरणमागतं पाहि पाहि माम् ॥30॥** ॐ भूर्भुवः...0 **नमस्कारान्** सम...0।

**शब्दार्थाः**

**प्रश्रयेण** विनयेन **कनकसंपुटे** सुवर्णपात्रे **सुरगवुद्भवम्** कामधेन्त्पन्नम् **मंजुलम्** सुन्दरम् **समुच्चयैः** समूहैः **तपनसदृशम्** अग्निसदृशम् **पवनसूनुना** हनुमता **तिमिरनाशकम्** अन्धकारनाशकम् **सञ्चितम्** संगृहीतम् **किल्बिषम्** पापम्।

**स्वाध्यायः**

1. **प्रदत्तविकल्पेभ्यः योग्यविकल्पं चित्वा उत्तरं यच्छत।**

(1) **'खपुरसंभवं पूगचूर्णयुग्'** इति श्लोकोऽयं कस्मै उपचाराय भवति?

(क) ताम्बूलाय (ख) प्रदक्षिणायै (ग) धूपाय (घ) दीपाय

(2) दक्षिणायै कः श्लोकः?

(क) हुतवहप्रियैः (ख) निखिलयाचिनाम् (ग) विविधतन्तुभिः (घ) कदंबकेतकी

(3) 'हरिपदाम्बुजा' इति श्लोकोऽयं कस्मै उपचाराय उपयुज्यते?

(क) स्नानाय (ख) गन्धाय (ग) पुष्पाय (घ) सिंदूराय

(4) घृतस्नानाय कः श्लोकः?

(क) हुतवहप्रियम् (ख) मधुलतोद्भवम् (ग) अनलतैलिनी (घ) घृतवहप्रियम्

**2. निम्नलिखत-प्रश्नामुत्तराणि लिखत।**

(1) नमस्कार-उपचारस्य श्लोकं लिखत?

(2) ध्यान-उपचाराय कः श्लोक उपयुज्यते?

(3) आसन-उपचारस्य श्लोकं लिखत?

(4) पयस्नान-उपचाराय कः श्लोक उपयुज्यते?

(5) दधिस्नान-उपचारस्य श्लोकं लिखत?

(6) अर्घप्रदान-उपचाराय कः श्लोक उपयुज्यते?

**3. त्रिंशोपचार-श्लोकेभ्यः अधोदत्तानां श्लोकानां पूर्ति कुरुत।**

(1) तव रमायुजः...आचमं शुभम् (2) सुरगवुद्भवं....अर्पितं पयः (3) जय जय प्रभो...पाहि पाहि माम्

| **शिक्षक-प्रवृत्तिः** |
| --- |
| शिक्षकाः विष्णोस्त्रिंशोपचार-पूजनमिदं प्रायोगिकं कारयेयुः। |
| **छात्रप्रवृत्तिः** |
| विविधरागैश्छात्राः विष्णोस्त्रिंशोपचार-श्लोकान् गातुं प्रयतेरन्। |

**सूक्तिः** - सर्वं विष्णुमयं जगत्।

●

| 6. | # पात्रासादनम् |
|---|---|

**प्रस्तावना**

पात्राणामासादनमिति पात्रासादनम्। पात्राणि पूजायै आवश्यकसंभारस्थापनाय वस्तूनि आसादयन्ते हस्तसुप्राप्तानि विधीयन्ते यस्मिन् सः पात्रासादनप्रयोगः।

श्रूयते यः श्रीविद्यादीक्षितः कृतानुष्ठानश्च भवति, स एव पात्रासादनं कारयितुमधिकारं प्राप्नोति। प्रयोगेऽस्मिन् यन्त्रतन्त्रमन्त्राणां समन्वयो भवति। इमानि पात्राणि साक्षात् देवीरूपाणि सन्ति। अतः इमानि पात्राणि साधारणानि। यदा पात्रासादनं भवति तदनन्तरमेव देव्याः राजोपचारपूजनं भवति।

---

पात्राणि पूजायै आवश्यकसंभारस्थापनाय वस्तूनि आसाद्यन्ते हस्तसुलभानि क्रियन्ते यस्मिन् प्रयोगे सः पात्रासादनप्रयोग इति कथ्यते।

**॥ अथ पात्रासादन-प्रयोगः ॥**

पात्रासादने अष्टापात्राणाम् आवाहनम् पूजनञ्च भवति।

1. कलशपात्रम्
2. सामान्यार्घपात्रम्
3. विशेषार्घपात्रम्
4. पाद्यपात्रम्
5. अर्घ्यपात्रम्
6. आचमनीयपात्रम्
7. मधुपर्कपात्रम्
8. प्रोक्षणीपात्रम्




**1. तत्रादौ कलशः**

स्ववामभागे बिन्दुत्रिकोणषट्कोणचतुरस्रात्मकं यन्त्रं विलिख्य अक्षतैः पूजयेत्॥

- **कलशयन्त्रम्**




मध्ये मूलम् – ॐ ऐं ह्रीं क्लीं चामुण्डायै विच्चे नमः॥

**त्रिकोणे त्रिपदैः**- 1. ऐं ह्रीं क्लीं 2. चामुण्डायै 3. विच्चे नमः




**एवं द्विवारावृत्यषट्कोणे**




**मातृकयावृत्तम्** - **अं आं इं ईं उं ऊं ऋं ॠं लृं लॄं एं ऐं ओं औं अं अः कं खं गं घं ङं चं छं जं झं ञं टं ठं डं ढं णं तं थं दं धं नं पं फं बं भं मं यं वं रं लं शं षं सं हं ळं क्षं इति**



**चतुरस्त्रे षडङ्गानि** -

आग्नेये - ऐं हृदयाय नमः। ऐशाने - ह्रीं शिरसे स्वाहा ।

नैर्ऋत्ये - क्लीं शिखायै वषट्। वायव्ये - चामुण्डायै कवचाय हुम् ।

मध्ये - विच्चे नेत्रत्रयाय वौषट्। चतुर्दिक्षु - ॐ ऐं ह्रीं क्लीं चामुण्डायै विच्चे नमः अस्त्राय फट् ॥




इति यन्त्रं संपूज्य हुमिति आधारं प्रक्षाल्य। ॐ ऐं ह्रीं क्लीं चामुण्डायै विच्चे नमः इति मूलेन-संस्थाप्य।

ॐ मं वह्निमण्डलाय दशकलात्मने श्रीत्रिगुणात्मिकादुर्गादेवताकलशपात्राधाराय नमः इति संपूज्य दशकलाः पूजयेत्।

ॐ यं धूम्रार्चिषे नमः। ॐ रं ऊष्मायै नमः। ॐ लं ज्वलिन्यै नमः।

ॐ वं ज्वालिन्यै नमः। ॐ शं विस्फुलिङ्गिन्यै नमः। ॐ षं सुश्रियै नमः।

ॐ सं सुरूपायै नमः। ॐ हं कपिलायै नमः। ॐ लं हव्यवाहायै नमः।

ॐ क्षं कव्यवाहायै नमः।

इति संपूज्य हुं इति पात्रं प्रक्षाल्य ॐ ऐं ह्रीं क्लीं चामुण्डायै विच्चे नमः इति मूलेन संस्थाप्य। सूर्यमण्डलाय द्वादशकलात्मने श्रीत्रिगुणात्मिकादुर्गादेवता-कलशपात्राय नमः इति संपूज्य द्वादशकलाः पूजयेत्।

ॐ कं भं तपिन्यै नमः। ॐ खं बं तापिन्यै नमः। ॐ गं फं धूम्रायै नमः।

ॐ घं पं मरिच्यै नमः। ॐ ङं नं ज्वालिन्यै नमः। ॐ चं धं रुच्यै नमः।

ॐ छं दं सुषुम्णायै नमः। ॐ जं थं भोगदायै नमः। ॐ झं तं विश्वायै नमः।

ॐ ञं णं बोधिन्यै नमः। ॐ टं ढं धारिण्यै नमः। ॐ ठं डं क्षमायै नमः। इति संपूज्य॥

तत्र विलोममातृकया शुद्धजलमापूरयेत्।तद्यथा-ॐ क्षं ळं हं सं षं शं वं लं रं यं मं भं बं फं पं नं धं दं थं तं णं ढं डं ठं टं ञं झं जं छं चं ङं घं गं खं कं अः अं औं ओं ऐं एं ॡं ऌं ॠं ऋं ऊं उं ईं इं आं अं॥

गालिनीमुद्रया निरीक्ष्य ( करद्वयोङ्गुष्ठतर्जनीसंयोगात्मिकया )

षोडशकलात्मने चंद्रमण्डलाय श्रीत्रिगुणात्मिकादुर्गादेवताकलशामृताय नमः इति संपूज्य षोडशकलाः पूजयेत्।

| | | | |
|---|---|---|---|
| अं अमृतायै नमः | आं मानदायै नमः | इं पूषायै नमः | ईं पुष्ट्यै नमः |
| उं तुष्ट्यै नमः | ऊं रत्यै नमः | ऋं धृत्यै नमः | ॠं शशिन्यै नमः |
| ऌं चंद्रिकायै नमः | ॡं कान्त्यै नमः | एं ज्योत्स्नायै नमः | ऐं श्रियै नमः |
| ओं प्रीत्यै नमः | औं अंगदायै नमः | अं पूर्णायै नमः | अः पूर्णामृतायै नमः |

इति संपूज्य फडिति संरक्ष्य ॐ ऐं ह्रीं क्लीं चामुण्डायै विच्चे नमः इति मूलेन देवीमावाह्य आवाहनादि-दशमुद्राः प्रदर्शयेत्। तद्यथा -

ॐ ऐं ह्रीं क्लीं चामुण्डायै विच्चे नमः - आवाहिता भव

ॐ ऐं ह्रीं क्लीं चामुण्डायै विच्चे नमः - स्थापिता भव

ॐ ऐं ह्रीं क्लीं चामुण्डायै विच्चे नमः - संनिहिता भव

ॐ ऐं ह्रीं क्लीं चामुण्डायै विच्चे नमः - सन्निरुद्धा भव

ॐ ऐं ह्रीं क्लीं चामुण्डायै विच्चे नमः - संमुखीकृता भव

**ॐ ऐं ह्रीं क्लीं चामुण्डायै विच्चे नमः - षडङ्गेन सकलीकृता भव**

**ॐ ऐं ह्रीं क्लीं चामुण्डायै विच्चे नमः - हृदयेत्यादि अवगुण्ठिता भव**

**ॐ ऐं ह्रीं क्लीं चामुण्डायै विच्चे नमः - अमृतीकृता भव**

**ॐ ऐं ह्रीं क्लीं चामुण्डायै विच्चे नमः - परमीकृता भव**

**ॐ ऐं ह्रीं क्लीं चामुण्डायै विच्चे नमः - प्रार्थिता भव**

**ॐ ऐं ह्रीं क्लीं चामुण्डायै विच्चे नमः इति योनिमुद्रां प्रदर्श्य, ॐ ऐं ह्रीं क्लीं चामुण्डायै विच्चे नमः इति मूलेन संपूज्य मत्स्यमुद्रया आच्छाद्य ॐ ऐं ह्रीं क्लीं चामुण्डायै विच्चे नमः इति मूलेन अष्टवारम् अभिमन्त्र्य धेनुमुद्रां योनिमुद्रां च प्रदर्शयेत्।**

**सामान्यार्घः - बिन्दुत्रिकोणवृत्तचतुरस्रं यन्त्रं विलिख्य।**




**मध्येमूलम् - ॐ ऐं ह्रीं क्लीं चामुण्डायै विच्चे नमः।**

**त्रिकोणेत्रिपदैः - ॐ ऐं ह्रीं क्लीं चामुण्डायै विच्चे नमः।**

**मातृकयावृत्तम्** - अं आं इं ईं उं ऊं ऋं ॠं लृं लॄं एं ऐं ओं औं अं अः कं खं गं घं ङंचं छं जं झं ञं टं ठं डं ढं णं तं थं दं धं नं पं फं बं भं मं यं वं रं लं शं षं सं हं ळं क्षं इति।

- चतुरस्रे षडङ्गानि -

आग्नेये - ऐं हृदयाय नमः। ऐशाने - ह्रीं शिरसे स्वाहा।

नैर्ॠत्ये - क्लीं शिखायै वषट्। वायव्ये - चामुण्डायै कवचाय हुम्।

मध्ये - विच्चे नेत्रत्रयाय वौषट्। चतुर्दिक्षु - ॐ ऐं ह्रीं क्लीं चामुण्डायै विच्चे नमः अस्त्राय फट्॥

फडिति आधारं प्रक्षाल्य। ॐ ऐं ह्रीं क्लीं चामुण्डायै विच्चे नमः मूलेन संस्थाप्य।

ॐ मं वह्निमण्डलाय दशकलात्मने श्रीत्रिगुणात्मिकादुर्गादेवताकलशपात्राधाराय नमः इति संपूज्य दशकलाः पूजयते।

अं यं धूमार्चिषे नमः ॐ रं ऊष्मायै नमः ॐ लं ज्वलिन्यै नमः।

ॐ वं ज्वालिन्यै नमः ॐ शं विस्फुलिङ्गिन्यै नमः ॐ षं सुश्रियै नमः।

ॐ सं सुरूपायै नमः ॐ हं कपिलायै नमः ॐ लं हव्यवाहायै नमः।

ॐ कव्यवाहायै नमः।

इति संपूज्य हुं इति पात्रं प्रक्षाल्य ॐ ऐं ह्रीं क्लीं चामुण्डायै विच्चे नमः इति मूलेन संस्थाप्य। सूर्यमण्डलाय द्वादशकलात्मने श्रीत्रिगुणात्मिकादुर्गादेवता कलशपात्राय नमः इति द्वादशकलाः पूजयेत्।

ॐ कं भं तपिन्यै नमः ॐ शं बं तापिन्यै नमः ॐ गं फं धूम्रायै नमः।

ॐ घं पं मरिच्यै नमः ॐ ङं नं ज्वालिन्यै नमः ॐ चं धं रुच्यै नमः।

ॐ छं दं सुषुम्णायै नमः ॐ जं थं भोगदायै नमः ॐ झं तं विश्वायै नमः।

ॐ ञं णं बोधिन्यै नमः ॐ टं ढं धारिण्यै नमः ॐ ठं डं क्षमायै नमः। इति संपूज्य॥

ॐ ऐं ह्रीं क्लीं चामुण्डायै विच्चे नमः इति मूलेन शुद्धजलमापूर्य गालिनीमुद्रया निरीक्ष्य चंद्रमण्डलाय षोडशकलात्मने श्रीदुर्गादेवतासामान्यर्घपात्रामृताय नमः इति संपूज्य षोडशकलाः पूजयत्।

अं अमृतायै नमः आं मानदायै नमः इं पूषायै नमः ईं पुष्ट्यै नमः

उं तुष्ट्यै नमः ऊं रत्यै नमः ऋं धृत्यै नमः ॠं शशिन्यै नमः

लृं चंद्रिकायै नमः ॡं कान्त्यै नमः एं ज्योत्स्नायै नमः ऐं श्रियै नमः

ओं प्रीत्यै नमः औं अंगदायै नमः अं पूर्णायै नमः अः पूर्णामृतायै नमः

इति संपूज्य फडिति संरक्ष्य ॐ ऐं ह्रीं क्लीं चामुण्डायै विच्चे नमः इति मूलेन देवीमावाह्य आवाहनादि दशमुद्राः प्रदर्शयेत्।

अत्र हि छात्राणां सुखबोधाय **आवाहनादि-दशमुद्राणां** चित्रं प्रदीयते।




**गालिनी-मुद्रा**



तद्यथा –

ॐ ऐं ह्रीं क्लीं चामुण्डायै विच्चे नमः – आवाहिता भव

ॐ ऐं ह्रीं क्लीं चामुण्डायै विच्चे नमः – स्थापिता भव

ॐ ऐं ह्रीं क्लीं चामुण्डायै विच्चे नमः – संनिहिता भव

ॐ ऐं ह्रीं क्लीं चामुण्डायै विच्चे नमः – सन्निरुद्धा भव

ॐ ऐं ह्रीं क्लीं चामुण्डायै विच्चे नमः – संमुखीकृता भव

ॐ ऐं ह्रीं क्लीं चामुण्डायै विच्चे नमः – षडङ्गेन सकलीकृता भव

ॐ ऐं ह्रीं क्लीं चामुण्डायै विच्चे नमः – हृदयेत्यादि अवगुण्ठिता भव

ॐ ऐं ह्रीं क्लीं चामुण्डायै विच्चे नमः – अमृतीकृता भव

ॐ ऐं ह्रीं क्लीं चामुण्डायै विच्चे नमः – परमीकृता भव

ॐ ऐं ह्रीं क्लीं चामुण्डायै विच्चे नमः – प्रार्थिता भव

ॐ ऐं ह्रीं क्लीं चामुण्डायै विच्चे नमः – इति योनिमुद्रां प्रदर्श्य, ॐ ऐं ह्रीं क्लीं चामुण्डायै विच्चे नमः इति मूलेन संपूज्य मत्स्यमुद्रया आच्छाद्य ॐ ऐं ह्रीं क्लीं चामुण्डायै विच्चे नमः इति मूलेन अष्टवारम् अभिमन्त्र्य धेनुमुद्रां योनिमुद्रां च प्रदर्शयेत्।

**3. अथ विशेषार्घः**

सामान्यार्घ्याद्दक्षिणे आत्मश्रीचक्रयोर्मध्ये बिन्दुत्रिकोणषट्कोणवृत्तचतुरस्रात्मकं यन्त्रं चन्दनादिना विलिख्य अक्षतैः पूजयेत्।

विशेषार्घः




**मध्येमूलम्** – ॐ ऐं ह्रीं क्लीं चामुण्डायै विच्चे नमः।

**त्रिकोणेत्रिपदैः** – ॐ ऐं ह्रीं क्लीं चामुण्डायै विच्चे नमः।

**मातृकयावृत्तम्** – अं आं इं ईं उं ऊं ऋं ॠं लृं लॄं एं ऐं ओं औं अं अः कं खं गं घं ङं चं छं जं झं ञं टं ठं डं ढं णं तं थं दं धं नं पं फं बं भं मं यं वं रं लं शं षं सं हं ळं क्षं इति।

- **चतुरस्रे षडङ्गानि** –

**आग्नेये** – ऐं हृदयाय नमः।

**ऐशाने** – ह्रीं शिरसे स्वाहा।

**नैर्ऋत्ये** – क्लीं शिखायै वषट्।

**वायव्ये** – चामुण्डायै कवचाय हुम्।

**मध्ये** – विच्चे नेत्रत्रयाय वौषट्।

**चतुर्दिक्षु** – ॐ ऐं ह्रीं क्लीं चामुण्डायै विच्चे नमः अस्त्राय फट्॥

फडिति आधारं प्रक्षाल्य। ॐ ऐं ह्रीं क्लीं चामुण्डायै विच्चे नमः मूलेन संस्थाप्य।

ॐ मं वह्निमण्डलाय दशकलात्मने श्रीत्रिगुणात्मिकादुर्गादेवताकलशपात्राधाराय नमः इति संपूज्य दशकलाः पूजयते।

ॐ यं धूमार्चिषे नमः ॐ रं ऊष्मायै नमः ॐ लं ज्वलिन्यै नमः।

ॐ वं ज्वालिन्यै नमः ॐ शं विस्फुलिङ्गिन्यै नमः ॐ षं सुश्रियै नमः।

ॐ सं सुरूपायै नमः ॐ हं कपिलायै नमः ॐ लं हव्यवाहायै नमः।

ॐ क्षं कव्यवाहायै नमः।

इति संपूज्य हुं इति पात्रं प्रक्षाल्य ॐ अें ह्रीं क्लीं चामुण्डायै विच्चे नमः इति मूलेन संस्थाप्य। सूर्यमण्डलाय द्वादशकलात्मने श्रीत्रिगुणात्मिकादुर्गादेवता कलशपात्राय नमः इति द्वादशकलाः पूजयेत्।

ॐ कं भं तपिन्यै नमः ॐ खं बं तापिन्यै नमः ॐ गं फं धूम्रायै नमः।

ॐ घं पं मरिच्यै नमः ॐ ङं नं ज्वालिन्यै नमः ॐ चं धं रुच्यै नमः।

ॐ छं दं सुषुम्णायै नमः ॐ जं थं भोगदायै नमः ॐ झं तं विश्वायै नमः।

ॐ ञं णं बोधिन्यै नमः ॐ टं ढं धारिण्यै नमः ॐ ठं डं क्षमायै नमः। इति संपूज्य॥

तत्र विलोममातृकया शुद्धजलमापूरयेत्॥ तद्यथा–ॐ क्षं ळं हं सं षं शं वं लं रं यं मं भं बं फं पं नं धं दं थं तं णं ढं डं ठं टं ञं झं जं छं चं ङंघं गं खं कं अः अ औं ओं ऐं एं लॄं –लृं ॠं ऋं ऊं उं ईं इं आं अं ॥

गालिनीमुद्रया निरीक्ष्य। षोडशकलात्मने चंद्रमण्डलाय श्रीत्रिगुणात्मिकादुर्गादेवताविशेषार्घपात्रामृताय नमः इति संपूज्य षोडशकलाः पूजयेत्। फडिति संरक्ष्य मूलेन देवीमावाह्य आवाहनादिदशमुद्राः प्रदर्श्य मूलेन संपूज्य मत्स्यमुद्रयाच्छाद्य मूलेन षोडशवारमभिमन्त्र्य धेनुमुद्रां योनिमुद्रां च प्रदशयेत्। इति विशेषार्घः॥

अथ तद्दक्षिणे पाद्यपात्रम्, अर्घपात्रम्, आचमनीयपात्रम्, मधुर्कपात्रम् (प्रोक्षणार्थम्), प्रोक्षणीपात्रं सामान्यार्घवत् संस्थाप्य पाद्यपात्रे श्यामाक (सामो) दूर्वाविष्णुक्रान्तादीनि प्रक्षिप्य।

अर्घपात्रे – सर्षपतिलदूर्वाकुशप्रक्षेपः।

आचमनीयपात्रे – जातीफलैलालवङ्गकंकोल (चिनकबाला) प्रक्षेपः।

मधुपर्कपात्रे – दधिमधुघृतानि प्रक्षिप्य विशेषार्घबिन्दुं सर्वपात्रे प्रक्षिपेत्। मूलेन प्रोक्षणीपात्राज्जलं गृहीत्वा तज्जलेन पूजासामग्री मूलेन संप्रोक्ष्य आत्मानं प्रोक्षयेत्।

इत्थं पात्रासादनं कृत्वा, अतर्यजन–यथाधिकारं कृत्वा, स्वहृदस्थां महालक्ष्मीं ध्यात्वा, मानसोपचारैः संपूज्य, स्वात्मना सहैक्यं भावयेत्। तत आत्मपूजां कुर्यात्। यथा–

**मं मण्डूकाय नमः** – आधारे

**कालाग्निरुद्राय नमः** – स्वाधिष्ठाने

**कच्छपाय नमः** – नाभौ

आधारशक्तिकूर्मानन्तपृथिवीसागररत्नद्वीपप्रासादहेमपीठेभ्यो नमः – हृदि

1. **धर्माय नमः** – दक्षांसे 2. **ज्ञानाय नमः** – वामांसे 3. **वैराग्याय नमः** – वामोरौ

4. **ऐश्वर्याय नमः** – दक्षोरौ 5. **अधर्माय नमः** – मुखे 6. **अज्ञानाय नमः** – वामपार्श्वे

7. **अनन्ताय नमः** – हृदि

तत्त्वपद्माय नमः, आनन्दमयाय नमः, संविन्नालाय नमः, विकारमयकेसरेभ्यो नमः, प्रकृतिमयपत्रेभ्यो नमः, पञ्चाशद्वर्णबीजाढ्यकर्णिकायै नमः, सूर्यमण्डलाय नमः, चंद्रमण्डलाय नमः, अग्निमण्डलाय नमः, इत्यन्तं हृदि न्यसेत्।

**॥ अथ पीताद्याः पीठशक्तयः ॥**

पीतायै नमः, श्वेतायै नमः, अरुणायै नमः, कृष्णायै नमः, धूम्रायै नमः, तीव्रायै नमः

स्फुल्लिंगन्यै नमः, रुचिरायै नमः, ज्वालिन्यै नमः, रं वह्न्यासनाय नमः।

इति स्वदेहे पीठशक्तिं विन्यसेत्॥

**शब्दार्थाः**

**आसनम्** स्थापनम् **दक्षांसे** दक्षिणस्कन्धे **वामांसे** वामस्कन्धे **स्फुल्लिंगम्** अग्निकणः **प्रकृतिः** सृष्टिः **पीठम्** आसनम् **कच्छपः** कूर्मः।

**स्वाध्यायः**

**1. प्रदत्तविकल्पेभ्यः योग्यविकल्पं चित्वा उत्तरं यच्छत।**

(1) अधोनिर्दिष्टासु कस्याः कलायाः गणना दश-कलासु भवति?

(क) ऊष्मा (ख) तपिनी (ग) अमृता (घ) बोधिनी

(2) अधोनिर्दिष्टासु कस्याः कलायाः गणना षोडश-क्लासु भवति?

(क) कपिलाः (ख) मानदा (ग) सुषुम्णा (घ) हव्यवाहा

(3) विशेषार्घपात्रस्य निरीक्षणं कया मुद्रया भवति?

(क) गालिनीमुद्रया (ख) मत्स्यमुद्रया (ग) धेनुमुद्रया (घ) सुरभिमुद्रया

(4) अन्ते कं मन्त्रं जप्त्वा पुष्पं आघ्रातव्यम्?

(क) कुम्भोदराय नमः (ख) नीलकण्ठाय नमः

(ग) विशालाक्षाय नमः (घ) सलिलदाय नमः

**2. अधोलिखत-प्रश्नानामुत्तराणि लिखत।**

(1) दशकलानां नामानि लिखत?

(2) द्वादशकलानां नामानि लिखत?

(3) सामान्यार्घविधिं लिखत?

(4) पीताद्याः पीठशक्तयः काः तन्नामानि लिखत?

(5) पात्रासादनपूजान्तर्गताम् आत्मपूजां लिखत?

**शिक्षक-प्रवृत्तिः**

शिक्षकः लब्धावसरे प्रायोगिकं पात्रासादनं कारयेत्।

**छात्रप्रवृत्तिः**

छात्राः पात्रासादनार्न्गत-विविधयन्त्राणां स्फोरकचित्राणि निर्माय कक्षायां स्थापयेत्।

**सूक्तिः - तस्मात् शक्तिम् उपासीत।**

●

| 7. | देवीराजोपचारपूजनम् ( 01 ) |
|---|---|

# 7. देवीराजोपचारपूजनम् ( 01 )

**प्रस्तावना**

पूर्वोक्त-प्रस्तावानुसारं शास्त्रेष्वस्माकं देवीदेवतानां पूजनप्रकाराः बहवः सन्ति। यथा-मानसोपचार-एकोपचारादयः, तत्रैकः प्रकारोऽस्ति पूजायाः राजोपचार-पूजनम्। राजोपचार अर्थात् राजानः यैः उपचारैः देवीं पर्युपासन्ते स्म, स एव राजोपचारः।

सामान्यपूजायाः अपेक्षया राजोपचारेऽस्मिन् सेना-रथ-तुरङ्ग-प्राकारादिविशिष्टाः पदार्था अपि देव्यै समर्प्यन्ते। यान् न सामान्यमनुष्यः प्रदातुं शक्नुयात्। अत्र च शास्त्रीयरागैः ससङ्गीतं वाद्यसमन्वितं पूजनं देवतायाः सहस्रनामार्चनसमन्वितञ्च विधीयते। पूजनस्यास्य मन्त्राणां रचना तत्र भगवता आद्यागुरु शङ्कराचार्येण कृता।

---



देवानां पूजायाः विविधोपचारक्रमाः सन्ति, यथा- एकोपचारः, पञ्चोपचारः, दशोपचारः, षोडशोपचारः, त्रिंशोपचारः, मानसोपचारः, राजोपचार इत्यादयः। अत्र राजोपचार अर्थात् राजानः येषामुपचाराणां प्रयोगं कृत्वा देवीं तोष्टुं प्रयतन्ते स्म तादृशः कश्चन उपचारविशेषो पूजाक्रम इति।

भगवता शङ्कराचार्येण देव्याः आराधनायै पूजेयं समुपस्थापिता। त्रिपुरसुन्दरदेव्याः आराधनपटवः भक्ताः तान्त्रिकाश्च अनेन एव राजोपचारेण भगवतीम् उपासते॥

**अथ सङ्कल्पः -**

**हस्ते जलमादाय**

ॐ अत्राद्य महामाङ्गल्य-फलप्रदमासोत्तमे मासे......... मम सर्वाभीष्टप्राप्त्यर्थं सर्वसौख्यप्राप्त्यर्थम्

अस्मिन् अनुष्ठानकर्मणि देवीराजोपचारपूजनम् अहं करिष्ये।

देव्याः राजोपचारपूजनावसरे सर्वप्रथमं ध्यानम्।

**ध्यानम्** - (यजमानः हस्ते **गन्धाक्षतपुष्पं** गृहीत्वा)

**श्लोकः** - **खडगं चक्रगदेषु चापपरिघान् शूलं भुशुण्डीं शिरः, शंखंसंदधतीं करैः त्रिनयनां सर्वांगभूषावृताम्।**

**नीलाश्मद्युतिमास्यपाददशकां सेवे महाकालिकां, यामस्तौत्स्वपिते हरौ कमलजो हन्तुं मधुं कैटभम्॥**

**( ऐं महाकाल्यै नमः )**

अक्षस्त्रक्परशुं गदेशु कुलिशं पद्मं धनुष्कुण्डिकां, दण्डं शक्तिमसिं च चर्मजलजं घण्टां सुराभाजनम्।

शूलं पाशसुदर्शने च दधतीं हस्तैः प्रसन्नाननां, सेवे सैरिभर्दिनीमिहमहालक्ष्मीं सरोजस्थिताम्॥

**( ह्रीं महालक्ष्म्यै नमः )**

घण्टाशूलहलानिशंखमुसले चक्रं धनुः सायकं, हस्ताब्जैर्दधतीं घनान्तविलसत् शीतांशुतुल्यप्रभाम्।

गौरी देहसमुद्भवां त्रिजगतामाधारभूतां महा-पूर्वामत्रसरस्वतीमनुभजे शुम्भादिदैत्यार्दिनीम्॥

**( क्लीं महासरस्वत्यै नमः )**

ॐ भूर्भुवः स्वः महाकाली-महालक्ष्मी-महासरस्वती-स्वरूपिणी-त्रिगुणात्मिकायै जगदम्बिकायै राजराजेश्वर्यै **नवदुर्गायै** नमः **ध्यानं** समर्पयामि।

**आवाहनम्** - (यजमानः हस्ते **अक्षतान्** गृहीत्वा)

**श्लोकः** - **उषसि मागध मंगलगायकैः झटिति जागृहि जागृहि जागृहि।**

**अतिकृपार्द्रकटाक्षनिरीक्षणैः जगदिदं जगदम्ब सुखी कुरु॥ 1॥**

**कनकमयवितर्दिशोभमानं दिशि दिशि पूर्णसुवर्णकुम्भयुक्तम्।**

**मणिमयमण्डप-मध्यमेहि मातर्मयि कृपयेति समर्चनं ग्रहीतुम्॥ 2॥** ॐ भूर्भुवः...0**आवाहनं** सम.0।

**आसनम्** - (यजमानः हस्ते **पुष्पासनं** गृहीत्वा)

**श्लोकः** - **कनकमयवितर्दिस्थापिते तूलिकाढ्ये, विविधकुसुमकीर्णे कोटिबालार्कवर्णे।**

**भगवति रमणीये रत्नसिंहासनेऽस्मिन्, उपविशपदयुगमं हेमपीठे निधेहि॥1॥**

**एणघराश्मकृतोन्नतधीष्ण्यं, हेमविनिर्मितपादमनोज्ञम्।**

**शोणशिलाफलकञ्च विशालं, देवि सुखासनमद्य ददामि॥ 2॥** ॐ भूर्भुवः...0**आसनं** सम.0।

**पाद्यम्** - (यजमानः हस्ते **पाद्यपात्रं** गृहीत्वा)

**श्लोकः** - **दूर्वया सरसिजान्वितविष्णु-क्रान्तया च सहितं कुसुमाढ्याम्।**

**पद्मयुग्मसदृशे पदयुग्मे, पाद्यमेतदुररीकुरु मातः ॥ 1॥**

**ईशमनोहररूपविलासे, शीतलचन्दनकुंकुममिश्रम्।**

**हृद्यसुवर्णघटे परिपूर्णं पाद्यमिदं त्रिपुरेशि गृहाण ॥ 2॥** ॐ भूर्भुवः...0**आवाहनं** सम.0।

**अर्घ्यम्** - (यजमानः हस्ते अर्घ्यपात्रं गृहीत्वा)

**श्लोकः** - **गन्धपुष्पयवसर्षपदुर्वा-संयुतं कुशतिलाक्षतमिश्रम्।**

**हेमपात्रनिहितं सह रत्नैः, अर्घ्यमेतदुररीकुरु मातः ॥ 1॥**

**लब्धभवत् करुणोऽहमिदानीं रत्नसुमाक्षतयुक्तमनर्घम्।**

**रुक्मविनिर्मितपात्रविशेषे-ष्वर्घमिदं त्रिपुरेशि ददामि॥ 2॥**ॐ भूर्भुवः...0**अर्घ्यं** सम.0।

**आचमनीयम्** - (यजमानः हस्ते **आचमनीयं** जलं गृहीत्वा)

श्लोकः - **जलजद्युतिना करेणजाती-फलकंकोललवंगगन्धयुक्तैः।**

**अमृतैरमृतैरिवासितैः, भगवत्याचमनं विधीयताम् ॥ 1 ॥**

**ह्रींमिति मन्त्रजपेन सुगम्ये हेमलतोज्ज्वलदिव्यशरीरे।**

**योगिमनः समशीतजलेन ह्याचमनं त्रिपुरेऽद्य विधेहि ॥ 2 ॥** ॐ भूर्भुवः...0**आचमनीयं** सम.0।

**मधुपर्कम्** - (यजमानः मधुपर्कपात्रे **मधुपर्कं** गृहीत्वा)

श्लोकः - **मधुनिहितं कनकस्य संपुटे, पिहितं रत्नपिधानकेन यत्।**

**तदिदं भगवति करेऽर्पितं, मधुपर्कं जननी प्रगृह्यताम्॥ 1 ॥** ॐ भूर्भुवः...0**मधुपर्कं** सम.0।

**मधुपर्कस्नानान्ते शुद्धोदक**-स्नानं समर्पयामि,

**मधुपर्कस्नानान्ते आचमनीयजलं** सम...0।

**पाद्यं ते परिकल्पितञ्च पदयोरर्घं तथा हस्तयोः, सौधीभिर्मधुपर्कमम्बमधुरं धाराभिरास्वादय।**

**तोयेनाचमनं विधेहि शुचिना गांगेन मत्कल्पितं, साष्टांगं प्रणिपातमम्ब कमले दृष्ट्वा कृतार्थी कुरु ॥2 ॥**

ॐ भूर्भुवः...0**आचमनीयं** सम.0।

**पयःस्नानम्** - (यजमानः हस्ते **पयः/पञ्चामृतं** वा गृहीत्वा)

श्लोकः - **स्वर्धेनुजातं बलवीर्यवर्धनं, दिव्यामृतात्यन्तरसप्रदं सितम्।**

**श्रीचण्डिके दुग्धसमुद्रसंभवे, गृहाण दुग्धं मनसा मयार्पितम्॥ 1 ॥** ॐ भूर्भुवः...0**पयःस्नानं** सम.0।

**पयः** स्नानान्ते **शुद्धोदक**-स्नानं **शुद्ध आचमनीयपात्रात् आचमनीयजलं** सम...0।

**दधिस्नानाम्** - (यजमानः हस्ते **दधि/पञ्चामृतं** वा गृहीत्वा)

श्लोकः - **क्षीरोद्भवं स्वादुसुधामयं च, श्रीचन्द्रकान्तिसदृशं सुशोभनम्।**

**श्रीचण्डिके शंभुनिशुम्भनाशिनि, स्नानार्थमङ्गीकुरु तेऽर्पितं दधि ॥ 1 ॥** ॐ भूर्भुवः...0**दधिस्नानं** सम.0।

**दधि स्नानान्ते शुद्धोदक स्नानं शुद्ध आचमनीयपात्रात् आचमनीयजलं समर्पयामि।**

**घृतस्नानम्** - (यजमानः हस्ते घृतं/पञ्चामृतं वा गृहीत्वा)

श्लोकः - **श्रीक्षीरजोद्भूतमिदं मनोज्ञं, प्रदीप्तवह्निद्युति पावितञ्च।**

**श्रीचण्डिके दैत्यविनाशदक्षे, हैयङ्गवीनं परिगृह्यताञ्च ॥1 ॥** ॐ भूर्भुवः...0**घृतस्नानं** सम.0।

घृतस्नानान्ते शुद्धोदक-स्नानं शुद्ध आचमनीयपात्रात् आचमनीयजलं सम...0।

**मधुस्नानम्** - (यजमानः हस्ते मधु/पञ्चमृतं वा गृहीत्वा)

**श्लोकः** – **माधुर्यमिश्रं मधुमक्षिकागणैः, वृक्षालिरम्ये मधुकानने चितम्।**

**श्रीचण्डिके शङ्करप्राणवल्लभे, स्नानार्थमङ्गीकुरु तेऽर्पितं मधु॥1॥** ॐ भूर्भुवः...0**मधुस्नानं** सम.0।

**मधुस्नानान्ते शुद्धोदक**-स्नानं **शुद्ध आचमनीयपात्रात् आचमनीयजलं** सम...0।

**शर्करास्नानम्** – (यजमानः हस्ते **शर्करां/पञ्चामृतं** वा गृहीत्वा)

**श्लोकः** – **पूर्णेक्षुकाम्भोधिसमुद्भवमिमां, माणिक्यमुक्ताफलदाममञ्जुलाम्।**

**श्रीचण्डिके चण्डविनाशकारिणि, स्नानार्थमङ्गीकुरु शर्कराशुभाम् ॥1॥** ॐ भूर्भुवः...0**शर्करास्नानं** सम.0।

**शर्करास्नानान्ते शुद्धोदक**-स्नानं **शुद्ध आचमनीयपात्रात् आचमनीयजलं** सम...0।

**सुगंधितैलस्नानम्** – (यजमानः हस्ते **सुगंधितैलं** गृहीत्वा)

**श्लोकः** – **एतच्चम्पकतैलमम्बविविधैः पुष्पैर्मुहुर्वासितं,**

**न्यस्तं रत्नमये सुवर्णचषके भृङ्गैर्भ्रमद्भिर्वृतम्।**

**सानन्दं व्रजसुन्दरंभिरभितो हस्तैधृतं चिन्मये,**

**केशेषु भ्रमरप्रभेषु सकलेष्वङ्गेषु चालिप्यताम्॥1॥** ॐ भूर्भुवः...0**सुगंधितैल-स्नानं** सम.0।

**सुगंधितैलस्नानान्ते शुद्धोदक**-स्नानं शुद्ध आचमनीयपात्रात् आचमनीयजलं सम...0।

**उद्वर्तन/अभ्यङ्गस्नानम्** – (यजमानः हस्ते **उद्वर्तनं** गृहीत्वा)

**श्लोकः** – **मातः कुङ्कुमपंकनिर्मितमिदं देहे तवोद्वर्त्तनं,**

**भक्त्याहं कलयामि हैमरजसा संमिश्रितं केसरैः।**

**केशानामलकैर्विशोध्य विशदान्कस्तूरिकाद्यर्चितैः,**

**स्नानं ते नवरत्नकुंभविधिना संवासितोष्णोदकैः॥1॥** ॐ भूर्भुवः...0**उद्वर्तनस्नानं** सम.0।

**उद्वर्तनस्नानान्ते** शुद्धोदक-स्नानं शुद्ध-आचमनीयजलं सम...0।

**तीर्थोदकस्नानम्** – (यजमानः हस्ते **तीर्थजलं** गृहीत्वा)

**श्लोकः** – **एलोशीरसुवासितैः सुकुसुमैर्गंगादितीर्थोदकैः, माणिक्यामलमौक्तिकामृतयुतैः स्वच्छैः सुवर्णोदकैः।**

**मन्त्रान्वैदिकतान्त्रिकान्परिठन् सानन्दमत्यादरात्, स्नानं ते परिकल्पयामि जननि स्नेहात्त्वमङ्गीकुरु॥1॥**

**हस्तलसत्कटकादिसुभूषा, आदरतोऽम्ब वरोऽप्यनिधाय।**

**चंदनवासितमन्त्रिततोयैः स्नानमयि त्रिपुरेशि विधेहि ॥2॥** ॐ भूर्भुवः...0**तीर्थोदक-स्नानं** सम.0।

**तीर्थोदक**स्नानान्ते **शुद्धोदक**-स्नानं **शुद्ध आचमनीयपात्रात् आचमनीयजलं** सम...0।

**हस्ते जलमादाय** – अनेन कृतेन पूर्वाराधनेन राजराजेश्वरी नवदुर्गा प्रीयताम्। उत्तरे निर्माल्य विसृज्य, पुनः गन्धाक्षतैः संपूज्य देव्याः अभिषेकं कुर्यात्।

(देव्याः अभिषेकार्थं विविधस्तोत्रनामानि-भगवतीस्तोत्रम्, भवान्यष्टकम्, श्रीसूक्तम्, महालक्ष्म्यष्टकम् इत्यादि)

**शुद्धोदकस्नानम्** - (यजमानः हस्ते **शुद्धजलं** गृहीत्वा)

श्लोकः - **उद्गन्धैरगरुद्भवैः सुरभिणा कस्तूरिका वारिणा**

**स्फूर्जत् सौरभयक्षकर्दमजलैः काश्मीरनीलैरपि।**

**पुष्पांभोभिरशेषतीर्थसलिलैः कर्पूरवासोभरैः,**

**स्नानं ते परिकल्पयामि कमले भक्त्या तदङ्गीकुरु॥ 1॥** ॐ भूर्भुवः...0**शुद्धोदकस्नानं** सम.0।

**वस्त्रम्** - (यजमानः हस्ते **वस्त्रं** गृहीत्वा)

श्लोकः - **बालार्कद्युतिदाडमीयकुसुमप्रस्थपिर्धसर्वोत्तम, मातस्त्वं परिधेहि दिव्यवसनं भक्त्या मया कल्पितम्।**

**मुक्ताभिर्ग्रथितं च कंचुकमिदं स्वीकृत्यप्रीतप्रभं, तप्तस्वर्णसमानवर्णमतुलं प्रावारमङ्गीकुरु॥1॥**

**संचितमम्ब मया ह्यतिमूल्यं, कुंकुमशोणमतीवमृदुत्वम्।**

**शङ्करतुङ्गतरांकनिवासे, वस्त्रयुगं त्रिपुरे परिधेहि॥ 2॥** ॐ भूर्भुवः...0**वस्त्रं** सम.0।

**वस्त्रान्ते आचमनीयजलं** सम...0।

भूपाल दिक्पाल किरीटिरत्न, मरीचिनीराजितपादपीठे।

देवैः समाराधितपादपद्मे श्रीचण्डिके स्वाचमनं गृहाण॥3॥ ॐ भूर्भुवः...0**आचमनीयं** सम.0।

**पादुका** - (यजमानः हस्ते **पादुके** गृहीत्वा)

श्लोकः - **नवरत्नयुते मयार्पिते कमनीयतपनीयपादुके।**

**सविलासमिदं पदद्वयं कृपया देवि तयोर्निधीयताम्॥ 1॥** ॐ भूर्भुवः...0**पादुके** सम.0।

**केशपाशसंस्करणम्** - (यजमानः हस्ते **केशपाशसंस्करणं ( कङ्कतादिकं )** गृहीत्वा)

श्लोकः - **बहुभिरगरधूपैः सादरं धूपयित्वा,**

**भगवति तव केशान् कंकतैर्माजयित्वा।**

**सुरभिभिररविन्दैः चंपकैश्चार्चयित्वा,**

**इटिति कनकसूत्रैर्जूप्यन्वेष्टयामि॥ 1॥** ॐ भूर्भुवः...0**केशपाशसंस्करणं** सम.0।

**सौवीरांजनम् ( सुरमो )** - (यजमानः हस्ते सौवीरांजनं गृहीत्वा)

श्लोकः - **सौवीरां-जनमिदमम्बचक्षुषोस्ते,**

**विन्यस्तं कनकशलाकया मया यत् ।**

**तन्नूनं मलिनमपि त्वदक्षि संगात्,**

**ब्रह्मेन्द्राद्यभिलषणीयतामियाय॥ 1॥** ॐ भूर्भुवः...0 **केशपाशसंस्करणं** सम.0।

**अलंकाराः** - (यजमानः हस्ते अलंकारान् गृहीत्वा)

**श्लोकः** - **मंजीरा-पदयोर्निधाय रुचिरान्विन्यस्यकांचीकटौ, मुक्ताहारमुरोजयोरनुपमां नक्षत्रमालां गले।**

**केयूराणि भुजेषु रत्नवलयश्रेणीः करेषु क्रमात्, ताटंके तव कर्णयोर्विनिदधे शीर्षे च चूडामणिम्॥ 1॥**

**धम्मिल्ले तव देवि हैमकुसुमान्याधाय भालस्थले, मुक्ताराजिविराजि हेमतिलकं नासापुटे मौक्तिकम्।**

**मातर्मौक्तिकजालिकां च कुचयोः सर्वांगुलीषूर्मिकाः कट्यां कांचनकिंकिणीर्विनिदधे रत्नावतंसो श्रुतौ। 2।**

कंदलदंशुकिरीटमनर्घं कंकणकुण्डलनूपुरहारम्।

अंगदमंगुलिभूषणमंब, स्वीकुरुदेवि पुराधिनिवासे ॥ 2॥ ॐ भूर्भुवः...0**अलंकारान्** सम.0।

**अष्टगन्धः** - (यजमानः हस्ते गन्धं गृहीत्वा)

**श्लोकः** - **प्रत्यंगं परिमार्जयामि शुचिना वस्त्रेण संप्रोञ्छनम्,**

**कुर्वे केशकलापमायततरं धूपोत्तमैर्धूपितम्।**

**काश्मीरैरगरुद्भवैर्मलयजैः संघर्ष्य संपादितं,**

**भक्तत्राणपरे मुकुन्दगृहिणि श्री चन्दनं गृह्यताम्॥ 1॥** ॐ भूर्भुवः...0 **गन्धं** सम....0।

**कंकुमम्** - (यजमानः हस्ते **कुंकुमं** गृहीत्वा)

**श्लोकः** - **मातर्भालतले तवातिविमले काश्मीरकस्तूरिका-कर्पूरागरुभिः करोमि तिलकं देहेऽङ्गरागं ततः।**

**वृक्षोजादिषु यक्षकर्दमरसं सिक्त्वा च पुष्पावृत्तिं, पादौ कुंकुमलेपनादिभिरहं संपूजयामि क्रमात्॥ 1॥**

**हस्तलसच्चतुरायुधजाले, शस्ततरं मृगनाभिसमेतम्।**

**सद्घनसारसुकुंकुममिश्रं, चन्दनपंकमिदं च गृहाण॥ 2॥** ॐ भूर्भुवः...0**कुंकुमं** सम.0।

**कज्जलम्** - (यजमानः हस्ते **कज्जलं** गृहीत्वा)

**श्लोकः** - **चांपेयकर्पूरकचन्दनादिकैः, नानाविधैर्गंधचयैः सुवासितम्।**

**नेत्राञ्जनार्थाय हरिन्मणिप्रभं, श्रीचण्डिके स्वीकुरु कज्जलं शुभम् ॥ 1॥** ॐ भूर्भुवः...0**कज्जलं** सम.0।

**अक्षताः** - (यजमानः हस्ते **अक्षतान्** गृहीत्वा)

**श्लोकः** - **रत्नाक्षतैस्त्वां परिपूजयामि, मुक्ताफलैर्वा रुचिरैरविद्धैः।**

**अखंडितैर्देवि यवादिभिर्वा, काश्मीरपंकांक्तितण्डुलैर्वा॥ 1॥** ॐ भूर्भुवः...0 **अक्षतान्** सम.0।

**अत्तरम्** - (यजमानः हस्ते **अत्तरं** गृहीत्वा)

**श्लोकः** - **जननि चंपक तैलमिदं पुरो, मृगमदोऽयमयं पटवासकः।**

**सुरभिगन्धमिदं च चतुस्समं सपदि सर्वमिदंपरिगृह्यताम्॥ 1॥** ॐ भूर्भुवः...0 **अत्तरं** सम.0।

**सिन्दूरम्** – (यजमानः हस्ते **सिन्दूरम्** गृहीत्वा)

**श्लोकः** – **सीमन्ते ते भगवति मया सादरं न्यस्तमेतत्,**

**सिंदूरं मे हृदयकमले हर्षवर्षं तनोतु।**

**बालादित्यद्युतिरिवसदा लोहिता यस्य कान्तिः**

**अन्तर्ध्वान्तं हरतु सततं चेतसा चिन्तयामि॥ 1 ॥** ॐ भूर्भुवः...0**सिन्दूरं** सम.0।

**पुष्पाणि** – (यजमानः **पुष्पाणि** हस्ते गृहीत्वा)

**श्लोकः** – **मंदारकुंदकरवीरलवंगपुष्पैः, त्वां देवि संततमहं परिपूजयामि।**

**जातीजपाबकुलचंपककेतकादि, नानाविधानि कुसुमानि च तेऽर्पयामि॥ 1 ॥** ॐ भूर्भुवः...0**पुष्पाणि** सम.0।

**पुष्पमाला** – (यजमानः हस्ते **पुष्पमालां** गृहीत्वा)

**श्लोकः** – **पुष्पाद्यैर्द्योतयन्तैः सततपरिचलत्कान्तिकल्लोलजालैः**

**कुर्वाणामज्जदन्तः करणविमलतां शोभितेव त्रिवेणी।**

**मुक्ताभिः पद्मरागैर्मरकतमणिभिर्निमिता दीप्यमानैः**

**नित्यं हारत्रयी त्वं भगवति कमले गृह्यतां कण्ठमध्ये॥1॥**

**लब्धविकासकदंबकजाती-चंपकपंकजकेतकयुक्तैः।**

**पुष्पचयैर्मनसावचितैस्वाम् अम्ब पुरेशि भवानि भजामि॥2॥** ॐ भूर्भुवः...0**पुष्पमालां** सम.0।

**अथाङ्गपूजा – हस्ते गन्धपात्रं गृहीत्वा दक्षिणनार्चयेत्।**

| | | | | |
|---|---|---|---|---|
| ह्लीं | दुर्गायै | नमः | पादौ | पूजयामि। |
| ह्लीं | मंगलायै | नमः | गुल्फो | पूजयामि। |
| ह्लीं | भगवत्यै | नमः | जंघे | पूजयामि। |
| ह्लीं | कौमार्यै | नमः | जानुनी | पूजयामि। |
| ह्लीं | वागीश्वर्यै | नमः | उरू | पूजयामि। |
| ह्लीं | वरदायै | नमः | कटीं | पूजयामि। |
| ह्लीं | पद्माकरवासिन्यै | नमः | स्तनौ | पूजयामि। |
| ह्लीं | महषिमर्दिन्यै | नमः | कण्ठं | पूजयामि। |
| ह्लीं | उमासुतायै | नमः | स्कन्धौ | पूजयामि। |
| ह्लीं | इन्द्राण्यै | नमः | भुजौ | पूजयामि। |

| | | | | |
|---|---|---|---|---|
| ह्रीं | गौर्यै | नमः | हस्तौ | पूजयामि। |
| ह्रीं | मोहवत्यै | नमः | मुखं | पूजयामि। |
| ह्रीं | शिवायै | नमः | कर्णौ | पूजयामि। |
| ह्रीं | अन्नपूर्णायै | नमः | नेत्रे | पूजयामि। |
| ह्रीं | कमलायै | नमः | ललाटं | पूजयामि। |

ह्रीं देव्याः दक्षिणे सिंह पूजयामि। वामे महिषं पूजयामि।

ह्रीं महालक्ष्म्यै नमः सर्वाङ्गं पूजयामि। इत्यङ्गपूजा।

**शब्दार्थाः**

**उषसि** प्रातःकाले **कुसुमाढ्यम्** पुष्पेण रमणीयम् **अङ्गीकुरु** स्वीकारं कुरु **हैयङ्गवीनम्** नवनीतम् **परिकल्पयामि** समर्पयामि **कुर्वे** करोमि **हेमपात्रनिहितम्** सुवर्णपात्रे स्थापितम्।

**स्वाध्यायः**

**1. प्रदत्तविकल्पेभ्यः योग्यविकल्पं चित्वा उत्तरं यच्छत।**

(1) घण्टाशूलहलानि ...... श्लोकेनानेन देव्याः कः उपचारः क्रियते?

(क) आसनम् (ख) ध्यानम् (ग) आवाहनम् (घ) अर्घ्यम्

(2) 'उषसि' इति शब्दस्य कोऽर्थः?

(क) प्रभाते (ख) सायम् (ग) मध्याह्ने (घ) निशीथे

(3) केन श्लोकेन मधुपर्कोपचारः क्रियते?

(क) ह्रीमिति... (ख) लब्धभव्... (ग) मधुनिहितम्.... (घ) स्वर्धेनु....

(4) देव्याः दक्षिणे कस्य पूजनं भवति?

(क) व्याघ्रस्य (ख) महिषस्य (ग) अश्वस्य (घ) सिंहस्य

**2. अधोलिखितानां प्रश्नानाम् उत्तरं यच्छत।**

(1) देव्याः आवाहनं लिखत।

(2) अर्घ्योपचारस्य सरलीमन्त्रं लिखत।

(3) देव्याः अङ्गपूजां लिखत।

(4) सुगंधितैलस्नानस्य कृते कः उपचार-श्लोकः?

(5) पाद्योपचारस्य सरलीमन्त्रं लिखत।

**3. श्लोकानां पूर्तिं कुरुत।**

(1) लब्धभवत्....

(2) मातः कुंकुम...

(3) एणधराश्म....

(4) ह्रीमिति....

(5) क्षीरोद्भवम्....

**4. रिक्तस्थानानि पूरयत।**

(1) दुर्गायै ________ पूजयामि।

(2) भगवत्यै ________ पूजयामि।

(3) ________ जानुनी पूजयामि।

(4) ________ कटी पूजयामि।

(5) कमलायै ________ पूजयामि।

**शिक्षक-प्रवृत्तिः**

शिक्षकः छात्रेभ्यः प्रायोगिकं पूजनमिदं कारयेयुः।

**छात्रप्रवृत्तिः**

संगीतेन वाद्येन च पूजनमिदं गातुं प्रयतेरन्।

**सूक्तिः** - मन्त्राणां मातृका देवी शब्दानां ज्ञानरूपिणी।
ज्ञानानां चिन्मयातीता शून्यानां शून्यसाक्षिणी॥

●

# 8. देवीराजोपचारपूजनम् ( 01 )

**प्रस्तावना**

देव्याः राजोपचारपूजने पूर्वपूजनानन्तरम् आवरणपूजाम् आयाति। सामान्यपूजायाः अपेक्षया राजोपचारे अस्मिन् आवरणादि-विशिष्टपूजनं देव्यै समर्प्यन्ते। तत्र च नवावरणानि भवन्ति। आवरणपूजायाम् अस्यां देव्याः विविधनामभिः विविधविशेषपूजनं विधीयेत।

पूजनस्यास्य मन्त्राणां रचना तत्र भगवता आद्यगुरु-शङ्कराचार्येण कृता।

---

**॥ अथ देवीराजोपचारपूजा-2 ( अथावरणपूजात्मको भागः )॥**

**प्रथमावरणपूजा - वामेन तत्त्वमुद्रयातर्पणम् दक्षिणेन ज्ञानमुद्रया पूजनम्।**

**प्रार्थना -**

**सच्चिन्मयपरेदेवि परामृतचरुप्रिये।**
**अनुज्ञां देहि मे मातः परिवारार्चनाय ते॥**

(**यथा वामकरघृतार्द्रखण्डादि दक्षिणेनाक्षत** पुष्पादिना पूजयामीति संपूज्य वामेन विशेषार्घजलैस्तर्पयाम्येवं सर्वत्र)

ॐ ऐं ह्रीं क्लीं चामुण्डायै विच्चे साङ्गायै सपरिवारायै सावरणायै सायुधायै सशक्तिकायै श्रीमहाकाली महालक्ष्मीमहासरस्वत्यै नमः श्रीमहाकाली-महालक्ष्मी-महासरस्वतीश्रीपादुकां पूजयामि तर्पयामि॥

ॐ ऐं ह्रीं क्लीं महाकाल्यै नमः महाकालीश्रीपादुकां पूजयामि तर्पयामि।

ॐ ऐं ह्रीं क्लीं महालक्ष्म्यै नमः महालक्ष्मीश्रीपादुकां पूजयामि तर्पयामि।

ॐ ऐं ह्रीं क्लीं महासरस्वत्यै नमः महासरस्वतीश्रीपादुकां पूजयामि तर्पयामि।

**बिन्दुपरितोगुरुचतुष्टयं पूजयेत्।**

ॐ गुरवे नमः गुरुशक्तिश्रीपादुकां पूजयामि तर्पयामि।

ॐ परमगुरवे नमः परमगुरुशक्तिश्रीपादुकां पूजयामि तर्पयामि।

ॐ परात्परगुरवे नमः परात्परगुरुशक्तिश्रीपादुकां पूजयामि तर्पयामि।

ॐ परमेष्ठिगुरवे नमः परमेष्ठिगुरुशक्तिश्रीपादुकां पूजयामि तर्पयामि।

**षडङ्गं पूजयेत्-**

ॐ ऐं हृदयाय नमः हृदयशक्तिश्रीपादुकां पूजयामि तर्पयामि।

ॐ ह्रीं शिरसे नमः शिरः शक्तिश्रीपादुकां पूजयामि तर्पयामि।

ॐ क्लीं शिखायै नमः शिखाशक्तिश्रीपादुकां पूजयामि तर्पयामि।

ॐ चामुण्डायै कवचाय नमः कवचशक्तिश्रीपादुकां पूजयामि तर्पयामि।

ॐ विच्चे नेत्रत्रयाय नमः नेत्रशक्तिश्रीपादुकां पूजयामि तर्पयामि।

ॐ ऐं ह्रीं क्लीं चामुण्डायै विच्चे अस्त्राय नमः अस्त्रशक्तिश्रीपादुकां पूजयामि तर्पयामि।

**प्रथमावरण**देवताभ्यो नमः सर्वोपचारार्थे गन्धं पुष्पं समर्पयामि। सामान्यार्घ-जलमादाय एताः

प्रथमावरणदेवताः साङ्गाःसपरिवाराः सायुधाः सशक्तिकाः पूजितास्तर्पिताः सन्तु।

**पुष्पाञ्जलिमादाय -**

**अभीष्टसिद्धिं मे देहि शरणागतवत्सले।**

**भक्त्या समर्पये तुभ्यं प्रथमावरणार्चनम्॥**

पुष्पाञ्जलिं दत्वा योनिमुद्रयप्रणमेत्। इति प्रथमावरणम्।

**अथ द्वितीयावरणम्-**

त्रिकोणेस्वाग्रादि प्रादक्षिण्येन पूजयते।

ॐ सावित्र्या सह ॐ विधात्रे नमः विधातृशक्ति श्रीपादुकां पूजयामि तर्पयामि।

ॐ श्रिया सह ॐ विष्णवे नमः विष्णुशक्ति श्रीपादुकां पूजयामि तर्पयामि।

ॐ उमया सह ॐ शिवाय नमः शिवशक्ति श्रीपादुकां पूजयामि तर्पयामि।

ॐ क्षुं नमः सिंहाय नमः ॐ सिंहशक्ति श्रीपादुकां पूजयामि तर्पयामि।

ॐ हुं नमः महिषायनमः महिषशक्ति-श्रीपादुकां पूजयामि तर्पयामि।

द्वितीयावरण देवताभ्यो नमः सर्वोपचारार्थे गन्धं पुष्पं च समर्पयामि। सामान्यार्घ-जलमादाय एताः

द्वितीयावरणदेवताः साङ्गाः सपरिवाराः सायुधाः सशक्तिकाः पूजितास्तर्पिताः सन्तु।

**पुष्पाञ्जलिमादाय -**

**अभीष्टसिद्धिं मे देहि शरणागतवत्सले।**

**भक्त्या समर्पये तुभ्यं द्वितीयावरणार्चनम्॥**

पुष्पाञ्जलिं दत्वा योनिमुद्रया (अग्निः, ईशानः, नैऋत्यः, वायव्यः) प्रणमेत्। इति **द्वितीयावरणम्।**

**अथ तृतीयावरणम् -**

षट्कोणे अग्नीशासुरवायव्यमध्ये दिक्षु च पूजयते।

ॐ ऐं नन्दजायै नमः नन्दजाशक्ति-श्रीपादुकां पूजयामि तर्पयामि।

ॐ ह्रीं रक्तदन्तिकायै नमः रक्तदन्तिकाशक्ति श्रीपादुकां पूजयामि तर्पयामि।

ॐ क्लीं शाकंभर्यै नमः शाकंभरीशक्ति श्रीपादुकां पूजयामि तर्पयामि।

ॐ हुं भीमायैनमः भीमाशक्ति श्रीपादुकां पूजयामि तर्पयामि।

ॐ ह्रीं क्लीं भ्रामर्यै नमः भ्रामरीशक्ति श्रीपादुकां पूजयामि तर्पयामि।

तृतीयावरण देवताभ्यो नमः गन्धंपुष्पं समर्पयामि। सामान्यार्घ जलमादाय एताः तृतीयावरणदेवताः साङ्गाः सपरिवाराः सायुधाः सशक्तिकाः पूजिताः तर्पिताः सन्तु।

**पुष्पाञ्जलिमादाय -**

**अभीष्टसिद्धिं मे देहि शरणागतवत्सले।**

**भक्त्या समर्पये तुभ्यं तृतीयावरणार्चनम्॥**

पुष्पाञ्जलिं दत्वा योनिमुद्रया प्रणमेत्। इति तृतीयावरणम्।

**अथ चतुर्थावरणम्** -

ततोऽष्टपत्रस्वाग्रादि-प्रादक्षिण्येन पूजयते।

ॐ ऐं ब्राह्म्यै नमः ब्राह्मीशक्ति श्रीपादुकां पूजयामि तर्पयामि।

ॐ ह्रीं माहेश्वर्यै नमः माहेश्वरीशक्ति श्रीपादुकां पूजयामि तर्पयामि।

ॐ क्लीं कौमार्यै नमः कौमारीशक्ति श्रीपादुकां पूजयामि तर्पयामि।

ॐ ह्रीं वैष्णव्यै नमः वैष्णवीशक्ति श्रीपादुकां पूजयामि तर्पयामि।

ॐ लुवाराहयै नमः वाराहीशक्ति श्रीपादुकां पूजयामि तर्पयामि।

ॐ क्षौं नारसिंह्यैनमः नारसिंहीशक्ति श्रीपादुकां पूजयामि तर्पयामि।

ॐ लं ऐंद्रयै नमः ऐंद्रीशक्ति-श्रीपादुकां पूजयामि तर्पयामि।

ॐ ख्यें चामुण्डायै नमः चामुण्डाशक्ति श्रीपादुकां पूजयामि तर्पयामि।

ॐ ह्रीं लक्ष्म्यै नमः लक्ष्मीशक्ति श्रीपादुकां पूजयामि तर्पयामि।

**चतुर्थावरण देवताभ्यो नमः** गन्धं पुष्पं समर्पयामि। सामान्यार्घ-जलमादाय एताः चतुर्थावरणदेवताः साङ्गाः सपरिवाराः सायुधाः सशक्तिकाः पूजितास्तर्पिताः सन्तु।

**पुष्पाञ्जलिमादाय** -

**अभीष्टसिद्धिं मे देहि शरणागतवत्सले।**
**भक्त्या समर्पये तुभ्यं चतुर्थावरणार्चनम्॥**

पुष्पाञ्जलिं दत्वा योनिमुद्रयाप्रणमेत्। इति **चतुर्थावरणम्।**

**अथ पञ्चमावरणम्** -

ततश्चतुर्विंशतिदलेस्वाग्रादि प्रादक्षिण्येन पूजयते।

ॐ विं विष्णुमायायै नमः विष्णुमायाशक्ति श्रीपादुकां पूजयामि तर्पयामि।

ॐ चें चेतनायै नमः चेतनाशक्ति श्रीपादुकां पूजयामि तर्पयामि।

ॐ बुं बुद्ध्यैः नमः बुद्धिशक्ति श्रीपादुकां पूजयामि तर्पयामि।

ॐ निं निद्रायै नमः निद्राशक्ति श्रीपादुकां पूजयामि तर्पयामि।

ॐ क्षुं क्षुधायै नमः क्षुधाशक्ति श्रीपादुकां पूजयामि तर्पयामि।

ॐ छां छायायै नमः छायाशक्ति श्रीपादुकां पूजयामि तर्पयामि।

ॐ शं शक्त्यै नमः शक्तिशक्ति श्रीपादुकां पूजयामि तर्पयामि।

ॐ तृं तृष्णायै नमः तृष्णाशक्ति श्रीपादुकां पूजयामि तर्पयामि।

ॐ क्षां क्षान्त्यै नमः क्षान्तिशक्ति श्रीपादुकां पूजयामि तर्पयामि।

ॐ जां जात्यै नमः जातिशक्ति श्रीपादुकां पूजयामि तर्पयामि।

ॐ लं लज्जायै नमः लज्जाशक्ति श्रीपादुकां पूजयामि तर्पयामि।

ॐ शां शान्त्यै नमः शान्तिशक्ति श्रीपादुकां पूजयामि तर्पयामि।

ॐ श्रं श्रद्धायै नमः श्रद्धाशक्ति श्रीपादुकां पूजयामि तर्पयामि।

ॐ कां कान्त्यै नमः कान्तिशक्ति श्रीपादुकां पूजयामि तर्पयामि।

ॐ लं लक्ष्म्यै नमः लक्ष्मीशक्ति श्रीपादुकां पूजयामि तर्पयामि।

ॐ धृं धृत्यै नमः धृतिशक्ति श्रीपादुकां पूजयामि तर्पयामि।

ॐ वृं वृत्यै नमः वृत्तशक्ति श्रीपादुकां पूजयामि तर्पयामि।

ॐ श्रुं श्रुत्यै नमः श्रुतिशक्ति श्रीपादुकां पूजयामि तर्पयामि।

ॐ स्मृं स्मृत्यै नमः स्मृतिशक्ति श्रीपादुकां पूजयामि तर्पयामि।

ॐ दं दयायै नमः दयाशक्ति श्रीपादुकां पूजयामि तर्पयामि।

ॐ तुं तुष्टयै नमः तुष्टिशक्ति श्रीपादुकां पूजयामि तर्पयामि।

ॐ पुं पुष्ट्यै नमः पुष्टिशक्ति श्रीपादुकां पूजयामि तर्पयामि।

ॐ मां मातृभ्यो नमः मातृशक्ति श्रीपादुकां पूजयामि तर्पयामि।

ॐ भ्रां भ्रान्त्यै नमः भ्रान्तिशक्ति श्रीपादुकां पूजयामि तर्पयामि।

विष्णुमायादिपञ्चमावरण देवताभ्यो नमः गन्धंपुष्पं समर्पयामि। सामान्यार्घ-जलमादाय एताः

पञ्चमावरणदेवताः साङ्गाः सपरिवाराः सायुधाः सशक्तिकाः पूजितास्तर्पिताः सन्तु।

**पुष्पाञ्जलिमादाय -**

**अभीष्टसिद्धिं मे देहि शरणागतवत्सले।**

**भक्त्या समर्पये तुभ्यं पञ्चमावरणार्चनम्॥**

पुष्पाञ्जलिं दत्वा योनिमुद्रयाप्रणमेत्। इति पञ्चमावरणम्।

**अथ षष्ठावरणम् -**

भूपुरेकोणचतुष्टये आग्नेयादिकोणमारभ्य।

ॐ गंगणपतये नमः गणपतिशक्ति-श्रीपादुकां पूजयामि तर्पयामि।

ॐ क्षं क्षेत्रपालाय नमः क्षेत्रपालशक्ति-श्रीपादुकां पूजयामि तर्पयामि।

ॐ बं बटुकाय नमः बटुकशक्ति-श्रीपादुकां पूजयामि तर्पयामि।

ॐ यां योगिन्यै नमः योगिनीशक्ति-श्रीपादुकां पूजयामि तर्पयामि।

गणपत्यादिषष्ठावरणदेवताभ्यो नमः गन्धं पुष्पं समर्पयामि। सामान्यार्घ-जलमादाय एताः षष्ठावरणदेवताः

साङ्गाः सपरिवाराः सायुधाः सशक्तिकाः पूजितास्तर्पिताःसन्तु।

**पुष्पाञ्जलिमादाय -**

**अभीष्टसिद्धिं मे देहि शरणागतवत्सले।**

**भक्त्या समर्पये तुभ्यं षण्ठावरणार्चनम्॥**

पुष्पाञ्जलिं दत्वा योनिमुद्रयाप्रणमेत्। इति षष्ठावरणम्।

**अथ सप्तमावरणम् -**

पूर्वादिदशदिक्षु

ॐ लं इन्द्रायै नमः इन्द्रशक्ति श्रीपादुकां पूजयामि तर्पयामि।

ॐ रं अग्नये नमः अग्निशक्ति श्रीपादुकां पूजयामि तर्पयामि।

ॐ यमाय नमः यमशक्ति श्रीपादुकां पूजयामि तर्पयामि।

ॐ निर्ऋतये नमः निर्ऋतिशक्ति श्रीपादुकां पूजयामि तर्पयामि।

ॐ वं वरुणाय नमः वरुणशक्ति श्रीपादुकां पूजयामि तर्पयामि।

ॐ यं वायवे नमः वायुशक्ति श्रीपादुकां पूजयामि तर्पयामि।

ॐ सं सोमाय नमः सोमशक्ति श्रीपादुकां पूजयामि तर्पयामि।

ॐ हं ईशानाय नमः ईशानशक्ति श्रीपादुकां पूजयामि तर्पयामि।

ॐ ब्रं ब्रह्मणे नमः ब्रह्मशक्ति श्रीपादुकां पूजयामि तर्पयामि।

ॐ ह्रीं अनन्ताय नमः अनन्तशक्ति श्रीपादुकां पूजयामि तर्पयामि।

सप्तमावरण देवताभ्यो नमः सर्वोपचारार्थे गन्धं पुष्पं समर्पयामि। सामान्यार्घ-जलमादाय एताः सप्तमावरणदेवताः साङ्गाः सपरिवाराः सायुधाः सशक्तिकाः पूजितास्तर्पिताः सन्तु।

**पुष्पाञ्जलिमादाय -**

**अभीष्टसिद्धिं मे देहि शरणागतवत्सले।**
**भक्त्या समर्पये तुभ्यं सप्तमावरणार्चनम्॥**

पुष्पाञ्जलिं दत्वा योनिमुद्रयाप्रणमेत्। इति सप्तमावरणम्।

**अथाष्टमावरणम् -**

ॐ वं वज्राय नमः वज्रशक्ति श्रीपादुकां पूजयामि तर्पयामि।

ॐ शं शक्त्यै नमः शक्तिशक्ति श्रीपादुकां पूजयामि तर्पयामि।

ॐ दं दण्डाय नमः दण्डशक्ति श्रीपादुकां पूजयामि तर्पयामि।

ॐ खं खड्गाय नमः खड्गशक्ति श्रीपादुकां पूजयामि तर्पयामि।

ॐ पां पाशाय नमः पाशशक्ति श्रीपादुकां पूजयामि तर्पयामि।

ॐ अं अंकुशाय नमः अंकुशशक्ति श्रीपादुकां पूजयामि तर्पयामि।

ॐ गं गंदायै नमः गदाशक्ति श्रीपादुकां पूजयामि तर्पयामि।

ॐ त्रिं त्रिशूलाय नमः त्रिशूलशक्ति श्रीपादुकां पूजयामि तर्पयामि।

ॐ पं पद्माय नमः पद्माशक्ति श्रीपादुकां पूजयामि तर्पयामि।

ॐ चं चक्राय नमः चक्रशक्ति-श्रीपादुकां पूजयामि तर्पयामि।

अष्टमावरण देवताभ्यो नमः गन्धंपुष्पं समर्पयामि। सामान्यार्घ जलमादाय एताः अष्टमावरणदेवताः साङ्गाः सपरिवाराः सायुधाः सशक्तिकाः पूजितास्तर्पिताः सन्तु।

**पुष्पाञ्जलिमादाय -**

**अभीष्टसिद्धिं मे देहि शरणागतवत्सले।**

**भक्त्या समर्पये तुभ्यं ह्यष्टमावरणार्चनम्॥**

पुष्पाञ्जलिं दत्वा योनिमुद्रयाप्रणमेत्। इति **अष्टमावरणम्।**

**अथ नवमावरणार्चनम्-**

ॐ वज्रहस्तायै गजारूढायै कादम्बरीदेव्यै नमः कादम्बरीदेवीशक्ति-श्रीपादुकां पूजयामि तर्पयामि।

ॐ शक्तिहस्तायै अजवाहनायै उल्कादेव्यै नमः उल्कादेवीशक्ति-श्रीपादुकां पूजयामि तर्पयामि।

ॐ दण्डहस्तायै महिषारूढायै करालीदेव्यै नमः करालीदेवीशक्ति-श्रीपादुकां पूजयामि तर्पयामि।

ॐ खड्गहस्तायै शववाहनायै रक्ताक्षीदेव्यै नमः रक्ताक्षीदेवीशक्ति-श्रीपादुकां पूजयामि तर्पयामि।

ॐ पाशहस्तायै मकरवाहनायै श्वेताक्षीदेव्यै नमः श्वेताक्षीदेवीशक्ति-श्रीपादुकां पूजयामि तर्पयामि।

ॐ अंकुशहस्तायै मृगवाहनायै हरिताक्षीदेव्यै नमः हरिताक्षीदेवीशक्ति-श्रीपादुकां पूजयामि तर्पयामि।

ॐ गदाहस्तायै सिंहारूढायै यक्षिणीदेव्यै नमः यक्षिणीदेवीशक्ति-श्रीपादुकां पूजयामि तर्पयामि।

ॐ त्रिशूलहस्तायै वृषभवाहनायै कालीदेव्यै नमः कालीदेवीशक्ति-श्रीपादुकां पूजयामि तर्पयामि।

ॐ पद्महस्तायै हंसवाहनायै सुरज्येष्ठादेव्यै नमः सुरजेष्ठादेवीशक्ति-श्रीपादुकां पूजयामि तर्पयामि।

ॐ चक्रहस्तायै सर्पवाहनायै सर्पराज्ञीदेव्यै नमः सर्पराज्ञीदेवीशक्ति-श्रीपादुकां पूजयामि तर्पयामि।

नवमावरण देवताभ्यो नमः गन्धंपुष्पं समर्पयामि। सामान्यार्घ-जलमादाय एताः नवमावरणदेवताः साङ्गाः सपरिवाराः सायुधाः सशक्तिकाः पूजितास्तर्पिताः सन्तु।

**पुष्पाञ्जलिमादाय -**

**अभीष्टसिद्धिं मे देहि शरणागतवत्सले।**

**भक्त्या समर्पये तुभ्यं नवमावरणार्चनम्॥**

पुष्पाञ्जलिं दत्वा योनिमुद्रयाप्रणमेत्। इति नवमावरणम्।

**शब्दार्थाः**

**आवरणम्** कवचम् **अनुज्ञाम्** आज्ञाम् **तर्पयामि** प्रीणामि (अत्र प्रसन्नां करोमि) **सायुधायै** शस्त्रसहितायै **अभीष्टम्** ईप्सितम् **भीमायै** भयङ्करायै **कौमार्यै** कार्तिकेयपत्न्यै **श्रुत्यै** वेदस्वरूपिण्यै **छायायै** भक्ताश्रयदात्र्यै **तुष्ट्यै** संतोषप्रदायै, **लज्जायै** मर्यादास्वरूपिण्यै **असुरः** नैऋत्यः॥

**स्वाध्यायः**

**1. प्रदत्तविकल्पेभ्यः योग्यविकल्पं चित्वा उत्तरं यच्छत।**

(1) कति आवरणानि भवन्ति?

(क) अष्ट (ख) पञ्च (ग) नव (घ) षट्

(2) कतमे आवरणे क्षेत्रपालयोगिनीदेवतानामर्चनं क्रियते?

(क) नवमे (ख) पञ्चमे (ग) षष्ठे (घ) प्रथमे

(3) आवरणार्चनान्ते नमस्कारात्मकः श्लोकः कः ?

(क) अभीष्टसिद्धि.... (ख) मनो देव्यै.... (ग) सच्चिन्मय.... (घ) या देवी....

(4) आवरणार्चनान्ते कया मुद्रया प्रणमेत् ?

(क) लिङ्गमुद्रया (ख) सुरभिमुद्रया (ग) ज्ञानमुद्रया (घ) योनिमुद्रया

**2. अधोलिखितप्रश्नानामुत्तराणि लिखत।**

(1) प्रार्थनायाः श्लोकं लिखत ?

(2) किं गुरुचतुष्टयम् ?

(3) चतुर्थावरणविधिं दर्शयत ?

(4) नवमे आवरणे कासां देवतानां पूजनमस्ति ?

**शिक्षक-प्रवृत्तिः**

शिक्षकः छात्रेभ्यः पूजनमिदं कारयेयुः।

**छात्रप्रवृत्तिः**

संगीतेन वाद्येन च पूजनमिदं गातुं प्रयतेरन्।

**सूक्तिः- सर्वरूपमयी देवी सर्वदेवीमयं जगत्।**
**अतोऽहं विश्वरूपां तां नमामि परमेश्वरीम्॥**

●

# 9. देवीराजोपचारपूजनम् ( 1 )

**प्रस्तावना**

पाठेऽस्मिन् राजोपचारपूजनस्य उत्तरपूजनं प्रदर्शितं वर्तते। उत्तरपूजने आवरणपूजानन्तरं ये अवशिष्टाः उपचाराः भवन्ति, तेषां समावेशो भवति। अत्र श्वेतचूर्णविधेः आरभ्य चरणोदक-उपचारान्तं यावत् तदनु च जपनिवेदनं यावत् पूजाक्रमः प्रदर्शितो वर्तते।

सामान्यपूजायाः अपेक्षया राजोपचारस्य उत्तरपूजनेऽस्मिन् आवरणादि-विशिष्टपूजनं जपनिवेदनादिकं च देव्यै समर्प्यन्ते। पूजनस्यास्य मन्त्राणां रचना तत्र भगवता आद्यगुरु-शङ्कराचार्येण कृता।

---

**॥ अथ देवीराजोपचारपूजा-3 ( उत्तरपूजनात्मको भागः )॥**

**अथ सङ्कल्पः**

**हस्ते जलमादाय**

ॐ अत्राद्य महामाङ्गल्य-फलप्रदमासोत्तमे मासे.... मम सर्वाभीष्टप्राप्त्यर्थं सर्वसौख्यप्राप्त्यर्थम्

अस्मिन् अनुष्ठानकर्मणि देवीराजोपचारपूजनस्य साङ्गतासिद्ध्यर्थम् देव्याः उत्तरपूजनम् अहं करिष्ये।

देव्याः उत्तरपूजनावसरे अथ श्वेतचूर्णम्।

**श्वेतचूर्णम्** - (यजमानः हस्ते **श्वेतचूर्णं** गृहीत्वा)

**श्लोकः - मन्दारमल्लीकरवीरसंभवं कर्पूरपाटीरसुवासितं सितम्।**

**श्रीश्वेतचूर्णं विधिना समर्पितं प्रीत्या त्वमङ्गीकुरु विष्णुवल्लभे ॥1॥**

ॐ भूर्भुवः स्वः महाकाली-महालक्ष्मी-महासरस्वती-स्वरूपिणी-त्रिगुणात्मिकायै जगदम्बिकायैराजराजेश्वर्यै **नवदुर्गायै** नमः श्वेतचूर्णं समर्पयामि।

**रक्तचूर्णम्** - (यजमानः हस्ते **रक्तचूर्णं** गृहीत्वा)

**श्लोकः - प्रत्यूषकालार्कमयूखसन्निभं जातिफलैलागरुणा सुवासितम्।**

**श्रीरक्तचूर्णं मनसा मयार्पितं प्रीत्या त्वमङ्गीकुरु विष्णुवल्लभे ॥1॥** ॐ भूर्भुवः 0 **रक्तचूर्णं** सम.0।

**हरिद्राम्** - (यजमानः हस्ते **हरिद्रां** गृहीत्वा)

**श्लोकः - हरिद्रुमोत्थामतिपीतवर्णां सुवासितां चन्दनपारिजातैः।**

**अनन्यभावेन समर्पितान्ते मातर्हरिद्रामुररीकुरुष्व ॥1॥** ॐ भूर्भुवः 0 **हरिद्रां** सम.0।

**धूपम्** - (यजमानः हस्ते **धूपं** गृहीत्वा)

**श्लोकः - लाक्षासंमिलितैः सिताभ्रसहितैः श्रीवाससंमिश्रितैः, कर्पूराकलितैः सितामधुयुतैर्गोसर्पिषाऽऽलोडितैः।**

**श्री खण्डागरुगुग्गुलप्रभृतिभिर्नानाविधैर्वस्तुभिः, धूपं ते परिकल्पयामि जननि त्वं धूपमङ्गीकुरु ॥1॥**

**ह्रीं पदशोभिमहामनुरूपे, धूरसिमन्त्रवरेण मनोज्ञम्।**

**अष्टसुगंधरजः कृतमाद्ये, धूपमिदं त्रिपुरेशि गृहाण ॥ 2 ॥**

फडिति धूपपात्रं संप्रोक्ष्य मूलेन नम इति संपूज्य पुरतो निधाय (रं) इति वह्निबीजेन अग्निं संस्थाप्य तदुपरि **ॐ ऐं ह्रीं क्लीं चामुण्डायै विच्चे नमः** इति मूलेन दशाङ्गधूपं दत्त्वा ह्रीं जयध्वनिमंत्रमातः स्वाहेति घण्टां संपूज्य वामहस्तेन घण्टां वादयन् दक्षिणहस्ते शङ्खस्थजलं गृहीत्वा धूपमन्त्रं पठन् पाठनपुरस्सरं शङ्खस्थजलं भूमौ क्षिप्त्वा देवीवामभागे धूपपात्रं निधाय तर्जनीमूलयोः अङ्गुष्ठयोगात्मिकां धूपमुद्रां प्रदर्शयेत् इति।

**दीपम्** – (यजमानः पात्रे **दीपं** प्रज्वाल्य संदर्श्य च)

**श्लोकः – रत्नालंकृतहेमपात्रनिहितैर्गोसर्पिषादीपितैः, दीपैर्दीर्घतरान्धकारभिदुरैर्बालार्ककोटिप्रभैः।**

**आताम्रज्वलदुज्ज्वलद्रवनवद्रत्नप्रदीपैः सदा, मातस्त्वामहमादरादनुदिनं नीराजयाम्युच्चकैः॥ 1 ॥**

**सन्तमसापहमुज्जवलपात्रे, गव्यघृतैः परिवर्धितदेहम्।**

**चंपककुड्मलवृन्दसमानं दीपगणं त्रिपुरेऽद्य गृहाणा॥ 2 ॥**

दीपकपात्रं गोघृतेनापूर्यमन्त्राक्षरतन्तुभिर्वर्तिनिःक्षिप्य **ॐ ऐं ह्रीं क्लीं चामुण्डायै विच्चे नमः** इति मूलेन प्रज्वाल्य घण्टां वादयन् नेत्रादिपादपर्यन्तं दीपं प्रदर्शयेत्।

मंत्रपाठपठनपुरःसरं देवीदक्षिणभागे दीपं निधाय शंखजलमुत्सृज्य मध्यमेअंगुष्ठमूललग्ने दीपमुद्रां तां प्रदर्शयेत्।

**नैद्यम्** – (यजमानः हस्ते **नैवद्यं** गृहीत्वा)

तत्रादौ देव्या अग्रे दक्षिणतो वा जलेन चतुरस्रमण्डलं कृत्वा स्वर्णादिनिर्मितभोजनपत्रां संस्थाप्य, तन्मध्ये षड्रसोपेतं विविधप्रकारकं वा नैवेद्यं निधाय, ह्रीं नमः इत्यर्घजलेन प्रोक्ष्य **ॐ ऐं ह्रीं क्लीं चामुण्डायै विच्चे नमः** इति मूलेन संवीक्ष्य अधोमुख दक्षिणहस्तोपरि तादृशं वामहस्तं निधाय नैवेद्यम् आच्छाद्य **(यं)** इति वायुबीजेन षोडशधा संजप्य वायुना तद्भूतदोषान् संशोध्य ततो दक्षिणकरतले तत्पृष्ठलग्नवामकरतलं कृत्वा नैवेद्यं प्रदर्श्य **(रं)** इति वह्निबीजं षोडशवारं संजप्य तदुत्पन्नाग्निना तद्दोषं दग्ध्वा ततो वामकरतले **(वं)** इति अमृतबीजं विचिन्त्य तत्पृष्ठलग्नं दक्षिणकरतलं कृत्वा नैवेद्यं प्रदर्श्य, **(वं)** इति सुधाबीजं षोडशवारं संजप्य तदुत्पन्नामृतं धारयाप्लावितं विभाव्य ततो वामकरतले **(वं)** इति अमृतबीजं विचिन्त्य **ॐ ऐं ह्रीं क्लीं चामुण्डायै विच्चे नमः** इति मूलेन प्रोक्ष्य धेनुमुद्रां प्रदर्श्य **ॐ ऐं ह्रीं क्लीं चामुण्डायै विच्चे नमः** इति मूलेनाष्टवारमभिमन्त्र्य गन्धपुष्पाभ्यां संपूज्य, देव्या हृद्गतं तेजः स्मृत्वा वामाङ्गुष्ठेन नैवेद्यपात्रं स्पृष्ट्वा, दक्षिणकरेण जलं गृहीत्वा–

**श्लोकः – चतुर्विधानं सघृतं सुवर्णपात्रे, मया देवि समर्पितं तत्।**

**संवीज्यमानामरवृन्दकैस्त्वं, जुषस्वमातर्दययाऽवलोक्य॥ 1 ॥**

इति भूतले देव्या दक्षिणे जलं क्षिप्त्वा वामहस्तेन अनामिका मूलयोः अंगुष्ठयोगेन नैवेद्यमुद्रां प्रदर्श्य, सपुष्पकराभ्यां पात्रमुद्धरन् –

**भगवति निवेदितानि हवींषि जुषाण।** इति च पठन् ग्रासमुद्रां प्रदर्शयेत्। वामहस्तेन पद्माभां प्राणाद्यां

दक्षिणेन तु यथा कनिष्ठिकानामिकांगुष्ठैः ॐ प्राणाय स्वाहा,

तर्जनीमध्यमांगुष्ठैः ॐ अपानाय स्वाहा,

तर्जन्यनामिकामध्यामांगुष्ठैः ॐ व्यानाय स्वाहा,

अनामिकामध्यामांगुष्ठैः ॐ उदानाय स्वाहा,

सर्वांगुलीभिः ॐ समानाय स्वाहा,

देवीं भुञ्जानां ध्यात्वा जलं दद्यात्–

श्लोकः – **नमस्ते देव देविशि सर्वतृप्तिकरं परम्।**

**अखण्डानन्दसंपूर्णे गृहाण जलमुत्तमम्॥ 1॥**

इति कर्पूरादिसुवासितं जलं निवेद्य जनन्या तज्जलं प्राशितमिति भावयन् अन्तः पटं धृत्वा पठेत् –

श्लोकः – **ब्रह्मेशाद्यैः सरसमभितः सूपविष्टैः समन्तात्, सिंजद्बालव्यजननिकरैर्वीज्यमाना सखीभिः।**

**नर्मक्रीडाप्रहसनपरान्पंक्तिभोक्तॄन् हसन्ती, भुक्ते पात्रे कनकघटिते षड्रसान्देवदेवि॥ 1॥**

**शालीभक्तं सुपक्वं शिशिरकरसितं पायसापूपसूपं,**

**लेह्यम् पेयंच चोष्यम् सितममृतफलं घारिकाद्यं सुखाद्यम्।**

**आज्यं प्राज्यं सुभोज्यन् नयनरुचिकरं राजिकैलामरीचैः,**

**स्वादीयः शाकराजीपरिकरममृताहारजोषं जुषस्व॥ 2॥**

**कल्पितमद्य धियाऽमृतकल्पं, दुग्धसितायुतमन्नविशेषम्।**

**माषविनिर्मितपूपसहस्रं स्वीकुरु देवि निवेदनमाद्ये॥ 3॥**

इति अन्तः पटं दत्त्वा आचमनीपात्राद् आचमनं दद्यात्। ततो मूलमन्त्रः **ॐ ऐं ह्रीं क्लीं चामुण्डायै विच्चे नमः** इति सप्तवारं पठेत्। (जवनिकामपाकृत्य) ॐ भूर्भुवः स्वः त्रिगुणात्मिकायै जगदम्बिकायै राजराजेश्वर्यै नवदुर्गायै मध्ये पानीयं समर्पयामि।

ततो भुञ्जानां देवीं ध्यात्वा यथाशक्तिमूलमंत्रं प्रजप्य देवीदक्षिणहस्ते जलं समर्पयेत्–

**आचमनम्** – (यजमानः हस्ते **आचमनं** गृहीत्वा)

श्लोकः – **गंगोत्तरीवेगसमुद्भवेन सुशीतलेनातिमनोहरेण,**

**त्वं पद्मपत्राक्षि मयार्पितेन शंखोदकेनाचमनं कुरुष्व॥ 1॥**

**पूर्वापोशनम्** – (यजमानः **पूर्वापोशनं** दद्यात्)

श्लोकः – **क्षीरमेतदिदमुत्तमोत्तमं, प्राज्यमाज्यमिदमुज्ज्वलं मधु।**

**मातरेतदमृतोपमं त्वया संभ्रमेणपरिपीयतां मुहुः ॥ 1॥**

**जलम्** – (यजमानः हस्ते **जलं** गृहीत्वा)

**श्लोकः –** **अतिशीतमुशीरवासितं, तपनीयोपवने निवेदितम्।**
**पटपूतमिदं जितामृतं शुचिगङ्गामृतमम्ब पीयताम्॥1॥**

**उत्तरापोशनम्** – (यजमानः **उत्तरापोशनं** दद्यात्)

**श्लोकः –** **नीहारहारं वनसारसारं प्रकल्पितानेकसुगन्धिभारम्।**
**शीताम्बुजम्बूनदपात्रवर्ति पीत्वा हि दुर्गेश्वरि प्रीयतां तत् ॥1॥**

**करोद्वर्तनम्** – (यजमानः **करोद्वर्तनं** गृहीत्वा)

**श्लोकः –** **उष्णोदकैः पाणियुगंमुखं च, प्रक्षाल्यमातः कलधौतपात्रे।**
**कर्पूरमिश्रेण सकुंकुमेन हस्तौ समुद्वर्तय चन्दनेन॥1॥**

**ताम्बूलम्** – (यजमानः हस्ते **ताम्बूलं** गृहीत्वा)

**श्लोकः –** **कर्पूरेणयुतैर्लवंगसहितैः कंकोलचूर्णान्वितैः, सुस्वादक्रमुकैः सगौरखदिरैः सुस्निग्धजातीफलैः।**
**मातः केतकपत्रकेन्दुरुचिभिः ताम्बूलवल्लीदलैः, सानन्दं मुखमण्डनीयमतुलं ताम्बूलमङ्गीकुरु॥1॥**
**एलालवंगादिसमन्वितानि कंकोलकर्पूरसुमिश्रितानि।**
**ताम्बूलवल्लीदलसंयुतानि, पूगानि ते देवि समर्पयामि॥2॥**

**दक्षिणा** – (यजमानः हस्ते **दक्षिणां** गृहीत्वा)

**श्लोकः –** **अथ बहुमणिमिश्रैः मौक्तिकैस्त्वां विकीर्य, त्रिभुनकमनीयैः, पूजयित्वा च वस्त्रैः।**
**मिलितविविधमुक्तैः दिव्यलावण्ययुक्तां, जननि कनकवृष्टिं दक्षिणां तेऽर्पयामि॥1॥**
**लंघितकेतकवर्णविशेषैः शोधितकोमलनागदलैश्च।**
**मौक्तिकचूर्णयुतैः प्रमुखाद्यैः, पूर्णतराम्ब पुरस्तवपात्री ॥2॥**

**प्रदक्षिणा** – (यजमानः हस्ताभ्यां **प्रदक्षिणां** कुर्यात्)

**श्लोकः –** **पदे-पदे या परिपूजकेभ्यः, सद्योऽश्वमेधादिफलं ददाति।**
**तां सर्वपापक्षयहेतुभूतां, प्रदक्षिणां ते परितः करोमि॥1॥**

**विशेषार्घः** – (यजमानः हस्ते **विशेषार्घं** दद्यात्)

**श्लोकः –** **कलिंगकोशातकसंयुतानि, जम्बीरनारिंगसमन्वितानि।**
**सुनारिकेलानि सदाडिमानि, फलानि ते देवि समर्पयामि॥1॥**

**छत्रम्** – (यजमानः हस्ते साक्षात् **छत्रं** गृहीत्वा)

**श्लोकः –** **मातः कांचनदंण्डमण्डितमिदं पूर्णेन्दुबिम्बप्रभं,**
**नानारत्नविशोभिहेमतिलकं लोकत्रयाह्लादकम्।**
**भास्वन्मौक्तिकजालिकापरिवृतं प्रीत्यामहस्ते घृतं,**
**छत्रं ते परिकल्पयामि जननि त्वष्ट्रास्वयं निर्मितम् ॥1॥**

**चामरम्** – (यजमानः हस्ते साक्षात् **चामरं** गृहीत्वा)

**श्लोकः – शरदिन्दुमरीचिगौरवर्णे मणिमुक्ताविलसत्सुवर्णदण्डैः।**

**जगदम्बविचित्रचामरैस्त्वामहमानन्दभरेण जीवयामि॥ 1॥**

**व्यजनम्** – (यजमानः हस्ते **व्यजनं** गृहीत्वा)

**श्लोकः – शतपत्रयुतैः स्वभावशीतैरतिसौरभ्ययुतैः परागपीतैः।**

**भ्रमरीमुखरीकृतैरनन्तैः व्यजनैः त्वां जगदम्ब वीजयामि॥ 1॥**

**आदर्श** – (यजमानः हस्ते साक्षात् **आदर्शं** गृहीत्वा)

**श्लोकः – मार्त्तण्डमंडलनिभौ जगदंबयोऽयं, भक्त्या मया मणिमयो मुकुरोऽर्पितस्ते।**

**पूर्णेन्दुबिम्बरुचिरं वदनं स्वकीय-मस्मिन् विलोकयविलोलविलोचने त्वम् ॥ 1॥**

**तुरंग** – (यजमानः **तुरगं** विभावयेत्)

**श्लोकः – प्रियगतिरतितुङ्गो रत्नकल्याणयुक्तः, कनकमयविभूषः स्निग्धगंभीरघोषः।**

**भगवति कलितोऽयं वाहनार्थेमया ते, तुरगशतसमेतो वायुवेगस्तुरंगः॥ 1॥**

**मातङ्ग** – (यजमानः **मातङ्गं** विभावयेत्)

**श्लोकः – मधुरकरव्रतकुम्भो न्यस्तसिंदूररेणुः, कनककलितघंटाकिंकिणीशोभिकण्ठः।**

**श्रवणयुगलचंचच्चामरो मेघतुल्यो, जननि तव मुदेस्तान्मत्तमातङ्ग एषः ॥ 1॥**

**रथ** – (यजमानः **रथं** विभावयेत्)

**श्लोकः – द्रुततरतुरगैर्विराजमानं, मणिमयचक्रचतुष्टयेनयुक्तम्।**

**कनकमयमहं वितानयुक्तं भगवति ते हि रथं समर्पयामि ॥ 1॥**

**सैन्यम्** – (यजमानः **सैन्यं** विभायवयेत्)

**श्लोकः – हयगजरथपत्तिशोभमानं दिशि दिशि दुंदुभिमेघनादयुक्तम्।**

**अपिबहुचतुरंग सैन्यमेतद्भगवति भक्तिभरेणतेऽर्पयामि॥ 1॥**

**प्राकार** – (यजमानः **प्राकारं** विभायवयेत्)

**श्लोकः – परिघीकृतसप्तसागरं बहुसंपत्सहितं मयाम्बिके।**

**विपुलं धरणीतलाभिधं प्रबलं दुर्गममम्ब तेऽर्पितम्॥ 1॥**

**नृत्यम्** – (यजमानः **नृत्यं** विभावयेत्)

**श्लोकः – भ्रमविलुलितकुन्तलोलतालि विगलितमाल्यविकीर्णरंगभूमिः।**

**इयमतिरुचिराननानटन्ती तव हृदये मुदमातनोतु मातः ॥ 1॥**

**डमरु-डिंडिम-झर्झर-झल्लरी मृदुरवार्द्र-घटार्द्र घटादयः।**

**झटिति झंकृतिभिर्जगदम्बिके मृदुरवा हृदयं सुखयन्तु ते॥ 2॥**

ताम्रपात्रे दधिलवणसर्षपदूर्वाक्षतान् निक्षिप्य देव्या दृष्टिमुत्तारयेत्।

**दृष्टया प्रदुष्टया खलुदुष्टदोषान्नसंहर्तुमारात् प्रथितप्रकाशा।**

**जनो भवेदिन्द्रपदाय योग्यस्तस्यै तवेदं लवणाक्षिदोषहम् ॥1॥**

**प्रार्थनापूर्वकनमस्कारः** - (यजमानः **नमस्कारं** कुर्यात्)

**श्लोकः - एषा भक्त्या तव विरचिता या मया देवि पूजा,**

**स्वीकृत्यैनां सपदि सकलान्मेऽपराधान् क्षमस्व।**

**नूनं यत्तव करुणया पूर्णतामेति सद्यः,**

**सानन्दं मे हृदयकमले तेऽस्तु नित्यं निवासः ॥1॥**

**क्षमापनम्** - (यजमानः **क्षमायाचनं** कुर्यात्)

**श्लोकः - अपराधसहस्राणि क्रियन्तेऽहर्निशं मया। दासोऽयमिति मां मत्त्वा क्षमस्व परमेश्वरी ॥1॥**

**मन्त्रहीनं क्रियाहीनं भक्तिहीनं सुरेश्वरि। यत्पूजितं मया देवि परिपूर्ण तदस्तु मे ॥2॥**

**अपराधशतं कृत्वा जगदम्बेति चोच्चरेत्। यां गतिं समवाप्नोति न तां ब्रह्मादयः सुराः॥3॥**

**अपर्णम्** -

अनेन आवाहनासनपाद्यार्घ्ययाचमनीयस्नानवस्त्रोपवीतगन्धाक्षतपुष्पधूपदीपनैवेद्यताम्बूलदक्षिणाप्रदक्षिणा मन्त्रपुष्परूपैः राजोपचारैः अन्योपचारैश्च यथा ज्ञानेन यथा मिलितोपचारद्रव्यैः कृतेन पात्रासादनपूजनपूर्वकविशेषकर्मणा श्रीमहाकालीमहालक्ष्मीमहासरस्वतीदेवताः प्रीयन्तां न मम।

**पात्रासादनविसर्जनम्** -

**प्रार्थना - त्वं हि दात्री च भोक्त्री च देवीरूपमिदं जगत्। देवीं जपति सर्वत्र या देवी सोऽहमेव हि॥1॥**

**क्षमस्व देवदेवेशि क्षम्यतां परमेश्वरि। तव पादाम्बुजे नित्यं निश्चला भक्तिरस्तु मे॥2॥**

इति संप्रार्थ्य जलमादाय, अनेन पात्रासादनपूर्वकपूजनेन श्रीमहाकालीमहालक्ष्मीमहासरस्वत्यः प्रीयन्ताम्।

ततः शंखजलमुद्धृत्य देव्या उपरि भ्रामयित्वा-

**शंखमध्ये स्थितं तोयं भ्रामितं ललितोपरि। अङ्गलग्नं मनुष्याणां ब्रह्महत्यां व्यपोहति॥1॥**

**न रोगा न च कुष्माण्डाः पिशाचोरगराक्षसाः। दृष्ट्वा शंखोदकं मूर्ध्नि व्याधयो विलयंगताः॥2॥**

इति मन्त्रेण देव्या दक्षिणकरे किञ्चिज्जलं दत्त्वा प्राग्वदर्घं देव्याः शिरसि दत्त्वा शंखं यथा स्थाने निवेशयेत्।

ततो गतसारनैवेद्यं देव्याश्चोच्छिष्टं किञ्चिदुद्धृत्य **'विष्वक्सेनाय नमः'** इति मूलमन्त्रेण विष्वक्सेनं संपूज्य उच्छिष्टधारिणे ऐशान्यां दिशि दद्यात्, तच्छेषनैवेद्यं शिरसि धृत्वा नैवेद्यादिकं देवीभक्तेषु विभज्य स्वयं भुञ्जीयात्॥

**चरणोदकग्रहणम्** -

**अकालमृत्युहरणं सर्वव्याधिविनाशनम्। देव्याः पादोदकं पीत्वा शिरसा धारयाम्यहम्॥1॥**

इति पात्रान्तरेणैव न तु हस्तेन त्रिवारं पिबेत्। ततः किञ्चित् सामान्यार्घोदकमादाय।

**साधु वाऽसाधु वा कर्म यद्यदाचरितं मया। तच्छर्वं कृपया देवि गृहाणाराधनं मम॥ 2॥**

इति मन्त्रेण देवीवामहस्ते जलं समर्पयेत्, ततः विशेषार्घोदकमादाय। इतः पूर्वं प्राणबुद्धिदेहधर्माधिकारतो जाग्रत्स्वप्नसुषुप्तितुरीयावस्थासु मनसा वाचा कर्मणा हस्ताभ्यां पद्भ्याम् उदरेण शिश्ना यत्स्मृतं यदुक्तं यत्कृतं तत्सर्वं देव्यै समर्पणमस्तु। मां मदीयं च सकलं देव्यै समर्पये। ह्रीं तत्सदिति तज्जलं देव्या उपरि समर्पयेत्।

विशेषार्घं मूलमन्त्रेण समर्प्य तेनैव देवीं नीराज्य स्वस्थाने स्थापयित्वा ततः कलशं विसृजेत्। हस्ते अक्षतान् गृहीत्वा–

**उत्तिष्ठ देवि चण्डेशि शुभां पूजां प्रगृह्य च। कुरुष्व मम कल्याणम् अष्टाभिः शक्तिभिः सह॥ 1॥**

**गच्छ गच्छ परं स्थानं स्वस्थाने गच्छ चण्डिके। दुर्गे देवि जगन्मातः स्वस्थानं गच्छपूजिता॥ 2॥**

**इमां पूजां मया देवि यथा शक्त्योपपादिताम्। रक्षार्थं त्वं समादाय व्रजस्व स्थानमुत्तमम्॥ 3॥**

इत्यक्षतान् निक्षिप्य। संहारमुद्रया पुष्पं शिरसि धृत्वा।

**गच्छ गच्छ परं स्थानं स्वस्थाने परमेश्वरि। यत्र ब्रह्मादयो देवाः न विदुः परमं पदम्॥ 1॥**

इति संहारमुद्रया हृदयकमले हस्तं दत्त्वा देवीं स्वहृदये संस्थाप्य मानसोपचारै, संपूज्य स्वात्मानं देवीस्वरूपं भावयेत्।

मूलं जप्त्वा – **गुह्यातिगुह्यगोप्त्रीत्वं गृहाणास्मत्कृतं जपम्। सिद्धिर्भवतु मे देवि त्वत्प्रसादान्महेश्वरी॥ 1॥**

इति देव्यै जपं निवेद्य संपूज्य विभूतिं धृत्वा।

**यान्तु देवगणाः सर्वे स्वशक्त्या पूजिता मया। इष्टकामप्रसिद्ध्यर्थं पुनरागमनाय च॥ 1॥**

इति पात्रासादन–विसर्जनप्रकाराः॥

### शब्दार्थाः

**सितम्** धवलं वा श्वेतम् **पाणियुगम्** हस्तद्वयम् **झटिति** शीघ्रम् **परितः** सर्वतः **जम्बूनदपात्रवर्ति** सुवर्णपात्रे स्थितम् **धिया** बुद्ध्या **जवनिका** अन्तःपटः॥

### स्वाध्यायः

**1. प्रदत्तविकल्पेभ्यः योग्यविकल्पं चित्वा उत्तरं यच्छत।**

(1) 'प्रत्यूषकालार्क मयूख....' श्लोकेनानेन देव्याः कः उपचारः क्रियते?

(क) श्वेतचूर्णम् (ख) रक्तचूर्णम् (ग) हरिद्रा (घ) सिन्दूरम्

(2) धूपविधये कः श्लोकः वर्तते?

(क) सन्तमसापह.... (ख) कल्पितमद्य.... (ग) ह्रीं पदशोभि..... (घ) गंगोत्तरी....

(3) 'सितम्' इति शब्दस्य कोऽर्थः?

(क) कृष्णम् (ख) रक्तम् (ग) श्वेतम् (घ) हरितम्

(4) 'अतिशीतमुषीर...' श्लोकेनानेन देव्याः कः उपचारः क्रियते?

(क) पूर्वापोशनम् (ख) आचमनम् (ग) जलम् (घ) करोद्वर्तनम्

**2. अधोलिखितानां प्रश्नानाम् उत्तरं यच्छत।**

(1) नैवेद्यविधेः श्लोकं लिखत।

(2) दीपविधेः सरलीश्लोकं लिखत।

(3) ताम्बूलविधये कः श्लोकः प्रयुज्यते।

(4) छत्रविधेः श्लोकं लिखत।

(5) नैवेद्यनिवेदनार्थम् अन्ये के मन्त्राः सन्ति?

(6) पात्राणां विसर्जनविधिः लिखत?

**3. श्लोकानां पूर्तिं कुरुत।**

(1) पदे पदे या ..... परितः करोमि।

(2) लङ्घितकेतक ..... तव पात्री।

(3) मार्त्तण्डमण्ड.... त्वम्।

(4) परिघीकृत.... तेऽर्पितम्।

(5) भ्रमविलुलित.... आतनोतु मातः।

**शिक्षक-प्रवृत्तिः**

शिक्षकः छात्रेभ्यः प्रयोगिकं पूजनमिदं कारयेयुः।

**छात्रप्रवृत्तिः**

संगीतेन वाद्येन च पूजनमिदं गातुं प्रयतेरन्।

**सूक्तिः - सृष्टिस्थितिविनाशानां शक्तिभूते सनातनि।**
**गुणाश्रये गुणमये नारायणि नमोऽस्तुते॥**

●

# 10. होमतन्त्रम्

**प्रस्तावना**

देवीपूजानन्तरं होमपूर्वकं दिग्रक्षणं कृत्वा कांस्यपात्रे पंचगव्यं कृत्वा,

**गोमूत्रं गोमयं क्षीरं दधि सर्पिः कुशोदकं।**

**यज्ञस्थलविशुद्ध्यर्थं पंचगव्यं करोम्यहम्॥**

यज्ञस्थले प्रोक्षयित्वा, शुद्धोदकेन सम्प्रोक्ष्य, भूमिं सम्प्रार्थ्य,

''देवा आयान्तु'' इति पठित्वा, भूमिकूर्मानन्तदेवान्सम्पूज्य, स्थण्डिले वा कुण्डे पंचभूसंस्कारं कृत्वा, अग्निं संस्थाप्य, अग्निं संपूज्य, ग्रहपूजां कृत्वा, यथाशक्ति कुशकण्डिकां कृत्वा, होममारभेत्।

---

**॥ आधारहोमः ॥**

स्थानोपविष्टः दक्षिणं जान्वाच्य कुशैर्ब्रह्मणान्वारब्धः, उपयमनकुशसहितं वामहस्तं हृदि निधाय दक्षिणहस्तेन अग्नौ मनसा प्रजापतिं ध्यात्वा तूष्णीं स्रुवेण आज्येन जुहुयात्।

1. मनसा ॐ प्रजापतये (अत्र न स्वाहाकारः) (प्रोक्षण्यां संस्रवप्रक्षेपः) इदं प्रजापतये न मम।
2. इन्द्राय स्वाहा (प्रोक्षण्यां संस्रवप्रक्षेपः) इदमिन्द्राय न मम।
3. अग्नये स्वाहा (प्रोक्षण्यां संस्रवप्रक्षेपः) इदमग्नये न मम।
4. सोमाय स्वाहा (प्रोक्षण्यां संस्रवप्रक्षेपः) इदं सोमाय न मम।

**॥ अथ द्रव्यत्यागसंकल्पः ॥**

हस्ते जलमादाय - इदमुपकल्पितं समिच्चरुतिलाज्यादिहवनीयद्रव्यं या या यक्ष्यमाणदेवताः ताभ्यस्ताभ्योमया परित्यक्तं न मम। यथा दैवतमस्तु।

**॥ अग्निपूजनम् ॥**

**ॐ अग्ने नयसुपथा राये ऽ अस्मान्विश्वानि देव वयुनानि विद्वान्।**
**युयोद्ध्यस्मज्जुहुराणमेनो भूयिष्ठान्ते नम ऽ उक्तिं विधेम्॥**

ॐ शान्तिके वरदनामाग्नये नमः। सर्वोपचारार्थे गंधाक्षत पुष्पाणि समर्पयामि। अग्निं सम्प्रार्थ्य प्रणम्य च।

**॥अथ वराहुतिहोमः ॥**

**ॐ गणानान्त्वा....** इति मन्त्रेण एकाज्याहुतिं हुत्वा, ग्रहदेवतानां होमे नवग्रहदेवताभ्यो यथाप्राप्तम् अर्कादिसमिच्चरुतिलाज्यद्रव्यैः प्रत्येकं प्रति द्रव्येण अष्टाष्टसंख्यका आहुतिर्देया।

ग्रहहोमानन्तरं प्रधानदेवतानां होमस्तथा च क्रमेण प्रधानदेवताङ्गत्वेन वास्तुमण्डलादिस्थापितदेवता होमः।

**॥अथ ग्रहहोमः ॥**

नवग्रहाणां विप्रचतुष्टयेन अष्टौ आहुतयः देयाः।

**ग्रहा राज्यं प्रयच्छन्ति ग्रहा राज्यं हरन्ति च।**
**ग्रहैस्तु व्यापितं सर्वं त्रैलोक्यं सचराचरम्॥**

ग्रहहोमे क्रमशः समिधः -

**अर्कः पलाशखदिरौ अपामार्गोऽथ पिप्पलः।**

**उदुम्बरः शमी दूर्वा कुशाश्च समिधः क्रमात् ॥**

**॥ नवग्रहाः ॥**

**1. सूर्यः - ॐ आ कृष्णेन रजसा वर्तमानो निवेशयन्नमृतम्मर्त्यञ्च।**

**हिरण्ययेन सविता रथेना देवो याति भुवनानि पश्यन्॥ ( 33/43 )**

ह्रीं जपाकुसुमसंकाशं काश्यपेयं तमोऽरिं महाद्युतिं। सर्वपापघ्नं प्रणतोऽस्मि दिवाकरम्॥

ॐ ह्राँ ह्रीँ ह्राँ सः सूर्याय नमः। स्वाहा॥

**2. चन्द्रः - ॐ इमन्देवाऽअसपत्नꣳसुवद्ध्वं महते क्षत्राय महते ज्यैष्ठ्याय महते जानराज्यायेन्द्रस्येन्द्रियाय।**

**इममुष्य पुत्रममुष्यै पुत्रमस्यै विशऽएषवोमी राजा सोमोस्माकम्ब्राह्मणानाꣳराजा॥ ( 9/40 )**

ह्रीं दधिशंखतुषाराभं क्षीरोदार्णवसंभवम्।

नमामि शशिनं सोमं शंभोर्मुकुटभूषणम्॥

ॐ श्राँ श्रीँ श्राँ सः सोमाय नमः। स्वाहा।

3. **भौमः - ॐ अग्निर्मूर्धा दिवः ककुत्पतिः पृथिव्याऽअयम्।**

**अपाꣳरेताꣳसि जिन्वति॥ ( 3/1 )**

ह्री धरणीगर्भसम्भूतं विद्युत्कान्तिसमप्रभम्।

कुमारं शक्तिहस्तं च मंगलं प्रणमाम्यहम्॥

ॐ क्राँ क्रीँ क्राँ सः भौमाय नमः॥ स्वाहा॥

**4. बुधः - ॐ उद्बुद्ध्यस्वाग्ने प्रतिजागृहि त्वमिष्टा पूर्ते सꣳसृजेथा मयञ्च।**

**अस्मिन्त्सधस्त्थेऽअद्ध्युत्तरस्मिन्विश्वे देवा यजमाश्च सीदत॥ ( 18/61 )**

ह्रीँ प्रियङ्गुकलिकाश्यामं रूपेणाप्रतिमं बुधम्।

सौम्यं सौम्यगुणोपेतं तं बुधं प्रणमाम्यहम्॥

ॐ ब्राँ ब्रीँ ब्रौँ सः बुधाय नमः॥ स्वाहा॥

**5. गुरुः - ॐ बृहस्पतेऽअतियदर्योऽअर्हा द्युमद्विभाति क्रतुमज्जनेषु।**

**यद्दीदतयच्छ वसऽऋत प्रजासु द्रविणं धेहि चित्रम्॥ ( 26/3 )**

ह्रीँ देवानां च ऋषीणां च गुरुं कांचनसंनिभम्।

बुद्धिभूतं त्रिलोकेशं तं नमामि बृहस्पतिम्॥

ॐ ज्राँ ज्रीँ ज्राँ सः गुरवे नमः॥ स्वाहा॥

6. **शुक्रः - ॐ अन्नात्परिस्त्रुतो रसं ब्रह्मणा व्यपिबत्क्षत्रम्पयः सोममप्रजापतिः।**

**ऋतेन सत्यमिन्द्रियं विपानꣳशुक्रमन्धसऽइन्द्रस्येन्द्रियमिदम्पयोमृतम्मधु॥ ( 19/75 )**

ह्रीँ हिमकुन्दमृणालाभं दैत्यानां परमं गुरुम्।

सर्वशास्त्रप्रवक्तारं भार्गवं प्रणमाम्यहम्॥

ॐ द्राँ द्रीँ द्रौँ सः शुक्राय नमः॥ स्वाहा॥

7. **शनिः - ॐ शन्नो देवीरभिष्टयऽआपो भवन्तु पीतये।**

**शँय्यो रभिस्त्रवन्तु नः॥ ( 36/1 )**

ह्रीँ नीलाञ्जनसमाभासं रविपुत्रं यमाग्रजम्।

छायामार्तण्डसंभूतं तं नमामि शनैश्चरम्॥

ॐ खाँ खीँ खौँ सः शनैश्चराय नमः॥ स्वाहा॥

8. **राहुः - ॐ कया नश्चित्रऽआभुवदूती सदावृधः सखा।**

**कया शचिष्ठया वृता॥ ( 36/4 )**

ह्रीँ अर्धकायं महावीर्यं चन्द्रादित्यविमर्दनम्।

सिंहिकागर्भसंभूतं तं राहुं प्रणमाम्यहम्॥

ॐ भ्राँ भ्रीँ भ्रौँ सः राहवे नमः। स्वाहा।

9. **केतुः - ॐ केतुं कृण्वन्नकेतवे पेशो मर्य्याऽअपेशसे।**

**समुषद्भिरजायथाः॥ ( 19/37 )**

ह्रीँ पलाशपुष्पसंकाशं तारकाग्रहमस्तकम्।

रौद्रं रौद्रात्मकं घोरं तं केतुं प्रणमाम्यहम्।

ॐ प्राँ प्रीँ प्रौँ सः केतवे नमः॥ स्वाहा॥

**॥ अधिदेवतानां होमः॥**

1. **ईश्वरः - ॐ त्र्यंबकं स्यजामहे सुगन्धिं पुष्टिवर्धनम्।**

**उर्व्वारुकमिव बन्धनान्मृत्योर्मुक्षीय मामृतात्॥ ( 3/60 )**

ह्रीँ पञ्चवक्त्रो वृषारूढः प्रतिवक्त्रं त्रिलोचनः।

कपालशूलखट्वाङ्गः चन्द्रमौलिः सदाशिवः॥

ॐ ईश्वराय नमः स्वाहा।

2. **उमा - ॐ श्रीश्च ते लक्ष्मीश्च पत्न्याऽवहोरात्रे पार्श्वे नक्षत्राणि रूपमश्विनौ व्यात्तम्।**

**इष्णन्निषाणामुम्मऽइषाण सर्वलोकम्मऽइषाण। ( 31/22 )**

ह्रीँ अक्षसूत्रं च कमलं दक्षिणे च कमण्डलुम्।

उमा बिभर्ति हस्तेषु पूजिता त्रिदशैरपि॥

ॐ उमायै नमः स्वाहा।

3. **स्कन्दः -ॐ यदक्रन्दः प्रथमञ्जायमानऽउद्यन्त्समुद्रादुत वा पुरीषात्।**

**श्येनस्य पक्षा हरिणस्य बाहूऽउपस्तुत्यम्महिजातन्तेऽअर्वन्॥ ( 29/2 )**

ह्रीँ कुमारः षण्मुखः श्रीमान् शिखण्डीकविभूषणः।

रक्तांबरधरो दिव्यः मयूरवाहनः स्वयम्॥

ॐ स्कंदाय नमः। स्वाहा।

4. **विष्णुः -ॐ व्विष्णो ररटमसि व्विष्णोः श्नप्त्रेस्थो व्विष्णोः स्यूरसि व्विष्णोर्ध्रुवोऽसि।**

**व्वैष्णवमसि व्विष्णवे त्वा॥ ( 5/21 )**

ह्रीँ पीतांबरधरं देवं वनमालाविभूषितम्।

दिव्यं देवपतिं विष्णुं नमामि सर्वसिद्धये॥

ॐ विष्णवे नमः। स्वाहा।

5. **ब्रह्मा - ॐ आ ब्रह्मन्ब्राह्मणो ब्रह्मवर्चसी जायतामाराष्ट्रे राजन्यः शूरऽइषव्योतिव्याधी महारथो जायतान्दोग्ध्री धेनुर्वोढा नड्वानाशुः सप्तिः पुरन्धिर्योषाजिष्णू रथेष्ठाः सभेयो युवास्य यजमानस्य व्वीरो जायतान्निकामे निकामे नः पर्ज्जन्यो व्वर्षतु फलवत्यो नऽओषधयः पच्यन्ताँ योगक्षेमो नः कल्प्पताम्। ( 22/22 )**

ह्रीँ चतुर्मुखं चतुर्बाहुं सृष्टेरुत्पत्तिकारकम्।

सावित्रीस्वामिनं देवं ब्रह्माणं प्रणमाम्यहम्॥

ॐ ब्रह्मणे नमः स्वाहा।

6. **इन्द्रः - ॐ सजोषाऽइन्द्र सगणो मरुद्भिः सोमम्पिब वृत्रहा शूर विद्वान्।**

**जहि शत्रूँ? रपमृधो नुदस्वाथाभयं कुणुहि विश्वतो नः॥ ( 7/37 )**

ह्रीँ स्वर्गाधिपं शचीनाथं देवानां प्रभुमीश्वरम्।

त्रैलोक्याधिपतिं वन्दे देवेन्द्रं लोकपालकम्॥

ॐ इन्द्राय नमः स्वाहा।

7. **यमः - ॐ शँयमाय त्वाङ्गिरस्वते पितृमते स्वाहा।**

**स्वाहा घर्माय स्वाहा घर्मः पित्रे॥ ( 38/1 )**

ह्रीँ दण्डहस्तो महागूढः पाशपाणिर्भयानकाः।

कृष्णवर्णो महाभीमः यमराजश्च धर्मधृक् ॥

ॐ यमाय नमः स्वाहा।

8. **कालः - ॐ कार्षिरसि समुद्रस्य त्त्वा क्षित्त्याऽउन्नयामि।**

**समापोऽअद्भिरग्मतसमोषधीभिरोषधीः॥ ( 6/28 )**

ह्रीँ कालः करालवदनः नित्यं चैव विभूषितः।

पाशधारी दण्डहस्तः सर्पवृश्चिकरोमवान्॥

ॐ कालाय नमः स्वाहा।

**9. चित्रगुप्तः - ॐ चित्रावसो स्वस्ति ते पारमशीय। ( 3/18 )**

ह्रीँ चित्रगुप्त नमस्तुभ्यं यमराजसहायकृत्।

पुस्तकालोकनपरं चित्रकेतुं नमाम्यहम्॥

ॐ चित्रगुप्ताय नमः स्वाहा।

**॥ प्रत्यधिदेवताः ॥**

**1. अग्निः - अग्निन्दूतम्पुरोदधे हव्यवाहमुपब्रुवे।**

**देवाँ२ऽआसदयादिह॥ ( 22/7 )**

ह्रीँ यागस्थितोऽक्षसूत्रश्चः सप्तर्षिः शक्तिधारकः।

वह्निस्थं च वरेणास्यां करमन्यं तु कारयेत्॥

ॐ अग्नये नमः स्वाहा।

**2. आपः - आपो हिष्ठा मयोभुवस्ता नऽऊर्ज्जे दधातन।**

**महेरणाय चक्षसे॥ ( 36/14 )**

ह्रीँ आपः स्त्रीरूपधारिण्यः श्वेता मकरवाहनाः।

दधानाः पाशकलशौ मुक्ताभरणभूषिताः॥

ॐ अद्भ्यो नमः स्वाहा।

**3. पृथिवी - ॐ स्योना पृथिवि नो भवानृक्षरा निवेशनी।**

**यच्छा नः शर्म सप्प्रथाः॥ ( 36/13 )**

ह्रीँ शुक्लवर्णां महीं नित्यां दिव्यां कनकभूषितां।

चतुर्भुजां सौम्यवर्णां चन्द्रांशुसदृशोऽम्बराम्॥

ॐ पृथ्व्यै नमः स्वाहा।

**4. विष्णुः - ॐ इदँ विष्णुर्व्विचक्रमे त्रेधा निदधे पदम्।**

**समूढमस्य पाᳬसुरे स्वाहा॥ ( 5/15 )**

ह्रीँ रत्नपात्रं सस्यपात्रं पात्रमौषधिसंस्थितम्।

करे पद्मं च कर्तव्यं भूयो यादववंदनम्॥

ॐ विष्णवे नमः स्वाहा।

**5. इन्द्रः - ॐ त्रातारमिन्द्रमवितारमिन्द्रᳬ हवे हवे सुहवᳬशूरमिन्द्रम्।**

**ह्वयामि शक्रं पुरुहूतमिन्द्रᳬस्वस्ति नो मघवा धात्विन्द्रः॥ ( 20/50 )**

ह्रीँ गजारूढश्चतुर्दन्तः वज्रहस्तः शचीपतिः।

देवदेवो जगद्धर्ता इन्द्राय सुव्रते नमः॥

ॐ इन्द्राय नमः स्वाहा।

6. **इन्द्राणी - ॐ अदित्यै रास्नासीन्द्राण्याऽउष्णीषः।**

**पूषासि धर्म्मा यदीष्व॥ ( 38/3 )**

ह्रीँ द्विभुजां वरदां चैव गजारूढां महेश्वरीम्।

इन्द्राणीं पतिसंयुक्तां शचीमावाहयाम्यहम्॥

ॐ इन्द्रण्यै नमः स्वाहा।

7. **प्रजापतिः - ॐ प्रजापते नत्वदेतान्यन्यो विश्वा रूपाणि परिता बभूव।**

**यत्कामास्ते जुहुमस्तन्नोऽअस्तु वयꣳस्याम पतयो रयीणाम्॥ ( 23/64 )**

ह्रीँ प्रजापते इहागच्छ प्रजां च परिपालय।

धनधान्यादिसमृद्धिं कुरु त्वं च जगत्पते॥

ॐ प्रजापतये नमः स्वाहा।

8. **सर्पाः - नमोस्तु सर्पेभ्यो ये के च पृथिवीमनु।**

**येऽअन्तरिक्षे ये दिवि तेभ्यः सर्प्पेभ्यो नमः॥ ( 13/6 )**

ह्रीँ अक्षसूत्रधराः सर्पाः कुण्डिका पुच्छसंयुता।

एकभोगस्त्रिभोगा वा सर्पाश्चैव सुभूषणाः॥

ॐ सर्पेभ्यो नमः स्वाहा।

9. **ब्रह्मा - ॐ ब्रह्मज्ञानं प्रथमं पुरस्ताद्विसीमतः सुरुचो व्वेनऽआवः।**

**सबुध्न्याऽउपमाऽअस्य व्विष्ठाः शतश्च योनिमसश्च विवः॥ ( 13/3 )**

ह्रीँ पद्मासनस्थो जटिलः चतुर्वेदधरः सदा।

कृष्णाजिनधरा नित्यं ब्रह्मा शुभ्रवपश्च यः॥

ॐ ब्रह्मणे नमः स्वाहा।

॥ पञ्च लोकपालाः॥

1. **गणपतिः -ॐ गणानान्त्वा गणपतिꣳ हवामहे प्रियाणान्त्वाप्रियपतिꣳ हवामहे निधीनान्त्वा**

**निधिपतिꣳहवामहेव्वसोमम। आहमजानि गर्भधमात्त्वमजासि गर्भधम्॥ ( 23/9 )**

ह्रीँ पार्वतीशिवसत्पुत्रं गणानां पतिमीश्वरम्।

सर्वेषां विघ्नहर्तारं गणेशं तं नमाम्यहम्॥

ॐ गणपतये नमः स्वाहा।

2. **दुर्गा - ॐ अम्बेऽअम्बिकेम्बालिके न मानयति कश्चन।**

**ससस्त्यश्वकः सुभद्रिकाम्काम्पीलवासिनीम्॥ ( 23/8 )**

ह्रीँ जगत्कल्याणसंकर्त्री दुष्टदैत्यविनाशिनीम्।

सर्वेषां मातरं नित्यं दुर्गादेवीं नमाम्यहम्॥

ॐ दुर्गायै नमः स्वाहा।

3. **वायुः - ॐ व्वायो ये ते सहस्त्रिणो रथासस्तेभिरागहि।**

**नियुत्वान्सोम पीतये॥ ( 27/32 )**

ह्रीँ अनेकरूपभेदेन प्राणीनां जीवनं परम्।

सर्वत्र संचरन्तं तं वायुं वन्दे ह्यरूपकम्।

ॐ वायवे नम: स्वाहा।

4. आकाशम् –**ॐ घृतं घृतपावान: पिबत वसां वसां पावान: पिबतान्तरिक्षस्य हविरसि स्वाहा।**

**दिश: प्रदिशऽ आदिशो विदिशऽ उद्दिशो दिग्भ्य: स्वाहा॥ (6/19)**

ह्रीँ निरूपं निर्विकारं च सर्वत्र व्यापकं सदा।

ब्रह्मस्वरूपमज्ञेयमाकाशं प्रणमाम्यहम्॥

ॐ आकाशाय नम: स्वाहा।

5. **अश्विनौ - ॐ या वांकशा मधुमत्याश्विना सूनृतावती। तया यज्ञं मिमिक्षतम्॥ (7/11)**

ह्रीँ अश्विन्यश्व स्वरूपाक्त संज्ञा सूर्यसुतौ परौ।

देवानां भिषजौ वन्दे ह्याश्विनौ युग्मरूपकौ॥

ॐ अश्विभ्यां नम: स्वाहा।

**॥ वास्तुक्षेत्रपालौ ॥**

1. **वास्तोष्पति: - ॐ वास्तोष्पते प्रतिजानीह्यस्मान्स्वावेशोऽअनमीवो भवान:।**

**यन्त्वेमहे प्रतितन्नो जुषस्व शन्नो भव द्विपदे शं चतुष्पदे॥**

ह्रीँ गृहेशं शिवकर्तारं गृहे स्थित्वा निरन्तरम्।

धनधान्यप्रदातारं वन्दे वास्तोष्पतिं सदा॥

ॐ वास्तोष्पतये नम: स्वाहा।

2. **क्षेत्रपाल: - ॐ न हि स्पशमविदन्नन्यमस्माद्वैश्वानरात्पुरऽएतारमग्ने:।**

**एमेनमवृद्धन्नमृताऽअमर्त्त्यं वैश्वानरं क्षैत्रजित्याय देवा: । (33/60)**

ह्रीँ क्षेत्रपालं गणाधीशं चत्वराधिष्ठितं सदा।

पूजासौख्यप्रदं नित्यं क्षेत्रपालं नमाम्यहम्॥

ॐ क्षेत्रपालाय नम: स्वाहा।

**॥ इन्द्रादिदश दिक्पाला: ॥**

1. **इन्द्र: - ॐ त्रातारमिन्द्रमवितारमिन्द्रꣳहवे हवे सुहवꣳशूरमिन्द्रम्।**

**ह्वयामि शक्रं पुरुहूतमिन्द्रꣳस्वस्तिनो मघवा धात्विन्द्र:॥ (20/50)**

ह्रीँ वज्रायुधं देवदेवं पूर्वदिक्पालकं सदा।

अनेकयज्ञकर्तारं इन्द्रं वन्दे सुरेश्वरम्॥

ॐ इन्द्राय नम: स्वाहा।

2. **अग्नि: - ॐ त्वन्नोऽअग्ने तव देव पायुभिर्मघोनो रक्ष तन्वश्च वन्द्य।**

**त्राता तोकस्य तनये गवामस्य निमेषꣳरक्षमाणस्तव व्रते॥ (34/13)**

ह्रीँ आग्नेयदिक्प्रभुं दीप्तं शक्तिप्रहरणं परम्।

ज्वालाव्याप्ततनुं वन्दे ह्यग्निं लोकशुभंकरम्॥

ॐ अग्नये नम: स्वाहा।

3. **यमः - ॐ यमाय त्वाङ्गिरस्वते पितृमते स्वाहा।**
**स्वाहा घर्माय स्वाहा घर्मः पित्रे॥ ( 38/9 )**

ह्रीँ सर्वप्राणिनियन्तारं याम्यदिक्पतिमीश्वरम्।
महादण्डधरं देवं यमं तं प्रणमाम्यहम्॥
ॐ यमाय नमः स्वाहा।

4. **निर्ऋतिः - ॐ असुन्वन्तमयजमानमिच्छस्तेनस्येत्यामन्विहि तस्करस्य।**
**सा तऽइत्त्या नमो देवि निर्ऋते तुभ्यमस्तु॥ ( 12/62 )**

ह्रीँ राक्षसाधिपतिं शूरं नैर्ऋत्याधीशमीश्वरम्।
खड्गप्रहरणं वन्दे निर्ऋतिं लोकरक्षकम्॥
ॐ निर्ऋतये नमः स्वाहा।

5. **वरुणः - ॐ तत्त्वा यामि ब्रह्मणा वन्दमानस्तदाशास्ते यजमानो हविर्भिः।**
**अहेडमानो व्वरुणे ह बोध्युरुशꣳसमानऽआयुः प्रमोषीः॥ ( 18/41 )**

ह्रीँ पाशायुधधरं देवं प्रतीचीदिक्प्रपालकम्।
सर्वेषां जीवनं वन्दे वरुणं यादसां पतिम्॥
ॐ वरुणाय नमः स्वाहा।

6. **वायुः - ॐ आनो नियुद्भिः शतिनीभिरध्वरꣳसहस्त्रिणीभिरूपया हि यज्ञम्।**
**व्वायोऽअस्मिन्त्सवने मादयस्य यूयं पात स्वस्तिभिः सदा नः॥ ( 27/28 )**

ह्रीँ इन्द्रकृतानेकरूपं दितिसंभूतमद्भुतम्।
वायव्यदिक्प्रभुं वन्दे वायुमंकुशधारिणम्॥
ॐ वायवे नमः स्वाहा।

7. **सोमः - ॐ व्वयꣳसोम व्व्रते तव मनस्तनूषु बिभ्रतः।**
**प्रजावन्तः सचेमहि॥ ( 3/56 )**

ह्रीँ नक्षत्राणां च सर्वेषां सोमो राजा प्रकीर्तितः।
गदाधारिन् नमस्तुभ्यं सोमराजं नमोऽस्तुते॥
ॐ सोमाय नमः स्वाहा।

8. **ईशानः - ॐ तमीशानं जगतस्तस्थुषस्पतिन्धियन्जिन्वमवसे हूमहे व्वयम्।**
**पूषानो यथा व्वेदसामसद्वृधे रक्षिता पायुरदब्धः स्वस्तये॥ ( 25/18 )**

ह्रीँ ऐशान्याधिपतिं देवं सर्वदेवसुसेवितम्।
सर्वेश्वरेश्वरं वन्दे शूलधारिणमीश्वरम्॥
ॐ ईशानाय नमः स्वाहा।

9. **ब्रह्माः - ॐ अस्मेरुद्रामेहना पर्व्वतासो वृत्रहत्त्यै भरहूतौ सजोषाः।**
**यः शꣳशतेस्तुवते धायिपज्ञऽइन्द्र जयेष्ठाऽअस्माँ २ अवन्तु देवाः॥ ( 33/50 )**

ह्रीँ ऊर्ध्वदिक्पालकं लोकसृष्टिविधायकम्।
पितामहं प्रभुं देवं ब्रह्माणं प्रणमाम्यहम्॥
ॐ ब्रह्मणे नमः स्वाहा।

**10. अनन्तः - ॐ स्योना पृथिवि नो भवानृक्षरा निवेशनी।**

**यच्छा नः शर्म सप्रथाः॥ ( 36/13 )**

ह्रीँ सर्वकल्याणकर्तारं कणामण्डलमण्डितम्।

अधोदिक्पालकं दिव्यं ह्यनन्तं प्रणमाम्यहम्॥

ॐ अनन्ताय नमः स्वाहा।

**स्वाध्यायः**

**1. प्रदत्तविकल्पेभ्यः योग्यविकल्पं चित्वा उत्तरं यच्छत।**

(1) अर्कः कस्य देवस्य समित् वर्तते?

(क) सूर्यस्य (ख) चन्द्रस्य (ग) भौमस्य (घ) बुधस्य

(2) ग्रहाः किं किं प्रयच्छन्ति?

(क) धनम् (ख) धान्यम् (ग) पशुः (घ) राज्यम्

(3) प्रत्यधिदेवानां संख्या कति?

(क) 9 (ख) 8 (ग) 12 (घ) 14

(4) चित्रगुप्तस्य मन्त्रः कः?

(क) चित्रावसो (ख) आपो (ग) आकृष्णेन (घ) स्वस्ति

(5) लोकपालाः कति सन्ति?

(क) 6 (ख) 5 (ग) 2 (घ) 4

**2. अधोलिखितानां प्रश्नानाम् उत्तरं यच्छत।**

(1) होमतन्त्रे प्रथमः होमः कस्य भवति?

(2) कस्य मनसा उच्चारणं कर्तव्यम्?

(3) आघाराहुतिः कति संख्याका वर्तते?

(4) द्रव्यत्यागसंकल्पे कति हवनीयद्रव्याणि सन्ति?

(5) वराहुतिहोमे कस्य देवस्य आहुतिः अस्माभिः दीयते?

(6) नवग्रहाणां नामानि लिखन्तु।

(7) दिक्पालाः कति सन्ति? तेषां नामानि लिखन्तु?

**शिक्षक-प्रवृत्तिः**

छात्राः क्रमशः होमतंत्रविषये जानीयुः।

**छात्रप्रवृत्तिः**

अध्यापकः होमतंत्रविषये ज्ञापयेत्।

**सूक्तिः - शिक्षा क्षयं गच्छति कालपर्ययात् सुबद्धमूलानि पतन्ति पादपाः।**
**जलं जलस्थानगतं च शुष्यति हुतं दत्तं च तथैव तिष्ठति॥**

# 11. उत्तर-तन्त्रम्

**प्रस्तावना :**

यज्ञकर्मणि यज्ञपूर्तिकालीनं तन्त्रमुत्तरतन्त्रम् उच्यते। उत्तरतन्त्रस्य कानिचन अङ्गानि सन्ति। यथा-

**पूजा स्विष्टं नवाहुत्यो बलिः पूर्णाहुतिस्तथा।**

**श्रेयः सम्पाद्यदानञ्च ह्याभिषेको विसर्जनम्॥**

परमत्र नास्ति विदुषां मतैक्यम्। कल्पद्रुमानुसारम् अत्र केचन नवाहुतिहोमान्तं यावत् उत्तर-पूजनतन्त्रं मन्यते, अपरे च यजमानाभिषेकं यावत्। परमत्र सर्वे स्वपरम्परानुसारम् उत्तरतन्त्रं कुर्वन्ति।

अत्र उत्तरतन्त्रे आवाहितस्थापितदेवतानां मृडाग्नेश्च एकतन्त्रेण सत्यवकाशे पृथक्मन्त्रेण च यथोपचारैः पूजनं भवति। अयं होमः ग्रहहोमान्तसंचितेन हवनीयद्रव्येण अथवा नष्टे दुष्टे वा द्रव्ये आज्येनापि विधीयते। तदनु नवाहुतयो भवन्ति।

---

याज्ञिकसंप्रदायात् प्रथमो ग्रहेभ्यः फलहोमः। फलानि सच्छिद्राणि खण्डितानि घृताक्तानि वा जुहुयात्।

देवता फलम् मन्त्राः

सूर्यः द्राक्षा - **ॐ आकृष्णेन रजसा व्वर्त्तमानो निवेशयन्नमृतं मर्त्यञ्च।**
**हिरण्ययेन सवितारथेना देवो जाति भुवनानि पश्यन्॥** सूर्याय स्वाहा॥

चन्द्रः इक्षु - **ॐ इमन्देवाऽअसपत्नꣳसुवध्वं महते क्षत्राय महते जानराज्यायेन्द्रस्येन्द्रियाय।**
**इमममुष्यपुत्रममुष्यै पुत्रमस्यै विशएष वोऽमीराजा सोमोऽस्माकं ब्रह्मणानाꣳ राजा॥**
चन्द्रमसे स्वाहा॥

भौमः पूगीफलम् - **ॐ अग्निर्मूर्धादिवः ककुत्पतिः पृथिव्या अयम्।**
**अपाꣳरेताꣳसि जिन्वति॥** भौमाय स्वाहा॥

बुधः नारिङ्गम् - **ॐ उद्बुध्यस्वाग्ने प्रतिजागृहि त्वमिष्टापूर्ते सꣳसृजेथामयञ्च।**
**अस्मिसन्धस्थेऽअध्युत्तरस्मिन् विश्वेदेवा यजमानश्च सीदत्॥**बुधाय स्वाहा॥

गुरुः जम्बीरम् - **ॐ बृहस्पतेऽअतिअदर्योऽअर्हाद्युमद्विभातिक्रतुमज्जनेषु।**
**यद्दीदयच्छव्वसऽऋतप्रजा ततदस्मासु द्रविणं धेहि चित्रम्॥**बृहस्पतये स्वाहा॥

शुक्रः बीजपूरकम् - **ॐ अन्नात्परिश्रुतो रसं ब्रह्मणा व्यपिबत्क्षत्रं पयः सोमं प्रजापतिः।**
**ऋतेन सत्यमिन्द्रियं विपानꣳशुक्रमन्धसऽ इन्द्रस्येन्द्रियमिदं पयोऽमृतं मधु॥**
शुक्राय स्वाहा॥

शनिः उत्तती - **ॐ शन्नो देवीरभिष्टयऽआपो भवन्तु पीतये। शन्नोरभि स्त्रवन्तु नः॥**
शनैश्चराय स्वाहा॥

राहु: नारिकेलखण्डम् - **ॐ कया निश्चत्र ऽआ भुवदूती सदा वृध: सखा। कया शचिष्ठया वृता॥**

राहवे स्वाहा॥

केतु: दाडिमम् - **ॐ केतुङ्कृण्वन्नकेतवे पेशो मर्याऽअपेशसे। समुषद्भिरजायथा:** ॥ केतवे स्वाहा॥

**अथ सङ्कल्प: -**

**गुग्गलहोम: - हस्ते जलमादाय**

ॐ अद्यपूर्वोच्चारित...तिथौ मम गृहे भूतप्रेतपिशाचदोषपरिहारार्थं त्र्यम्बकमंत्रेण गुग्गलहोमम् अहं करिष्ये।

**ॐ त्र्यम्बकं यजामहे सुगन्धिं पुष्टिवर्द्धनम्। उर्व्वारुकमिव बन्धनान्मृत्योर्मुक्षीय मामृतात्॥**

ह्रीं मृत्युञ्जय महादेव त्राहि मां शरणागतम्। जन्ममृत्युजराव्याधिपीडितं कर्मबन्धनै:॥

इदं रुद्राय न मम॥ (उदकस्पर्श:)॥

**सर्षपहोम: - हस्ते जलमादाय**

सर्षपान् घृतेनाभिघार्य तत: ॐ अद्यपूर्वोच्चारित..... तिथौ मम गृहे सर्वारिष्टपरिहारार्थं सर्वशत्रुबलक्षयार्थं सर्षपहोमम् अहं करिष्ये।

**ॐ सजोषाऽ इन्द्र सगणो मरुद्भि: सोमं पिब वृत्रहा शूरविद्वान्। जहि शत्रून् १ रप मृधो नुदस्वाथा भयं कुणुहि विश्वतो न:॥**

ह्रीं सर्वाबाधाप्रशमनं त्रैलोक्यस्याखिलेश्वरी। एवमेव त्वया कार्यमस्मदैरिविनाशनम्।

स्वाहा इदम् इन्द्राय न मम। (उदकस्पर्श:)॥

**लक्ष्मीहोम: - हस्ते जलमादाय**

ॐ अद्यपूर्वोच्चारित...तिथौ मम सकुटुम्बस्य सकलदु:दारिद्रय दौर्भाग्य अलक्ष्मीनिवृत्तिपूर्वकं सकलसुखसौभाग्यदशविधलक्ष्मीप्राप्तये फलेनाज्येन च लक्ष्मीहोमम् अहं करिष्ये।

**ॐ श्रीश्चते लक्ष्मीश्चपत्न्क्या वहोरात्रे पार्श्वे नक्षत्राणि रूपमनिश्वनौ व्यात्तम्।**
**इष्णान्निषाण मुम्म इषाण सर्वलोकं मऽ इषाण॥**

ह्रीं या देवी सर्वभूतेषु लक्ष्मीरूपेण संस्थिता।
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नम:॥

**ॐ याम्मेधान्देवगणा: पितरश्चोपासते।**
**तया मामद्य मेधयाग्ने मेधाविनं कुरु स्वाहा॥**

**ॐ मेधाम्मे व्वरुणो ददातु मेधामग्नि: प्रजापति:।**
**मेधामिन्द्रश्च व्वायुश्च मेधान्धाता ददातु मे स्वाहा॥**

**ॐ इमम्मे ब्रह्म च क्षत्रञ्चोभे श्रियमश्नुताम्।**
**मयिदेवा दधातु श्रिश्रयमुत्तमान्तस्यै ते स्वाहा॥**

**ॐ श्रीणामुदारो धरुणो रयीणाम्मनीषाणार्म्प्रापण: सोम गोपा:।**
**व्वसु: सूनु: सहसोऽअप्सुराजा विभात्यग्रऽउपसाभिधान: स्वाहा॥( उदकस्पर्श: )॥**

तत: आज्येन श्रीसूक्तस्य प्रत्येक-मंत्रस्य होमं कुर्यात्।

**व्याहृतिहोमः-**

हस्ते जलमादाय अस्मिन् ग्रहशान्तायख्ये कर्मणि देशतः कालतस्तन्त्रतोमन्त्रतो वा ज्ञानतोऽज्ञानतो वा अयथाकरणन्यूनकरणचतुर्विधकर्मातिरिक्तकरणभेषजजातप्रत्यवायपरिहारद्वारा कर्मसाद्गुण्यसिद्धये तथा प्रधानदेवताग्न्योश्च मध्ये गमने तथा समिदाज्यचरुतिलादिहविषां मध्ये अन्यतमस्याभावे होमस्वाहाकारयोः पूर्वापराभावे अग्निमध्ये हविर्गतकीटाद्युपघाते प्रणीताग्न्योर्मध्येगमने प्रणीतास्कन्देन इध्मपरिस्तरणादिदाहे कुण्डाद्बहिरग्निपतने समिच्चरुतिलाज्यमध्ये कृमिकीटकादिसंयोगे होममन्त्रपठनसमये स्वरवर्णादिविस्मृतौ देवतावदानमन्त्रतन्त्रकर्मविपर्यासमक्षिकाकीटकेशादिभिर्हविर्दुष्टदग्धपाकहितस्थाने होमाकरणादि ज्ञाताज्ञातदोष परिहार्थम् घृताक्तकृष्णतिलद्रव्येण व्यस्तसमस्तव्याहृत्या अष्टोत्तरसहस्रैरष्टाविंशतिभिराहुतिभिर्वा होमं करिष्ये।

पुनर्जलमादाय - **भूर्भुवः स्वरितितिसृणां महाव्याहृतीनां प्रजापतिः ऋषिःगायत्र्युष्णिगनुष्टुछन्दांसि क्रमेण अग्निवायुसूर्या देवताः सर्वेषां वा प्रजापतिर्देवता** सर्वप्रायश्चित्त्थोमे विनियोगः।

1. ॐ भूः स्वाहा।
2. ॐ भुवः स्वाहा।
3. ॐ स्वः स्वाहा।

एवं सप्तवारं होमे अष्टावंशत्याहुतयो भवन्ति। सप्तविंशतिवारं होमे अष्टोत्तराहुतयो भवन्ति। द्विपञ्चाशदधिकशतद्वयाहुतिहोमे (252) अष्टोत्तरसहस्त्राहुतयः अपि दातुं शक्यते।

अथवा ह्रीं अग्निवायुसूर्येभ्यः स्वाहा इति मंत्रस्यापि अष्टाविंशतिः, अष्टोत्तरशतं वा अष्टोत्तरसहस्राहुतयः अपि दातुं शक्यते।

## अथ उत्तरपूजनम्

प्रारब्धकर्मणः साङ्गतासिध्दयर्थं स्थापितदेवतानां पूजनं करिष्ये।

गणपतिपूजनम् ॐ गणानान्त्वा.... 0 ॐ भूर्भुवः स्वः महागणपतये नमः उत्तरपूजनार्थे सर्वोपचारार्थे गन्धाक्षतपुष्पाणि समर्पयामि।

**मातृकापूजनम् ॐ समख्ये देव्याधिया सन्दक्षिणयोरुचक्षसा।**
**मा म आयुः प्रमोषीर्मोऽअहन्तवव्वरं विदेय तव देवि सन्दृशि॥**
**ॐ व्वसोः पवित्रमसि शतधारं व्वसोः पवित्रमसि सहस्त्रधारम्।**
**देवस्त्वासवितापुनातुव्वसोः पवित्रेणशतधारेण सुप्पवा कामधुक्षः॥**

ॐ भूर्भुवःस्वः वसोर्धारासहित सगणेशगौर्याद्यावाहितमातृभ्यो नमः उत्तरपूजनार्थे सर्वोपचारार्थे गन्धाक्षतपुष्पाणि समर्पयामि।

**ग्रहदेवतानां पूजनम् - ॐ ग्रहाऽऊर्जाहुतयो व्यन्तोव्विप्रायमतिम्। तेषां व्विशिप्प्रियाणां व्वोहमिषमूर्जꣳसमग्रभमुपयामगृहीतोऽसीन्द्रायत्वा जुष्टं गृह्णाम्येषते योनिरिन्द्रायत्वा जुष्टतमम्॥**

ॐ भूर्भूवः स्वः महारुद्रसमन्वितसूर्याद्यावाहितग्रहमण्डलदेवताभ्यो नमः उत्तरपूजनार्थे सर्वोपचारार्थे गन्धाक्षत-पुष्पाणि समर्पायामि।

**ब्रह्मा अग्निपूजनम् -**

**ॐ ब्रह्मजज्ञानं प्रथमं पुरस्ताद्विसीमतः सुरुचोव्वेन ऽआवह।**

**सबुध्न्याऽउपमाऽअस्य विष्ठाः सतश्च योनिमसतश्च विवः॥**

**ॐ अग्नयेनसुपथारायेऽअस्मान्विश्वानिदेवव्वयुनानिविद्वान्।**

**युयोध्यमज्जुहुराणमेनो भूयिष्ठान्ते नमऽ उक्तिं व्विधेम।**

ॐ भूर्भुवः स्वः ब्रह्माग्निभ्यां नमः उत्तरपूजानार्थे सर्वोपचारार्थे गन्धाक्षतपुष्पाणि समर्पयामि।

ततः गणपत्यादिस्थापितदेवताभ्यो नमः पंचोपचारैः संपूज्य नैवेद्यं निवेदयेत् अग्नये नमः

पंचाज्याहुतिं दद्यात्।

ॐ प्राणाय स्वाहा

ॐ अपानाय स्वाहा

ॐ व्यानाय स्वाहा

ॐ उदानाय स्वाहा

ॐ समानाय स्वाहा

स्थापितदेवताभ्यो नमः शेषोपचारार्थे नमस्कारः। अनया पूजया गणपत्यादिस्थापितदेवाः प्रीयन्तां न मम॥

## अथ स्विष्टकृतहोमः

हविः शेषोत्तरार्धात् द्विर्द्विरवदानधर्मेणावधार्य द्विरभिधार्य ब्राह्मणा अन्वारब्धः जुहुयात् -

ॐ अग्नये स्विष्टकृते स्वाहा, इदमग्नये स्विष्टकृते न मम।

स्विष्टकृद्धोमे नवाहुतयः।

ग्रहहोमानन्तरं शुचिमध्ये स्थापितं समिच्चरुतिलाज्यादिहविः यजमानः वा आचार्यो वा ब्रह्मा

सोपयमनकुशं ब्रह्मणा अन्वारब्धः हविः शेषपूरितां शुचिमादाय जुहुयात्।

ॐ अग्नये स्विष्टकृते स्वाहा - इदमग्नये स्विष्टकृते न मम।

(इति त्यागः, संस्रवश्च, अस्या आहुते रुद्रदेवताकत्वात् उदकोपस्पर्शः)

ततः स्रुवेण आज्येन वा नवाहुतयो जुहुयात्।

**नवाहुतयः -**

1. ॐ भूः स्वाहा इदमग्नेय न मम।
2. ॐ भुवः स्वाहा इदं वायवे न मम।
3. ॐ स्वः स्वाहा इदं सूर्याय न मम।
4. **ॐ त्वं न ो अग्ने व्वरुणस्य विद्वान् देवस्य हेडोऽअवयासिसीष्ठाः। यजिष्ठो व्वह्नितमः शोशुचानो विश्वाद्वेषाꣳसिप्रमुमुग्ध्यस्मत् स्वाहा।** इदमग्निवरुणाभ्यां न मम।
5. **ॐ सत्वन्नोऽ अग्नेवमोभवोतीने दिष्टोऽ अस्याऽ उषसो व्युष्टौ। अवयक्ष्वनो वरुणꣳ रराणो व्वीहिमृडीकꣳ सुहवो न एधि स्वाहा।** इदमग्निवरुणाभ्यां न मम।

6. **ॐ अयाश्चाग्नेस्यनभिशस्तिपाश्चसत्यमित्वमयाऽअसि अयानो जज्ञं वहास्ययानो धेहि भेषजङ्ग स्वाहा** - इदमग्नये अयसे न मम।

7. **ॐ येते शतं वरुण ये सहस्त्रं यज्ञियाः पाशा वितता महान्तः। तेभिर्नोऽअद्य सवितोतविष्णुर्विश्वे मुचन्तु मरुतः स्वर्काः** - स्वाहा। इदं वरुणाय सवित्रे विष्णवे विश्वेभ्यो देवेभ्यः स्वर्केभ्यश्च न मम।

8. **ॐ उदुत्तमं वरुणपाशमस्मदवाधमं विमध्यमछश्रथाय। अथा वयमादित्यव्रते तवानागसोऽअदितये स्याम-स्वाहा।** इदं वरुणायादित्यादितये च न मम।

9. ॐ प्रजापतये स्वाहा (उपांशुः) इदं प्रजापतये (उपाशुंः) न मम।

**शब्दार्थाः**

**घृताक्तः** घृतयुक्तः **अन्वारब्धः** स्पशः **ईक्षुः** ईक्षुदण्डः(गन्ना, शेरडी-इति भाषायाम्), **दाडिमम्** दाडिमफलम् **खण्डितानि** खण्डः **श्रेयसे** कल्याणाय **जम्बीरम्** निम्बफलम् (गध्धालीम्बु इति भाषायाम्) **उतत्ती** पद्मबीव्यानि (कमलकाकडी) वा खर्जुरिका (खारेक)॥

**स्वाध्यायः**

**1. अधोलिखितानां प्रश्नाम् उत्तराणि लिखत।**

(1) द्राक्षा कस्य ग्रहस्य आहुतिफलम् अस्ति?

(2) गुरोः आहूत्यां किं फलं होतव्यम्?

(3) शत्रुविनाशार्थं कस्य होमः भवति?

(4) त्र्यंबकमन्त्रस्य होमः किमर्थं भवति?

(5) व्याहृतिहोमं कथं क्रियते?

(6) व्याहृतिहोमे कति संख्याका आहुतयः सन्ति?

(7) स्विष्टकृतहोमः कदा भवति?

**2. एक वाक्येन उत्तरं यच्छत।**

(1) घृताकत इत्यस्य कोऽर्थः?

(2) अन्वारब्धः इत्यस्य कोऽर्थः?

(3) मंगलग्रहस्य किं फलम् आहुत्त्याम्?

(4) लक्ष्मीहोमद्रव्यं किमस्ति?

(5) सूर्यग्रहस्य आहुति फलं किं?

**शिक्षक-प्रवृत्तिः**

शिक्षकः छात्रेभ्य उत्तरतन्त्रमहत्त्वं ज्ञापयेत्, प्रायोगिकं ज्ञानञ्च दद्यात्।

**छात्रप्रवृत्तिः**

उत्तरतन्त्रगतमन्त्राणां कण्ठस्थीकरणं कुर्युः।

सूक्तिः - **यत्करोषि यदश्नासि यज्जुहोषि ददाति यत्।**
**यत्तपस्यसि कौन्तेय तत्कुरुष्व मदर्पणम्॥**

●

# 12. बलिदानम्

**प्रस्तावना**

देवता: पूजनार्चनेन सदक्षिणाकं भोजनरूपबलिग्रहणेन तृप्ता: प्रसन्ना: च भवन्ति। विशेषत: देवीयज्ञे बलिदानं समधिकं महत्त्वं भजते। उक्तञ्च साक्षात् भगवत्या सप्तशत्याम्-

**जानताजानता वापि बलि पूजां तथा कृताम्।**

**प्रतीच्छिष्याम्यहं प्रीत्या वह्निहोमं तथा कृतम्॥ इति**

अत: अस्माभि: गृहे क्रियमाणे शुभकर्मणि देवतानां प्रसन्नचित्तेन पूजनं षोडशोपचारै: क्रियते। तेन देवा: प्रसन्ना: भवन्ति। तथा कर्मान्ते च स्वबलिभागं गृहीत्वा स्व-स्वस्थाने गच्छन्ति। चतुर्दिक्षु स्थितानां भूतप्रेतादियातुधानानां निराकरणं कुर्वन्ति। अस्मभ्यं च सुख-शान्ति-समृद्धि-आरोग्यदीर्घायुर्बलादिकञ्च अर्पयन्ति।

अत: देवेभ्य: साङ्गेभ्य: सपरिवारेभ्य: बलिप्रदानं भवति। तदस्मिन् पाठे बलिदानप्रयोग: प्रदर्श्यते।

---

**॥ हस्तेजलमादाय ॥**

प्रारब्धस्य ग्रहमखकर्मण: (वा अन्यस्य कस्यापि कर्मण:) सांगतासिद्धयर्थं दिक्पालदेवतानां स्थापितदेवतानां तथा कुष्मांडसहितं क्षेत्रपालदेवस्य पूजनपूर्वकं बलिदानमहं करिष्ये।

प्रतिकुण्डं दशदिक्षु आचार्य: कुण्डस्य दशदिक्षु मण्डपस्थानीयभागे बहिर्वा भूमौ दशदिक्पालबलीन् दधात्।

दशदिक्पालानां पृथक्पृथक् तन्त्रेण वा यथासमयं कार्यम्।

दशदिक्पालदेवतानां एकतन्त्रेण बलिदानम् -

**ॐ प्राच्यै दिशे स्वाहार्वाच्यै दिशे स्वाहा दक्षिणायै दिशे स्वाहाऽर्वाच्यै दिशे स्वाहा प्रतीच्यै दिशे स्वाहाऽर्वाच्यै दिशे स्वाहोदीच्यै दिशे स्वाहाऽर्वाच्यै दिशे स्वाहोर्ध्वायै दिशे स्वाहाऽर्वाच्यै दिशे स्वाहाऽर्वाच्यै दिशे स्वाहाऽर्वाच्यै दिशे स्वाहा।**

**॥ हस्तेगंधाक्षतपुष्पमादाय ॥**

इन्द्रादिदशदिक्पालान् सांगान् सपरिवारान् सायुधान् सशक्तिकान् एभिर्गन्धाद्युपचारैर्वोऽहं पूजयामि।

हस्ते जलमादाय - इन्द्रादिदशदिक्पालेभ्य: सांगेभ्य: सपरिवारेभ्य: सायुधेभ्य: सशक्तिकेभ्य: इमान् आसादितान् सदीपमाषभक्तबलीन् समर्पयामि। नमस्कुर्यात् भो भो इन्द्रादिदशदिक्पाला: दिशो रक्षत बलीन् भक्षत मम सकुटुम्बस्य अभ्युदयं कुरुत। आयुकर्तार: क्षेमकर्तार: शांतिकर्तार: पुष्टिकर्तार: तुष्टिकर्तार: निर्विघ्नकर्तार: कल्याणकर्तार: सुखदा: वरदा: भवत।

**जलमादाय** - अनेन पूजनपूर्वकबलिदानने इन्द्राद्रिदशदिक्पालदेवता: प्रीयन्ताम्।

**॥ स्थापितदेवतानां बलिदानम् ॥**

**(1) गणेशस्य - ॐ गणानान्त्वा गणपतिꣳहवामहे प्रियाणान्त्वा प्रियपतिꣳहवामहे निधीनान्त्वा निधिपतिꣳ हवामहे वसोमम। आहमजानि गर्भधमात्वमजासि गर्भधम्॥**

सिद्धिबुद्धिसहित-श्रीमन्महागणाधिपतिं सांगं सपरिवारं सायुधं सशक्तिकम् एभिर्गन्धाद्युपचारैस्त्वामहं पूजयामि।

( 2 ) **मातृणाम् - ॐ समख्ये देव्या धिया संदक्षिणयोरुचक्षसा। मामऽआयुः प्रमोषीर्म्मोऽअहन्तव व्वीरं व्विदेय तव देवि सन्दृशि॥**

**ॐ वसोः पवित्रमसि शतधारं वसोः पवित्रमसि सहस्त्रधारम्। देवस्त्वा सविता पुनातु वसोः पवित्रेण शतधारेण सुप्वा कामधुक्षः॥**

वसोर्धारा समन्वित सगणेशगौर्याद्यावाहितमातृः सांगाः सपरिवाराः सायुधाः सशक्तिकाः एभिर्गन्धाद्युपचारैः वः अहं पूजयामि।

( 3 ) **मंडपांगवास्तोः - ॐ वास्तोष्पते प्रतिजानी ह्यस्मान् स्वावेशो अनमीवो भवानः।**

**यत्त्वमहे प्रतितन्ना जुषस्वशन्नो भवद्विपदे शं चतुष्पदे॥**

मण्डलदेवता सहितं वास्तुपुरुषंसांगं सपरिवारं सायुधंसशक्तिकं एभिर्गन्धाद्युपचारैः वः अहं पूजयामि।

( 4 ) **प्रधानदेवतायाः - ॐ ब्रह्मजज्ञानं प्रथमं पुरस्ताद्विसीमतः सुरुचो वेन आवः।**

**सबुध्न्याऽउपमाऽअस्य विष्ठाः सश्च योनिमसतश्च विवः॥**

**ॐ इदं विष्णुर्विचक्रमेत्रेधानिदधे पदम्। समूढमस्य पाꣳ सुरे स्वाहा॥**

**ॐ नमः शम्भवाय च मयोभवाय च नमः शंकराय च मयस्कराय च नमः शिवाय च शिवतराय च॥**

**ॐ अम्बेऽअम्बिकेम्बालिके न मा नयति कश्चन। ससत्यश्वकः सुभद्रिकां कांपीलवासिनीम्॥**

मण्डलदेवतासहितां प्रधान देवतां सांगां सपरिवारां सायुधां सशक्तिकाम् एभिर्गन्धाद्युपचारैस्त्वामहं पूजयामि।

( 5 ) **ग्रहमण्डलदेवतानाम् - ॐ ग्रहा ऊर्जाहुतयो व्यन्तो विप्रायमतिम्। तेषां विशिप्रियाणां वोहमिखमूर्जꣳ समग्रभमुपयामगृहीतोऽसीन्द्रायत्वा जुष्टं गृहणाम्येषते योनिरिन्द्राय त्वा जुष्टतमम्॥**

ग्रहमण्डलदेवताः सांगाः सपरिवाराः सायुधाः सशक्तिकां एभिर्गन्धाद्युपचारैर्वोऽहं पूजयामि।

( 6 ) **योगिनीमण्डलदेवतानाम् - ॐ योगे योगे तवस्तरं वाजे वाजे हवामहे। सखाय इन्द्रमूर्तये॥**

महाकाल्यादिसहिताः अमुकयोगिनीः सांगाः सपरिवाराः सायुधाः सशक्तिकाः एभिर्गन्धाद्युपचारैर्वोऽहं पूजायामि।

( 7 ) **क्षेत्रपालदेवतानां (भैरव) - ॐ नहिस्पशमविदन्नन्यमस्माद् वैश्वानरात् पुर एतारमग्नेः। एमेनमवृधन्नमृता अमर्त्यं वैश्वानरं क्षैत्रजित्याय देवाः॥**

**ॐ योभूतानामधिपतिर्यस्मिल्लोकाऽअधिश्रिताः। य ईशे महतो महाँस्तेन गृह्णामि त्वामहं मयि गृहणामि त्वामहम्॥**

अजरादिसपरिवारक्षेत्रपालान् (श्रीमद्‌भैरवादि चुतःषष्टि भैरवान्) सांगान् सपरिवारान्सायुधान् सशक्तिकान् एभिर्गन्धाद्युपचारैर्वोऽहं पूजयामि। (इति संपूज्य एकतन्त्रेण बलिदानम्।)

**जलमादाय** - स्थापितदेवतासहितायै अमुकदेवतायै सपरिवारायै सायुधायै सशक्तिकायै नमः इमं सदीपमाषभक्तबलिं समर्पयामि।

**नमस्कुर्यात्** - भो भो स्थापितदेवतासहिते आवाहितदेवाः इमाम् सदीपमाषभक्तबलिं गृहाण मम सकुटुम्बस्य अभ्युदयं कुरुत। आयुः कर्तारः क्षेमकर्तारः शांतिकर्तारः पुष्टिकर्तारः निर्विघ्नकर्तारः कल्याणकर्तारः सुखदा वरदा भवत।

**हस्ते जलमादाय** - अनेन पूजनपूर्वकबलिदानेनस्थापितदेवतासहिता सपरिवारा अमुकदेवता: प्रीयन्तां न मम।

मण्डपादुत्तरे दुर्ब्राह्मणेन वा क्षुद्रेण चतुष्पथे बलिं निधाय यजमान:

**हस्ते जलमादाय** - मम सकुटुम्बस्य भूत-प्रेत-पिशाच-शाकिनी-डाकिनी-वेताल-ब्रह्मराक्षसादिजन्यसकलाधि-व्याधिनिवृत्तिपूर्वकं दीर्घायुरारोग्यप्राप्त्यर्थं चत्वरे क्षेत्रपालाय बलिदानमहं करिष्ये।

**अक्षतान् गृहीत्वा-ॐ नहिस्पशमविदनन्यामस्माद् वैश्वानरात् पुर एतारमग्ने:। एमेनमघन्नमृताऽअमर्त्यं वैश्वानरं क्षैत्रजित्याय देवा:॥**

ॐ भूर्भुव: स्व: भूतप्रेतसहितं क्षेत्रपालमावाहयामि। गन्धपुष्पादिभि: संपूज्य भूतप्रेतादिसहितं क्षेत्रपालं सांगं सपरिवारं सायुधं सशक्तिकम् एभिर्गन्धाद्युपचारै: त्वामहं पूजयामि। (कुष्माण्डं खड्गेनच्छेदयित्वा) हस्ते जलमादाय-भूत-प्रेत-पिशाच-शाकिनी-डाकिनी-वेतालादिसपरिवृताय क्षेत्रपालाय सांगाय सपरिवाराय सायुधाय सशक्तिकाय अमुं (कुष्माण्डसहितं सदीपमाषभक्त) बलिं समर्पयामि।

**प्रार्थयेत्** - **ॐ नम: क्षेत्रपाल त्वं भूतप्रेतगणै: सह।**

**आयुरारोग्यमैश्वर्यं सर्वदा देहि मे प्रभो॥**

भूतप्रेतदिसहित भो भो क्षेत्रपाल इमं (कुष्माण्डसहितम्) बलिं गृहाण मम सकुटुम्बस्य अभ्युदयं कुरु कुरु। आयु:कर्ता, क्षेमकर्ता, शान्तिकर्ता, पुष्टिकर्ता, तुष्टिकर्ता, निर्विघ्नकर्ता, कल्याणकर्ता, सुखदो वरदो भव।

**मा विघ्नं मा च मे पापं मा सन्तु परिपन्थिन:।**

**सौम्या: भवन्तु तृप्ताश्च भूतप्रेतसुखावहा:॥**

तत: बलिं परित: जलं क्षिप्त्वा पश्चादवलोकनम्।

ॐ हिंकाराय स्वाहा हिंकृताय स्वाहा क्रन्दते स्वाहाऽवक्रन्दाय स्वाहा प्रोथते स्वाहा प्रप्रोथाय स्वाहा गन्धाय स्वाहा घ्राताय स्वाहा निविष्टाय स्वाहोपविष्टाय स्वाहा सन्दिताय स्वाहा वल्गते स्वाहाऽसीनाय स्वाहा शयानाय स्वाहा स्वपते स्वाहा जाग्रते स्वाहाऽयनाय स्वाहा प्रायणाय स्वाहा॥

मण्डपादुत्तरे बलिदाने कृते चतुष्पथे निधाय अब्राह्मणेन बलौ नीयमाने तु तत्पश्चात् जलमासिच्य, पुनरागत्य हस्तौ पादौ प्रक्षाल्य मण्डपं प्रविशेत्।

### शब्दार्था:

**प्राच्यै** पूर्वदिशायाम् **प्रतीच्यै** पश्चिमदिशायाम् **चत्वरे** चतुष्पथे **कुष्माण्ड:** फलम् (कोळु-कद्दु इति भाषायाम्) **असि:** खड्ग: **व्याधि:** दु:खकम् **भक्तम्** अन्नम् **सायुधाय** शस्त्रसमन्विताय।

### स्वाध्याय:

**1. प्रदत्तविकल्पेभ्य: योग्यविकल्पं चित्वा उत्तरं यच्छत।**

(1) क्षेत्रपालस्य बलिदानं केन मन्त्रण भवति?

(क) नहि स्पश..... (ख) गणानान्त्वा..... (ग) प्राच्यैदिशे (घ) हिंकराय

(2) ''भक्तम्'' इति पदस्य कोऽर्थ: ?

(क) दुग्धम् (ख) अन्नम् (ग) दानम् (घ) ओदनम्

(3) चत्वरे अर्थात् किम्?

(क) गृहे (ख) चतुष्पथे (ग) प्रासादे (घ) नगरे

(4) भूत-प्रेत-पिशाचादिपरिवृतः कः?

(क) क्षेत्रपालः (ख) गणपतिः (ग) वाष्तोष्पतिः (घ) इन्द्रः

**2. निम्नाङ्कितानामुतराणि यच्छत।**

(1) बलिप्रदानेन कः लाभो भवति?

(2) दशदिशानां नामानि लिखत?

(3) दिक्पालाः कति सन्ति? तेषां नामानि लिखत।

(4) ब्रह्मणः स्थानं कुत्र भवति?

(5) पश्चिमनैऋत्ययोर्मध्ये कस्य देवस्य स्थानम् अस्ति?

(6) पश्चिमदिशायाः अधिष्ठाता देवः कः?

(7) क्षेत्रपालस्य बलिः कुत्र प्रदीयते?

**3. मन्त्राणां पूर्तिं कुरुत।**

(1) प्राच्यै दिशे.... (2) हिंकाराय स्वाहा.... (3) नहि स्पशम....

**शिक्षक-प्रवृत्तिः**

शिक्षकः बलिदानविषये मतान्तराणि प्रदर्शयेत्।

**छात्रप्रवृत्तिः**

बलिदानस्य महत्वं ग्रन्थान्तरेण अवधेयम्।

**सूक्तिः -** **बलिप्रदाने पूजायाम् अग्निकार्ये महोत्सवे।**
**स्मरन्ममैतच्चरितं नरो मुच्येत सङ्कटात्॥**

●

# 13. पूर्णाहुतिः

**प्रस्तावना**

यजमानः स्वकीयमनोकामनासिद्ध्यर्थम् एकदिनसाध्यं त्रिदिनसाध्यं पंचदिनसाध्यं यत् यज्ञादिकर्म करोति, तस्य पूर्तये नारिकेलफलेन फलान्तरेण वा मन्त्रोच्चारपूर्वकम् अग्नौ होमः विधीयते, सा क्रिया एव पूर्णाहुतिरिति शब्देन व्यवह्रिते।

वस्तुतः कस्यचिदपि शुभकर्मणः पूर्णाहुतिः न भवति, तथापि कलेर्दोषबहुत्त्वादिति पुराणवचनात् देशकालानुसारं यज्ञपरिसमाप्तिहेतवे कर्मणः पूर्णाहुतिः क्रियते। चतुष्पथे यजमानः क्षेत्रपालबलिं विसृर्ज्य प्रत्यागत्य हस्तौ पादौ च प्रक्षाल्य मन्त्रोच्चारपूर्वकं पूर्णाहुतिं जुहुयात्।

---

**पूर्णाहुतिः ॥ वसोर्धारा ॥**

तत्र उपकलपनीयानि आज्यस्थालिहोमावशिष्टादाज्यादन्यदाज्यं वैकंकतीस्रुक्खदिरः स्रुवः सम्मार्गकुशाः पवित्रे नारिकेलफलं ताम्बूलवीटकं पूगीफलं पट्टवस्त्रखण्डं रक्तसूत्रं पुष्पाणि पुष्पमाला च इत्येतान्युपकल्प्य यजमानः प्राङ्मुखो भूत्वा कुण्डसमीपे स्थित्त्वा-

**हस्ते जलमादाय-**

अद्य पूर्वोच्चारितुशुभपुण्यतिथौ कृतस्य गृहशांत्याख्यस्य कर्मणः संपूर्णतासिध्यर्थं वसोर्धारासमन्वितं पूर्णाहुतिहोमं करिष्ये।

इति संकल्प्य आज्यं निरूप्य अग्नौअधिश्रृत्य स्रुवं स्रुचं च प्रतत्य संमार्गकुशैः सम्मृज्य प्रणीतोदकेन अभ्युक्ष्य पुनः प्रतत्य अग्नेः पश्चिमतो याम्यायां निदध्यात्। आज्यमुद्वास्यपवित्राभ्यामुत्पूय अवेक्ष्य अपद्रव्यं निरस्य स्रुवेण चतुर्वारमाज्यं शुचिमध्ये प्रक्षिप्य शुचिं गृहीत्वा शिष्टाचारादस्यां सपूगीफलं तांबूलवीटकं निधाय तदुपरि रक्तवस्त्रेवेष्टितं रक्तसूत्रबन्धं पुष्पमालापरिवेष्टितं सिन्दूरादिभिः च अर्चितं नारिकेलफलं निधाय अधोमुखस्रुवच्छन्नां तां स्रुचमादाय वामहस्तातमानीय यजमानान्वारब्धः आचार्यः आसीन एव पुर्णाहुतिं जुहुयात्।

**ॐ समुद्रादूर्मिर्मधु माँ २ उदारदुपाꣳशुना सममृतत्त्वमानट्।**
**घृतस्य नाम गुह्यं यदस्ति जिह्वा देवानाममृतस्य नाभिः ॥ 1 ॥**
**वयं नाम प्रब्रवामा घृतस्यास्मिन्यज्ञे धारयामा नमोभिः।**
**उप ब्रह्मा श्रृणवच्छस्य मानं चतुः श्रृङ्गो वमीद्गौरऽएतत् ॥ 2 ॥**
**चत्त्वारि श्रृङ्गा त्रयोऽअस्य पादा द्वे शीर्षे सप्त हस्तासोऽअस्य।**
**त्रिधा बद्धो वृषभो रोरवीति महो देवो मर्त्त्यां २ आविवेश ॥ 3 ॥**
**त्रिधा हितं पणिभिर्गुह्यमानं गवि देवासोऽधृतमन्वविन्दन्।**
**इन्द्रऽ एकꣳसूर्य्यऽ एकञ्जजान वेनादेकꣳस्वधया निष्टतक्षुः ॥ 4 ॥**
**एताऽअर्षन्ति हृद्यात्समुद्राच्छतव्रजा रिपुणा नावचक्षे।**

घृतस्य धाराऽअभिचाकशीमि हिरण्ययो वेतसो मध्य ऽ आसाम् ॥ 5 ॥

सम्यक्स्रवन्ति सरितो नधेनाऽअन्तर्हृदा मनसा पूयमानाः।

एतेऽअर्षन्त्यूर्मयो घृतस्य मृगा ऽ इव क्षिपणो रीषमाणाः ॥ 6 ॥

सिन्धोरिव प्राध्वनेशूघनासोऽ वात प्रमियः पतयन्ति यह्वाः।

घृतस्य धाराऽअरुषो न वाजी काष्ठा भिन्दन्नूर्मिभिः पिन्वमानः ॥ 7 ॥

अभिप्रवन्तसमनेवयोषाः कल्ल्याण्ण्यः स्मयमानासोसअग्निम्।

घृतस्य धाराः समधिो न सन्तता जुषाणो हर्य्यति जातवेदः॥ 8 ॥

कन्या ऽ इव वहतु मे त वाऽ उ ऽ अञ्जयञ्जानाऽअभिचाकशीमि।

यत्र सोमः सूयते यत्र यज्ञो घृतस्य धाराऽ अभि तत्पवन्ते॥ 9 ॥

अभ्यर्षत सुष्टुतिङ्गव्यमाजिमस्मासुभद्रा द्रविणा निधत्त।

इमं यज्ञं नयत देवता नो घृतस्य धारा मधुमत्पवन्ते॥ 10 ॥

धामन्ते विश्वं भुवनमधिश्रितमन्तः समुद्रे हृद्यन्तरायुषि।

अपामनीके समिथे यऽआभृतस्तमश्या मधुमन्तन्तऽ ऊर्मिम्॥ 11 ॥

पुनस्त्वादित्त्या रुद्रा वसवः समिन्धताम्पुनर्ब्रह्माणो वसुनीथ यज्ञैः।

घृतेन त्त्वं तन्वं वर्द्धयस्व सत्याः सन्तु यजमानस्य कामाः॥ 12 ॥

सप्ततेऽअग्ने समिधः सप्तजिह्वाः सप्तऽऋषयः सप्तधाम प्रियाणि।

सप्तहोत्राः सप्तधात्त्वा यजन्ति सप्त योनीरापृणस्व घृतेन स्वाहा॥ 13 ॥

मूर्धानन्दिवोऽ अरतिम्पृथिव्या वैश्वानरमृतऽआजातमग्निम्।

कविꣳसम्राजमतिथिं जनानामासन्ना पात्रं जनयन्त देवाः॥ 14 ॥

पूर्णादर्वि परापत सुपूर्णा पुनरापत।

वस्नेव विक्रीणा वहाऽइषमूर्ज्जꣳशतक्रतो॥ 15 ॥

अथ प्रातराहुते वाहुते वायतरथा कामयेत सोस्याऽ अनिरसितायै कुंभ्यैदर्व्योपहन्ति पूर्णादर्विपरापतसपूर्णा पुनरापत। वस्नेव विक्रीणा वहाऽइषमूर्ज्जꣳ शतक्रतो स्वाहा।

**( शतपथब्रह्मणम्-2/5/4/4 )**

**त्यागः** - इदमग्नये वैश्वानराय वसुरुद्रादित्त्येभ्यः शतक्रतवे सप्तवतेऽग्नये अद्भ्यश्च न मम।

ततः संस्रवप्राशनम्।

**वसोर्धाराहोमः** -

औदुम्बरीम् ऋज्वीमकोटरां बाहुमात्रप्रमाणां निर्मलघृतपूरितां स्रुचं धृत्त्वा अग्नेरुपरि वसोर्धारां पातयेत्। तस्यां च घृतधारायां स्रुक्प्रणालिकया अग्नौ पतन्त्यां सत्यां वक्ष्यमाणमन्त्रापठेत्-

**ॐ सप्ततेऽअग्ने समिधः सप्तजिह्वाः सप्तऽऋषयः सप्तधाम प्रियाणि।**

**सप्तहोत्राः सप्तधा त्त्वा यजन्ति सप्त योनीरापृणस्व घृतेन स्वाहा॥ 1॥**

**शुक्रज्योतिश्च चित्रज्योतिश्च सत्त्यज्योतिश्च ज्योतिष्माँश्च।**

**शुक्रश्चऽऋत पाश्चात्त्यꣳहाः ॥ 2॥**

**इदृङ्चान्यादृङ्च सदृङच प्रतिसदृङच।**

**मितश्च सम्मितश्च सभराः॥ 3॥**

**ऋतश्च सत्त्यश्च ध्रुवश्च धरुणश्च।**

**धर्त्ता च विधर्त्ता च विधारयः॥ 4॥**

**ऋतजिच्च सत्त्यजिच्च सेनजिच्च सुषेणश्च।**

**अन्तिमित्रश्च दूरेऽअमित्रश्च गणः ॥ 5॥**

**ईदृक्षासऽएतादृक्षासऽ ऊषुणः सदृक्षासः प्रतिसदृक्षासऽ एतन।**

**मितासश्च सम्मितासो नो ऽ अद्यसभरसो मरुतो यज्ञे ऽ अस्मिन् ॥ 6॥**

**स्वतवाँश्च प्रघासी च सान्तपनश्च गृहमेधी च।**

**क्रीडी च शाकी चोज्जेषी॥ 7॥**

**इन्द्रन्दैवीर्विशो मरुतोनुवर्त्मानोभवन्यथेन्द्रन्दैवी र्व्विशोमरूतोनुवर्त्त्मानो भवन्।**

**एवमिमँ यजमानन्दैविश्च विशो मानुषीश्चानुवर्त्मानोभवन्तु॥ 8॥**

**इमꣳस्तनमूर्ज्जस्वन्तन्धयापाम्प्रपीनमग्ने सरिरस्य मध्ये।**

**उत्सञ्जुषस्व मधुमन्तमर्वन्त्समुद्रियꣳ सदनमाविशस्व ॥ 9॥**

**घृतं मिमिक्षे घृतमस्य योनिर्घृते श्रितो घृतम्मवस्यधाम।**

**अनुष्वधमावहमादयस्व स्वाहा कृतं वृषभ वक्षि हव्यम् ॥ 10॥**

**वसोः पवत्रिमसि शतधारं वसोः पवित्रमसि सहस्त्रधारम्।**

**देवस्त्त्वा सविता पुनातु वसोः पवित्रेण शतधारेण सुप्वा कामधुक्षः॥ 11॥**

**ॐ यत्कर्मणात्यरीरिं च यद्वान्यूनमिहाकरम्।**

**अग्निꣳस्विष्टकृद्विद्वान् सिव्ष्टꣳसुहुतं करोतु स्वाहा ॥ 12॥**

**इदमग्नये न मम।** नात्र संस्रवप्राशनम्।

ततः अग्निप्रदक्षिणां कुर्यात्।

**ॐ सहैषयज्ञऽ उवाच नग्नताया वै बिभेमीति का ते नग्नतेत्यभितऽ एवमापरिस्तृणीयुरिति तस्मादेतदग्निमभितः परिस्तृणन्ति तृष्णाया वै बिभेमीति का ते तृरिति ब्राह्मणस्यैव तृप्तिमनुतृप्येमिति तस्मात्सं॥ यज्ञे ब्राह्मणन्तर्पयित वै ब्रूयाद्यज्ञमेवैतत्तर्पयति। ( शतपथब्राह्मणम् - 1/6/1/28 )**

इति अग्निं प्रदक्षिणीकृत्य अग्नेः पश्चात् यजमानः प्राङ्मुखः उपविशेत्।

**भस्मधारणम् -**

**ॐ त्र्यायुषं जमदग्नेः** - इति ललाटे

**कश्यपस्य त्र्यायुषम् ।** - इति कण्ठे

**यद्देवेषु त्र्यायुष्म्** - इति बाह्वोः

**तन्नोऽअस्तु त्र्यायुषम्** ॥ इति हृदये

हस्तं प्रक्षाल्य।

**ततः संकल्पः** - आधाराहुतिपर्यन्तं स्वैः स्वैः मन्त्रैः यस्यै यस्यै देवतायै यावद्यावत्संख्यात्मकं हुतं सा सा देवता प्रीयताम्।

ततः संस्रवप्राशनम्। पवित्राभ्यां मार्जनम्। अग्नौ पवित्रप्रतिपत्तिः।

**ब्रह्मणे पूर्णपात्रदानम् - प्रणितोदकेन संकल्पः -**

कृतकर्मसांगतासिध्यर्थम् इदं पूर्णपात्र तत्प्रत्याम्नाय भूतद्रव्यं वा तुभ्यमहं संप्रददे।

**यजमानः** - प्रतिगृह्यताम्।

**ब्रह्मा** - ॐ द्यौस्त्वा ददातु पृथिवी त्त्वा प्रतिगृह्णातु।

ॐ स्वस्ति इति ब्रह्मा ब्रूयात्।

पश्चिमे प्रणीताविमोकः, तज्जलं यजमानशिरसि क्षिपेत्।

**ॐ आपः शिवाः शिवतमाः शान्ताः शान्ततमास्ते कृणवन्तु भेषजम् ।** परिस्ततरणाग्नौ विसृजेत्।

**दानसंकल्पाः** - यजमानः आचार्याय गोनिष्क्रियं द्रव्यं दद्यात्।

**जलमादाय** - सकलजनपदश्रेयसे तस्य गृहशांत्याख्यस्य वा अमुककर्मणः सांगतासिध्यर्थमाचार्याय सोपरस्करा गाम् अथवा तन्निष्क्रयीभूतं द्रव्यं दास्ये।

**ब्रह्मणे वृषभदानम्** - गृहशांत्याख्यस्य वा अमुककर्मणः सांगतासिध्यर्थमाचार्याय प्रत्यक्षं वृषभम् अथवा तन्निष्क्रयीभूतं द्रव्यं दास्ये।

**दक्षिणादानसंकलपः** - कृतकर्म सांगता सिध्यर्थमाचार्यादिविप्रेभ्यो यथोत्साहं दक्षिणां दास्ये।

**पीठदानसंकल्पः** - इमानि सोपस्कराणि पीठानि आचार्याय वा तुभ्यमहं संप्रदहे।

**घृततिलपात्रच्छायापात्रचरुस्थालीसंकल्पाः** - आचार्याय घृतपूरितं कांस्यपात्रं तिलपात्रं च्छायापात्रं तण्डुलपूरितां चरूस्थालीं च सदक्षिणां दास्ये।

**ब्रह्मणे आज्यस्थालीदानम्** - कृतकर्मसांगतासिध्यर्थं ब्रह्मणे घृतपूरितामाज्यस्थालीं सदक्षिणां दास्ये।

**भूयसीदक्षिणादानसंकल्पः** - कृकर्मसांगतासिध्यर्थं वृतेभ्यः आचार्यादिविप्रेभ्यो यथोत्साहं भूयसीं दक्षिणां दास्ये।

**मधुपर्कनिष्क्रियसंकल्पः** - कृतकर्मसांगतासिध्यर्थं वृतेभ्यो ब्राह्मणेभ्यः आसन-पात्र-वस्त्र-यज्ञोपवीत-च्छत्र-उपानत्-कमण्डलु-अक्षमाला-सुवर्णमुद्रिकादिप्रत्याम्नायभूतं महावस्त्रपात्रं द्रव्यं वा दास्ये।

**ब्राह्मणादिभोजनसंकल्पः** - कृतकर्मसांगतासिध्यर्थमद्य (वा यथाकाले) सुवासिनीः बटुकान् कुमारिकाः सुहृदः अतिथीन् अभ्यागताँश्च यथोपपन्नेन मिष्टान्नभोजनेन तर्पयिष्ये।

मण्डपे वायव्यां स्थानपीठे पत्नीं वामतः कृत्वा उपविष्टं सपरिवारं यजमानं स्थापनस्थापितकलशेभ्यस्ताम्रपात्रे जलमादाय चतुर्वेदिनः ऋत्विजः दूर्वाम्रपल्लवैरुदङ्मुखास्तिष्ठन्तः अभिषेकविहितमन्त्रैः उत्तराभिषेकं कुर्युः।

**स्नात्त्वा ब्राह्मणपूजनम्** - सत्कारपरिहितनूतनवस्त्रो यजमानः आचारात् आचार्यादीन यथासंभवं दक्षिणापात्रवस्त्रमुद्रिकादानादिना संपूज्य परितोषयेत्।

**आशीर्वादादि** - सकुटुम्बयजमान भाले तिलकं कृत्त्वा ब्राह्मणाः हस्ते अक्षतान् गृहीत्त्वा आशीर्वाद मन्त्रान् पठेत्।

**ॐ शतमिन्नु शरदोऽअन्ति देवा यत्रा नश्चक्रा जरसन्तनूनाम्।**

**पुत्रासो यत्र पितरो भवन्ति मानो मध्या रीरिषता युर्गन्तोः॥**

**ॐ पुनस्त्वादित्त्या रुद्रा वसवः समिन्धताम्पुनर्ब्रह्माणो वसुनीथ यज्ञैः।**

**घृतेन त्त्वं तन्वं वर्धयस्व सत्त्याः सन्तु यजमानस्य कामाः॥**

**ॐ तम्पत्क्नीभिरनुगच्छेम देवाः पुत्रैर्भ्रातृभिरुत वा हिरण्यैः।**

**नाकं गृभ्णानाः सुकृतस्य लोके तृतीये पृष्ठेऽअधिरोचने दिवः।**

स्वस्त्यस्तु ते कुशलमस्तु चिरायुरस्तु गोवाजिरस्तु धनधान्यनसमृद्धिरस्तु।

ऐश्वर्यमस्तु बलमस्तु रिपुक्षयोऽस्तु वंशे सदैव भवतां हरिभक्तिरस्तु॥

यावद्भूमण्डलं धत्ते सशैलवनकाननम्। तावत्तिष्ठतु मेदिन्यां संततिः पुत्रपौत्रिकी॥

सर्वेऽत्र सुखिनः सन्तु सर्वे सन्तु निरामयाः। सर्वे भद्राणि पश्यन्तु मा कश्चिद्दुःखभाग्भवेत्॥

धनं धान्यं पशुपुत्रलाभं शतसंवत्सरं दीर्घमायुः। सर्वे जनाः सुखिनो भवन्तु।

इति मन्त्रैः सर्वे ब्राह्मणाः आशिषो दद्युः।

**अग्निविसर्जनम् - देवविसर्जनम् - (पीठदेवता)**

**ॐ यज्ञयज्ञं गच्छ यज्ञपतिं गच्छ स्वां योनिं गच्छ स्वाहा।**

**एषते यज्ञो यज्ञपते सहसूक्तवाकः सर्ववीरस्तं जुषस्व स्वाहा॥**

गच्छ त्त्वं भगवन्नग्ने स्वस्थानं कुण्डमध्यतः।

हव्यमादाय देवेभ्यः शीघ्रं देहि प्रसन्नताम्॥

भो यज्ञनारायण स्वस्थानं गच्छ। शुभे कर्मणि पुनरागमनमस्तु॥

**पीठदेवताविसर्जनम् -**

**ॐ उत्तिष्ठ ब्रह्मणस्पते देवयन्तस्त्वेमहे।**

**उपप्रयन्तु मरुतः सुदानवऽइन्द्र प्राशुर्भवा सचा॥**

यान्तु देवगणाः सर्वे पूजामादाय पार्थिवम्।

इष्टकामप्रसिध्यर्थं पुनरागमनाय च॥

शुभे शुभे कर्मणि पुनरागमनमस्तु।

**जलमादाय** - कृतकर्मसांगतासिद्ध्यर्थं प्रैषात्मकपुण्याहवाचनमहं करिष्ये।

भो ब्राह्मणाः समस्तजनपदश्रेयसे कृतस्य सग्रहमखस्य अमुककर्मणः वा पुण्याहं (3) कल्याणं (3) ऋद्धिं (3) स्वस्ति (3) श्रीरस्तु (3) इति ब्रुवन्तु। प्रतिप्रैषान् ब्राह्मणाः आशिषो दद्युः।

**कर्मसमाप्तिः - जलमादाय** - समस्तग्राम-जन-भक्त-देश-जन-परिवारकल्याणहेतवे सग्रहमखामुककर्मणः एभिः ब्राह्मणैः सह संपादितं तत्कालक्रियाभक्तिश्रद्धासहितं भवतां सर्वेषां ब्राह्मणानां वचनात्परिपूर्णमिस्तिवति भवन्तो ब्रुवन्तु।

**ब्राह्मणाः** - अस्तु परिपूर्णम् ।

यस्य समृत्या च नामोक्त्या तपोयज्ञक्रियादिषु।

न्यूनं संपूर्णतां याति सद्यो वन्दे तमच्युतम् ॥

ॐ विष्णवे नमः।

ॐ विष्णवे नमः।

ॐ विष्णवे नमः।

कृतं कर्म ब्रह्मार्पणमस्तु। कर्मान्ते आचमनं प्राणायामश्च।

### शब्दार्थाः

**परिस्तरणम्** कुण्डस्य वस्त्रम् **स्विष्टकृत्** ग्रहहोमान्ते एकीकृतं हुतद्रव्यम् **प्रणीता** - आज्यहोमत्यागपात्रम् **स्रुक्** - होमसाधनम् **आज्यम्** - घृतम् **आज्यस्थाली** - घृतनिष्कासनपात्रम्।

### स्वाध्यायः

**1. अधोलिखितानां प्रश्नामुत्तराणि लिखत।**

(1) पूर्णाहुतिसमये कस्य अग्नेः पूजा भवति?

(2) पूर्णाहुतिः केषां देवानां प्रसन्नतासिद्धये भवति?

(3) परिस्तरणं कुत्र विसृजेत्?

(4) प्रणीता कस्यां दिशि स्थापयेत्?

(5) संश्रवप्राशनं कदा भवति?

(6) अग्निविसर्जनस्य मन्त्र लिखत?

(7) चरुस्थाली कस्मै दातव्या ?

**2. एक वाक्येन उत्तरं यच्छत।**

(1) भस्मधारणस्य स्थानं किं ?

(2) पूर्णाहुतिः कदा भवति।

(3) विसर्जनस्य श्लोकं लिखत।

(4) कुण्डे कति मेखला आयाति।

(5) आज्यम् इत्यस्य कोऽर्थः ?

**शिक्षक-प्रवृत्तिः**

शिक्षकः च्छात्रान् पूर्णाहुतेः तस्याः महत्त्वं च ज्ञापयेत्।

**छात्रप्रवृत्तिः**

छात्राः क्रमशः पूर्णाहुतिं जानीयुः।

**सूक्तिः - पूर्णमदः पूर्णमिदं पूर्णात्पूर्णमुदच्यते।**
**पूर्णस्य पूर्णमादाय पूर्णमेवावशिष्यते॥**

●

# 14. चौलसंस्कारः

**प्रस्तावना :**

संस्कारशब्दः समुपसर्गेण सह कृधातुना साधितोऽस्ति। वेदेषु ब्राह्मणेषु च संस्कार शब्दः पवित्रकर्त्रर्थे दृश्यते। यस्मिन् जाते पदार्थो भवति योग्यः स संस्कारः। संस्कारैः मानवः कार्यार्थं सुयोग्यो भवति।

उन्नतजीवनाय मानवानां कृते जीवनस्य विभिन्नावस्थासु प्रवेशसङ्क्रान्तिसमये यो विधिः भवति स विधिः संस्कारविधिः। संस्काराः षोडश सन्ति। तत्र चौलसंस्कारः अन्यतमः।

---

**॥ चौलसंस्कारः ॥**

बालकस्य जन्मानन्तरं प्रथमवारं केशकर्तनम्, मुण्डनं वा भवति स संस्कारः चूडाकरणम्, चौलसंस्कारः वा इति वा उच्यते। अयं संस्कारः तृतीये, पञ्चमे, सप्तमे वा वर्षे क्रियते। शास्त्रानुसारं चूडाकर्मसंस्कारः अवश्यरूपेण कर्तव्यः। पारस्कराचार्येण उक्तं यत् –

"सांवत्सरिकस्य चूडाकरणम् तथा च 'तृतीये वा प्रतिष्ठिते' अपि च यथामङ्गलं वा सर्वेषाम् इति"।

नारदस्मृतौ उक्तं यत् –

जन्मतस्तु तृतीयेऽब्दे श्रेष्ठमिच्छन्ति पण्डिताः। पञ्चमे सप्तमे वापि जन्मतो मध्यमं भवेत्॥

चूडाकर्मसंस्कारे यदा मुण्डनं भवति तदानीं मस्तकस्योपरि सूर्यातपेन अन्तः स्थिताः केशाः सक्रियाः भवन्ति। तदा बालकः बुद्धिमान् भवति। अनेन कारणेन संस्कारस्यास्य महत्त्वं विद्यते।

चूडाकर्म विषये मनुराह –

चूडाकर्म द्विजातीनां सर्वेषामेव धर्मतः। प्रथमेऽब्दे तृतीये वा कर्तव्यं श्रुतिवचनात् ॥

आश्वालयनस्मृतौ –

तृतीये वत्सरे चौलं कुर्वीत ह्युत्तरायणे। शुक्लपक्षे शुभाह्ने तु कृत्वाभ्युदयिकं तथा॥

कदा चूडाकर्म न विधेयम्? इत्यत्रापि आचार्याणां मतान्तराणि सन्ति।

विवाहचण्डेश्वरः –

मार्गे मासि तथा ज्येष्ठे क्षौरं परिणयं व्रतम्। ज्येष्ठपुत्रो दुहित्रोस्तु यत्नेन परिवर्जयेत् ॥

तद्वत् रिक्तां, प्रतिपदं वा तिथिं विष्टिं च विवर्जयेत् । तद्वत् –

धनिष्ठा रेवती ज्येष्ठा मृगहस्तेषु कारयेत्। शिशोर्मातरि गर्भिण्यां चूडाकर्म न कारयेत् ॥

पञ्चमाब्दार्थोर्ध्वं तु गर्भिम्यामपि कारयेत्। सहोपनीत्या कुर्याच्चेत् तदा दोषो न विद्यते॥

एवं निषेधकालं विवर्ज्य शुभकाले शुभमुहूर्ते च अयं संस्कारः कार्यः।

बृहस्पतिः -

गर्भेमातुः कुमारस्य न कुर्याचौलकर्म तु। पञ्चमासाद्यः कुर्यादत उर्ध्वं न कारयेत्॥

**॥ अथ चौलसंस्कार प्रयोगः॥**

चौले कालातिक्रमदोषपरिहारर्थमर्धकृच्छ्रप्रायश्चित्तं रजतं प्रत्याम्नायद्वारा अहमाचरिष्ये। आचम्य। प्राणानायम्य। अद्येत्यादि... तिथौ ममास्य कुमारस्य चौलकर्मणि अधिकारार्थं त्रीन् संख्याकान् ब्राह्मणान् भोजयिष्ये। पुनर्जलामादाय - अद्येत्यादि... तिथौ मम अस्य कुमारस्य बीजगर्भसमुद्भवेन निबर्हणेन बलायुर्वर्चोऽभिवृद्धिव्यवहारसिद्धिद्वारा श्रीपरमेश्वरप्रीत्यर्थं चूडाकरणकर्म करिष्ये। तत्रादौ गणपतिपूजनं स्मरणं वा कुर्यात्। ततः स्थण्डिले पञ्चभूसंस्कारपूर्वकमग्निं संस्थाप्य ब्रह्मोपवेशनादि पात्रासादनान्तं कुर्यात्। आसादने विशेषः शीतोदकं, उष्णोदकं नवनीतपिंडं घृतपिंडं दधिपिंडोवा। दधित्र्येणीशलली सप्तविंशति कुशतरुणानि नवधा पृथक् बद्धानि ताम्रपरिष्कृतायसः क्षुरः। आनडुहगोमयपिंडः। नापितः वरश्चेति। पवित्रीकरणादि पवित्रयोः प्रणीतासु निधानम्। दक्षिणाजान्वाच्च ब्रह्मान्वारब्धाधारावाज्यभागौ जुहुयात् (मनसा) ॐ प्रजापतये स्वाहा, इदं प्रजापतये न मम।

ॐ इन्द्राय स्वाहा, इदमिन्द्राय न मम।

ॐ अग्नये स्वाहा, इदमग्नये न मम।

ॐ सोमाय स्वाहा, इदं सोमाय न मम।

हस्ते अक्षतान् गृहीत्वा-

**ॐ अग्नेनयसुपथारायेऽअस्मान्विश्वानिदेववयुनानिव्विद्वान्**

**युयोध्यस्मज्जुहुराणमेनो भूयिष्ठान्तेनमऽउक्तिं विधेम ॥**

चौले सभ्यनाम्ने वैश्वानराय नमः गंधाक्षत पुष्पाणि समर्पयामि। ततो भूरादिनवाहुतयः।

(1) ॐ भूः स्वाहा इदमग्नये न मम।

(2) ॐ भुवः स्वाहा इदं वायवे न मम।

(3) ॐ स्वः स्वाहा इदं सूर्याय न मम।

(4) ॐ त्वन्नोऽअग्नेव्वरुणस्यविद्वान् देवस्यहेडोऽअवयासिसीष्ठाः। यजिष्ठो व्वह्नितमः शोशुचानो व्विश्वादेषाꣳसि प्प्रमुमुग्ध्यस्मत् स्वाहा। इदं अग्नीवरुणाभ्यां न मम।

(5) ॐ सत्वन्नोऽअग्नेवमोभवोतीनेदिष्टोऽअस्याऽउषसोव्युष्टौ। अवयक्ष्वनो व्वरूणꣳ रराणो व्वीहिमृडीकꣳसुहवो नऽएधि स्वाहा इदमग्निवरुणाभ्यां न मम।

(6) ॐ अयाश्चाग्नेस्यनभिशस्तिपाश्च सत्यमित्वमयाऽअसि। अयानो यज्ञं वहास्ययानो धेहि भेषजꣳस्वाहा इदमग्नये अयसे न मम।

(7) ॐ येते शतं व्वरूण ये सहस्त्रं यज्ञिया: पाशावितताममहान्त:। तेभिर्नोऽअद्यसवितोतव्विष्णुर्व्विश्वेमुञ्चन्तु मरुत: स्वर्का: स्वाहा इदं वरुणाय सवित्रे विष्णवेविश्वेभ्योदेवेभ्योमरुद्भ्य: स्वर्केभ्यश्च न मम।

(8) **ॐ उदुत्तमं व्वरुण पाशमस्मदवाद्यमंव्विमद्व्यमꣳश्रयाय।**

**अथाव्वयमादित्त्यव्व्रतेतवानागसोऽअदितयेस्याम स्वाहा इदं वरुणायादित्ययादितये च न मम।**

ॐ प्रजापतये स्वाहा (मनसा) इदं प्रजापतये न मम।

एवं नवाहुतीर्हुत्वा स्विष्टकृतादिकं कुर्यात्।

ॐ अग्नये स्विष्टकृते स्वाहा इदमग्नये स्विष्टकृते न मम।

संस्त्रवप्राशनम्। पवित्राभ्यां मार्जनम्। अग्नौ पवित्रप्रतिपत्ति:। ब्रह्मणे पूर्णपात्रं दत्त्वा पश्चिमे प्रणीताविमोक: तज्जलेन च मार्जनम्। आप: शिवा: शिवतमा: शान्ता: शान्ततमास्ताँस्ते कृण्वन्तु भेषजम्॥

तत: अद्येत्यादि.... अस्य कुमारस्य चूडाकर्म कर्तुमधिकारार्थं दक्षिण, गोदानं, मुण्डनं च करिष्ये॥

तत एकस्मिन्पात्रे शीतास्वप्सूष्णाऽअप आसिंचति। ॐ उष्णेनवाय उदकेनेह्यदितेकेशान्वय॥

अथात्रनवनीतपिंड घृतपिंडं दध्नो वा पिंडं प्रास्यति। तत: उदकमादायदक्षिणगोदानमुंदति।

**ॐ सवित्राप्रसूता दैव्याऽआपऽउदन्तुतेतनूम्। दीर्घायुत्वायवर्चसे॥ ततस्त्र्येण्या शलल्या केशान्विनीय। त्रीणि कुशतरूणान्यंतर्दधाति।**

**ॐ ओषधे त्रायस्य स्वधिते मैनꣳहिꣳसी:** ॥इति मन्त्रेण। (शिवोनामेतिलोहक्षुरमादधाति)।

**ॐ शिवोनामासिस्वधितिस्तेपितानमस्तेऽअस्तुमामा हिꣳसी:।** निवर्तयामीतिमंत्रेण केशकुशक्षुरसंलग्नीकरणम्।

**निवर्तयाम्यायुषेन्नाद्द्यायप्प्रजननायरायस्योषायसुप्प्रजास्त्वायसुव्वीर्य्याय।** तत: छेदनम्।

ॐ येनावपत्सविताक्षुरेणसोमस्यराज्ञोव्वरुणस्यव्विद्यान्। तेन ब्रह्माणोवपतेदमयस्यायुष्यंजरदृष्टिर्यथासम्।

अनेन सकेशानि कुशतरूणानि प्रचिछद्यानडुहे गोमयपिंडे प्रास्यत्यग्नेरूत्तरतोघ्रियमाणे ॥1॥ एवं द्विरपरं तृष्णीम्। तद्यथा उन्दनम्। विनयनम्। त्रिकुशतरूणान्तर्धानम्। क्षुरग्रहणम्। संलग्नीकरणम्। छेदनम्। आनडुहेगोमयपिंडेप्रासनम्॥2॥ पुन: उन्दनम् विनयनम्। त्रिकुशतरूणान्तर्धानम्। क्षुरग्रहणम्। संलग्नीकरणम्। छेदनम्। आनडुहगोमयपिंडेप्रासनम्॥3॥ इति दक्षिण गोदानम्॥

पुनर्जलमादाय अस्य कुमारस्य चूडाकर्मकर्तुमधिकारार्थं पश्चिमगोदानं मुंडनं च करिष्ये। उन्दनम् - ॐ सवित्रा प्रसूता दैव्याऽआपऽउन्दन्तुतेतनूम्। दीर्घायुत्वायबलायवर्चसे॥ त्र्येण्या शलल्याविनयनम्। तत: त्रिकुश तरुणान्र्धानम्। ॐ ओषधेत्रायस्व॥ इत्यनेनमंत्रेण। शिवोनामा...। इति लोहक्षुरमादाय। निवर्त्तयाम्या...। इति लोहक्षुरं केशानामुपरि निधाय केशच्छेदनेमंत्रविशेष:। ॐ त्र्यायुषञ्जमदग्ने: कश्यपश्यत्र्यायुषम्। यद्देवेषुत्र्यायुषन्तन्नोऽअस्तुत्र्यायुषम्॥ यथा - उन्दनम्। विनयनम्। त्रिकुशतरुणान्र्धानम्। क्षुरग्रहणम्। संलग्नीकरणम्। छेदनम्। गोमयपिण्डेनिधानम्॥ 2॥ पुन: ॥3॥ इति पश्चिमगोदानम्॥

हस्तेजलमादाय अस्य कुमारस्य चूडाकर्मकर्तुमधिकारार्थं उत्तरगोदानं मुण्डनं च करिष्ये।

ॐ सवित्राप्रसूतादैव्याऽआप उन्दन्तुतेननूम्। दीर्घायुत्वाबलायवर्चसे॥ इति उन्दनम्। त्र्येष्याशलल्या विनयनम्। त्रिकुशतरूणान्तर्धानकरणम्। ॐ ओषधेत्रायस्व...। इत्यनेनमंत्रेण। शिवोनामा...। इति लोहक्षुरमादाय। निवर्त्तयाम्या... इति लोहक्षुरं केशानामुपरिनिधायकेशच्छेदनेमंत्रविशेषः।

ॐ येन भूरिश्चरादिवंज्योक्वपश्चाद्धि सूर्यम्। तेन ते वपामि ब्रह्मणाजीवातवे जीवनाय सुश्लोक्यायस्वस्तये। इति मंत्रेण छेदनम्। गोमयपिंडेप्रासनम्॥1॥ एवं तूष्णीद्विपरम्। यथा पुनः उन्दनम्। विनयनम्। त्रिकुशतरूणान्र्धानम्। क्षुरग्रहणम्। संलग्नीकरणम्। छेदनम्। गोमयपिण्डे प्रासनम् ॥2।3॥ इति।

उत्तरगोदानम् ॥

ततस्त्रिः क्षुरेण शिरः प्रदक्षिणं भ्रामयति।

ॐ यत्क्षुरेणमज्जयता सुपेशसावप्त्वावावपतिकशाञ्छिन्धिशिरोमास्यायुः प्रमोषीः॥इति सकृन्मंत्रेण॥ द्विस्तूष्णीम् शिरः समन्तात् क्षुरभ्रमणम्। ततस्ताभिरद्भिः। शिर आर्द्रं कृत्वा नापिताय क्षुरं प्रयच्छति। ॐ अक्षुण्वन्परिवप इति मन्त्रेण। स च नापित उदङ्मुखस्थितस्य कुमारस्य प्राक्संस्थं प्राङ्मुखस्थितस्य उदक्संस्थंशिरोवपेत्॥ कुलव्यवस्थया शिखा स्थापनं केशशेषं करोति। ततः सर्वान् केशान् गोमयपिंडे वस्त्रादिनाऽऽवेष्ट्य अनुगुप्तं कृत्वा गवां गोष्ठे स्थापयेत् अथवा तडागे जलमध्ये वा प्रक्षिपेत्। ततः कुमारं स्नापयित्वा मस्तके स्वस्तिकं ललाटे तिलकं च कुर्यात्। जलमादाय - कृतस्य चूडाकरणकर्मसाङ्गता सिद्ध्यर्थंस्मृत्युक्तान् दश संख्याकान् ब्राह्मणान् यथाकाले यथा संपन्नेनान्नेनाहं भोजयिष्ये। तेन कर्मांगदेवताप्रीयतां न मम। गोनिष्क्रियं दद्यात्। आचार्याय दक्षिणां दद्यात्। **इति चौलसंस्कारः॥**

**शब्दार्थाः**

**प्रत्यवाचः** विघ्नदोषः **शीतोदकम्** शीतलजलम् **प्रायश्चितम्** कृतपापनिष्कृत्यर्थं क्रियमाणं कर्म **सिद्धिः** अणिमामहिमादिसिद्धिः।

**स्वाध्यायः**

**1. प्रदत्तविकल्पेभ्यः योग्यविकल्पं चित्वा उत्तरं यच्छत।**

(1) कति संस्काराः सन्ति?

(क) 15 (ख) 16 (ग) 17 (घ) 20

(2) संस्कार शब्दे कः धातुः?

(क) संस्का (ख) कृ (ग) संस् (घ) संस्क

(3) चूडाकर्मसंस्कारस्यापरं नाम किम्?

(क) चौलसंस्कारः (ख) उपनयनसंस्कारः (ग) मुण्डनसंस्कारः (घ) न कोऽपि

(4) चौलसंस्कारे प्रथमं कस्य देवस्य पूजनं स्मरणं वा भवति?

(क) गणपतेः (ख) देव्याः (ग) क्षेत्रपालस्य (घ) विष्णोः

**2. निम्नाङ्कितानामुत्तराणि यच्छत।**

(1) चौलकर्मसंस्कारस्य महत्त्वं स्वशब्दैः लिखत।

(2) चौल कर्म कदा भवति ?

(3) चौलकर्मसंस्कारे वर्जितकालं प्रतिपादयत।

(4) चौलकर्मसंस्कारप्रयोगविधि प्रतिपादयत।

(5) चौलसंस्कारे पश्चिमगोदानं लिखत।

**शिक्षक-प्रवृत्तिः**

शिक्षकाः वर्गखण्डे षोडशसंस्काराणां महत्त्वं ज्ञापयेरन्।

**छात्रप्रवृत्तिः**

छात्राः प्रयोगविधिं कण्ठस्थीकुर्युः।

**सूक्तिः - जन्मना ब्राह्मणो ज्ञेयः संस्कारात् द्विज उच्यते।**

●

# 15. उपनयनसंस्कारः

**प्रस्तावना**

वयं जानीम एव यत् भारतीयसंस्कृतौ जीवनोन्नतिकारकासु जीवनस्य नानाविधासु अवस्थासु सङ्क्रान्तिकाले मानवेभ्यः कार्ययोग्यताप्रदायकाश्च षोडशसंस्कारः निर्दिष्टाः सन्ति। तत्र उपनयनसंस्कारः अन्यतमः। संस्कारोऽयम् द्विजातीनाम् अर्थात् ब्रह्मक्षत्रियवैश्यानां कृते अस्ति।

उप अर्थात् समीपे नयनम् अर्थात् गुरोः समीपागमनमिति। गुररपि बालकाय गायत्रीमन्त्रदीक्षां प्रददाति। ततः बालकः गुरुशुश्रूषावान् कौपीनवान् नियमपालनकर्ता गुरोः सकाशाद् विद्यामधिगच्छति।

"**जन्मना ब्राह्मणो ज्ञेयः संस्कारैः द्विज उच्यते। (अत्रिसंहिता)**" तेनायं संस्कारोऽतीवाश्यकः अस्ति। ब्राह्मणानां गर्भात् आरभ्य अथवा जन्मतः अष्टमे वर्षे, द्वादशे वर्षे अयं संस्कारः भवति। मतान्तरेण ब्राह्मणबटुकानां षोडशेऽब्दे क्षत्रियाणां द्वाविंशे वर्षे वैश्यानां चतुर्विंशे वर्षेऽयं संस्कारः विधातुं शक्यते। ज्योतिषशास्त्रोक्ते शुभे कालेऽयं संस्कारो विधेयः।

---

उप समीपे नीयते इति उपनयम् यज्ञोपवीत संस्कारः। अष्टवर्षं ब्राह्मणानाम् उपनयेत्। अष्टमवर्षे ब्राह्मणानाम् उपनयनम् भवेदिति शास्त्रप्रमाणम्।

संस्कारमयूखे कथितं च –

गर्भाष्टमेऽष्टमे वाऽष्टे ब्राह्मणस्योपनायनम्।

राज्ञामेकादशे सैके विशामेके यथा कुलम्॥

अर्थात् गर्भस्या वा जन्मनः अष्टमे वर्षे ब्राह्मणस्योपनयनं कार्यम् । जन्ममासे उपनयनसंस्कारो न विधेयः। एवञ्च जयेष्ठपुत्रस्य ज्येष्ठमासे उपनयनसंस्कारो न विधेयः। पूर्वाह्णे भागे उपनयनम् कार्यम्।
अर्थात् मध्याह्नकालात्पूर्वं कार्यम्। सर्वेदेशेषु पूर्वाह्णे मुख्यं स्यादुपनायनम् ॥

**विधिः** – ज्योतिः शास्त्रोक्तशुभे मासे शुभे दिने सुमुहूर्ते उपनयनं कुर्यात्। सात्त्विकयजमानः कुमारेण सह शुद्धासने नित्यकर्म संपाद्य प्राङ्मुखः उपविश्य। स्वदक्षिणतः पत्नी। तद्दक्षिणतो बटुः।

| **बटुः** | **यजमानपत्नी** | **यजमानः** |
|---|---|---|

**आचमन्, देवतानमस्कारः कुर्यात्।**

**हस्ते जलमादाय**

**सङ्कल्प :** विष्णुर्विष्णुर्विष्णुः.... अमुकशर्मणः मम सुतस्य उपनयन-संस्कारकर्मणि अधिकार-सिद्ध्यर्थं त्रीन् संख्यकान् प्राजापत्यान् रजतप्रत्याम्नायद्वारा अहम् आचरिष्ये। तेन मम सुतस्य उपनयनसंस्कार सिद्धिरस्तु॥

**पुनः सङ्कल्प :** मम सतुस्य द्विजत्वसिद्धयै वेदाध्ययनाधिकारार्थम् उपनयन संस्काराख्यकर्मणि वचनपूर्वकं द्वादशसहस्त्रगायत्रीजपाहं च करिष्ये।

तत्रादौ गणपतिपूजनादारभ्य पञ्चभूसंस्कारपूर्वकं कर्माहं करिष्ये। **समुद्भवनामाग्निं** पूजयामि।

**भो अग्ने इहागच्छ।**

ग्रहा: गायत्रीपीठम् योगिनी गणेश:




ततो बटु: सम्यग् पीताम्बरादिवस्त्राणि धृत्वा आचार्यसमीपम् उपविशेत्। आचार्य: आनीतं कुमारम् अग्ने: पश्चात्स्वदक्षिणतः अवस्थापयेत्। मङ्गलं पठेत् –

भास्वान् काश्यपगोत्रजोऽणरुचिर्य: सिंहराशीस्वर:

षट्त्रिस्थो दशशोभनो गुरुशशी भौमेषु मित्रं सदा।

शुक्रो मंदरिपु: कलिङ्गजनितश्चाग्नीश्वरौ दैवते

मध्ये वर्तुलपूर्वदिग्दिनकर: कुर्यात् बटोर्मङ्गलम्।

तत: कुमार: आचार्यपादौ प्रणमति।

**आचार्य:** – भो वत्स ! ब्रह्मचर्यमागाम्।

**कुमार:** – ब्रह्मचार्यसामि।

तत: आचार्यो कुमारस्य कटिप्रदेशे यथोक्तोमेखलां यथाप्रवरग्रन्थियुतां प्रदक्षिणं त्रिर्वेष्टयित्वा बध्नाति।

**विनियोग:** – इयं दुरुक्तमिति वामदेवऋषि: त्रिष्टुप छन्द: आपोदेवता यज्ञोपवीतप्रक्षालने विनियोग:।

**मेखलामन्त्र:** – ॐ इयं दुरुक्तं परिबाधमानवर्णं पवित्रं पुनीतऽअगात्। प्राणायानाभ्यां बलमादधानास्वसादेवीसुभगामेखलेयम्।

इति मेखलां धारयित्वा।

आचारात् यज्ञोपतीवदानम्। ततो यज्ञोपवीतधारणात् पूर्वं प्रक्षालनम्।

**विनियोग:** – ॐ आपोहिष्ठेति तिसृणां सिन्धुद्विपऋषि: गायत्री छन्द: आपोदेवता यज्ञोपवीतप्रक्षालने विनियोग:।

**प्रोक्षणम्:** – ॐ आपोहिष्ठामयोभुवस्तानऊर्ज्जेदधातन। महेरणाय चक्षसे॥

इति प्रोक्षणम्।

तत्र नवतन्तूनां पूजनम्। वामहस्ते यज्ञोपवीतं धृत्वा पूजयेत्।

1. प्रथमतन्तौ ॐ काराय नमः। ॐकारं आवाहयामि स्थापयामि॥

2. द्वितीयन्तौ ॐ अग्नये नमः। अग्निम् आवाहयामि स्थापयामि॥

3. तृतीयतन्तौ ॐ नागेभ्यो नमः। नागान् आवाहयामि स्थापयामि॥

4. चतुर्थतन्तौ ॐ सोमाय नमः। सोमम् आवाहयामि स्थापयामि॥

5. पञ्चतन्तौ ॐ पितृभ्यो नमः। पितृन् आवाहयामि स्थापयामि॥

6. षष्ठतन्तौ ॐ प्रजापतये नमः। प्रजापतिम् आवाहयामि स्थापयामि॥

7. सप्तमतन्तौ ॐ अनिलाय नमः। अनिलम् आवाहयामि स्थापयामि॥

8. अष्टमतन्तौ ॐ यमाय नमः। यमम् आवाहयामि स्थापयामि॥

9. नवमतन्तौ ॐ विश्वेभ्यो देवेभ्यो नमः। विश्वान् देवान् आवाहयामि स्थापयामि॥

**यज्ञोपवीतग्रन्थिदेवतावाहनम्**

1. प्रथमग्रन्थिमध्ये - ॐ ब्रह्मणे नमः। ब्रह्माणम् आवाहयामि स्थापयामि।

2. द्वितीयग्रन्थिमध्ये - ॐ विष्णवे नमः। विष्णुम् आवाहयामि स्थापयामि।

3. तृतीयाग्रन्थिमध्ये - ॐ रुद्राय नमः। रुद्रम् आवाहयामि स्थापयामि।

**यज्ञोपवीत ध्यानम्**

प्रजापतेर्यत्सहजं पवित्रं कार्पाससूत्रोद्भवब्रह्मसूत्रम्।

ब्रह्मत्वसिद्धयै च यशः प्रकाशं जपस्य सिद्धिं कुरु ब्रह्मसूत्रम्॥

इति ध्यात्वा। ॐ प्रणवादिनवतन्तुदेवता सहितब्रह्माविष्णुरुद्रेभ्यो नमः सर्वोपचारार्थे गन्धाक्षपुष्पाणि समर्पयामि।

ततो सूर्याय यज्ञोपवीतं दर्शयेत।

**विनियोगः** - ॐ उदुत्यमिति प्रस्कण्वऋषिः गायत्रीछन्दः

सूर्यो-देवता सूर्यावलोकने विनियोगः।

**मंत्र : - ॐ उदुत्यञ्जातवेद सन्देवंव्यहन्तिकेतवः।**

**दृशेव्विश्वाय सूर्य्यम्॥**

**यज्ञोपवीतधारणम् :**

**विनियोगः** - यज्ञोपवीतमिति मन्त्रस्य परमेष्ठी ऋषिः त्रिष्टुप् छन्दः, लिङ्गोक्ता देवता श्रौतस्मार्तकर्मानुष्ठानसिद्धयर्थे यज्ञोपवीतधारणे विनियोगः।

यज्ञोपवीतं परमं पवित्रं प्रजायतेर्यत् सहजं पुरस्तात्। आयुष्यमग्रयं प्रतिमुञ्चशुभ्रं यज्ञोपवीतं बलमस्तु तेजः॥

**यज्ञोपवीतधारणमन्त्रः**

''**ॐ यज्ञोपवीतमसि यज्ञस्यत्वा यज्ञोपवीते नोपनह्यामि॥**'' इति मन्त्रं पठित्वा दक्षिणबाहुमद्धृत्य वामस्कन्धे यज्ञोपवीतं धारयेत्। आचमनम् कुर्यात्॥

आचार्यः कुमारम् अजिनं (चर्मासनम्) प्रयच्छति। तत्र मन्त्रः - ॐ मित्रस्यचक्षुर्ध्दरुणं बलीयस्तेजोयशस्विस्थविरथ्ठं समिद्धम्। अनाहनस्यं वसनञ्जरिष्णुः परीदम्वाज्यजिनन्दधेहम्॥

आचार्यः कुमारं दण्डं प्रच्छति।

**मन्त्रः** - ॐ योमेदण्डः परापतद्वैहायसोधिभूम्याम्। तमहम्पुनरादधाम्यायुषेब्रह्मणेब्रह्मवर्चसाय॥

**दृष्टाः** - ब्राह्मणो बैल्वपालाशौ क्षत्रियो वटखादिरौ। पैप्पलौदुम्बरौ वैश्यो दण्डानर्हन्ति धर्मतः॥

(संस्कारमयूखः प. 37)

**कुमारः** - दण्डं प्रतिगृह्णामि।

तत आचार्यः स्वाञ्जलिनावारिभिः कुमारम् अञ्जलिं पूरयति।

कुमारः सूर्याय - अर्घ्यत्रयं दद्यात्। ॐ सूर्याय नमः इदमर्घ्यं दतं न मम।

आचार्यः कुमारं प्रेषयति सूर्यम् उदीक्षस्वेति इति। कुमारः सूर्यं पश्यति नमस्करोति। तत आचार्यः कुमारस्य दक्षिणस्कन्धोपरि हस्तं नीत्वा तस्य हृदयमालभते।

**हृदयालम्भनम्ः-**

1. आचार्यः - को नामासि?

1. कुमारः - देवदत-शर्माहम्।

2. आचार्यः - कस्य ब्रह्मचारी असि?

2. कुमारः - भवतः।

मन्त्रः - ॐ ममव्रतेतेहृदयंदधामिममचितमनुचितन्तेऽअस्तु। ममवाचमेकमजानुषस्व बृहस्पतिष्ट्वानियुनक्तुमह्यम्।

**शब्दार्थाः**

**उपनयनम्** यज्ञोपवीतम् **कुमारः** बटुः **द्विजत्वम्** ब्राह्मणत्वम् **सूत्रम्** तन्तुः **ब्रह्मचारी** वटुः **आचार्यः** दीक्षादाता॥

**स्वाध्यायः**

**1. प्रदत्तविकल्पेभ्यः योग्यविकल्पं चित्वा उत्तरं यच्छत।**

(1) उपनयनशब्दस्य कोऽर्थ?

(क) यज्ञोपवीतः (ख) चूडाकर्म (ग) विद्यारम्भः (घ) नामकरणः

(2) उपनयनसंस्कारे दीक्षामन्त्रः कः?

(क) ब्रह्मा (ख) विष्णु (ग) सूर्य-गायत्री (घ) शिव

(3) यज्ञोपवीते ग्रन्थिमध्ये कस्य देवस्य स्थानं न भवति?

(क) ब्रह्माणः (ख) विष्णेव (ग) रुद्रस्य (घ) इन्द्रस्य

(4) कुमाराय दण्डं कः ददाति?

(क) माता (ख) पिता (ग) भ्राता (घ) आचार्यः

(5) कुमारः अर्घ्यं कस्मै देवाय ददाति?

(क) ब्रह्मणे (ख) विष्णेव (ग) सूर्याय (घ) रुद्राय

**2. निम्नेषु त्रयाणामुतराणि सविस्तरं लिखत।**

(1) यज्ञोपवीते तन्तुदेवतानां पूजनम्।

(2) आचार्य कुमार संवादः।

(3) यज्ञोपवीत धारण विधिः।

**3. निम्नेषु त्रयाणामुतराणि एकैकेन वाक्येन लिखत।**

(1) उपनयनशब्दस्य कोऽर्थः ?

(2) यज्ञोपवीते कति सूत्राणि भवन्ति ?

(3) ब्राह्मणस्य कुमारस्य कस्मिन्वर्षे यज्ञोपवीतसंस्कारो भवति ?

**4. मन्त्रपूर्ति कुरुत।**

(1) ॐ मित्रस्यचक्षु....

(2) ॐ उदुत्यञ्जा....

(3) ॐ योमे दण्डः....

**शिक्षक-प्रवृत्तिः**

शिक्षकः छात्रेभ्यः उपनयनसंस्कारस्य महत्वं कथयेयुः।

**छात्रप्रवृत्तिः**

प्रयोगविधिमन्त्राणां कण्ठस्थीकरणं कुर्युः।

**सूक्तिः - गुरुरग्निर्द्विजातीनां वर्णानां ब्राह्मणो गुरुः।**
**पतिरेव गुरुस्त्रीणां सर्वस्याभ्यागतो गुरुः॥**

●

# 16. द्विजसंस्कारः

**प्रस्तावना**

अनेन ज्ञायते यत् संस्कारैः संस्कारितो द्विजो भवति।

**जन्मना ब्रह्मणो ज्ञेयः संस्कारैर्द्विज उच्यते।**

**विद्वत्त्वाच्चापि विप्रत्वं त्रिभिः श्रोत्रिय उच्यते॥**

द्वाभ्यां जायते इति द्विजः। गर्भात् जातः प्रथमसंस्कारः। अथ च पुनः यज्ञोपवीतसंस्कारेण पुनर्जन्म भवति इति द्विजसंस्कारः।

**संस्कारविषये शाबरभाष्ये** -

संस्कारो नाम स भवति यस्मिन् जाते पदार्थो भवति योग्यः कस्यचिदर्थस्य

**शाङ्करभाष्येः** ''संस्कारो हि नाम गुणाधानेन वा स्याद् दोषापनयनेन वा''

(संस्कारमयूखः)

---

अथ पवित्रप्रणीताधानान्ते दक्षिणजान्वाच्य ब्रह्मान्वारब्धः स्रुवेण जुहुयात् आचार्यकुण्डे आधारहोमः

1. ॐ मनसा (प्रजापतये) स्वाहा। इदं प्रजापतये न मम।
2. ॐ इन्द्राय स्वाहा। इदम् इन्द्राय न मम।
3. ॐ अग्नये स्वाहा। इदम् अग्नये न मम।
4. ॐ सोमाय स्वाहा। इदम् सोमाय न मम।

**अग्निध्यानम्**

ॐ अग्ने नय सुपथा राये अस्मान् विश्वानिदेव वयुनानि विद्वान्।

युयोध्यस्मज्जुहुराणमेनो भूयिष्ठां ते नम उक्तिं विधेम॥

ॐ उपनयने **जातवेदस्** नामाग्नये नमः अक्षतैः पूजयामि।

**विनयोगः** - भूर्भवः स्वरिति महाव्याहृतीनां प्रजापतिर्ऋषिः गायत्र्युष्णिगनुष्टुप् छन्दांसि अग्निवायुसूर्या देवता उपनयनाङ्ग प्रधानहोमे विनियोगः।

ॐ भूःस्वाहा। इदमग्नये न मम॥

ॐ भुवःस्वाहा। इदं वायवे न मम।

ॐ स्व:स्वाहा। इदं सूर्याय न मम।

ॐ अग्निवरुणाभ्यां स्वाहा। इदमग्निवरुणाभ्यां न मम।

ॐ अग्निवरुणाभ्यां स्वाहा। इदमग्निवरुणाभ्यां न मम।

ॐ अग्नये अयसे स्वाहा। इदमग्नये अयसे न मम।

ॐ वरुणाय सवित्रे विष्णवे विश्वेभ्यो देवेभ्यो मरुद्य: स्वर्केभ्यश्च स्वाहा। इदं वरुणाय सवित्रे विष्णवे विश्वेभ्यो देवेभ्यो मरुद्य: स्वर्केभ्यश्च न मम।

ॐ वरुणाय आदित्याय अदितये च स्वाहा।

इदं वरुणाय आदित्याय अदितये च न मम।

ॐ प्रजापतये स्वाहा। इदं प्रजापतये न मम।

ॐ अग्नये स्विष्टकृते स्वाहा। इदमग्नये स्विष्टकृते न मम।

संस्रवप्राशनम्। पवित्रभ्यां मार्जनम्। अग्नौ पवित्रप्रतिप्रति:. तज्जलेन

| प्रणिता | प्रोक्षणी |
|---|---|
| संस्रवप्राशानम् | पवित्राभ्यां मार्जनम् |

**अग्नौपवित्र प्रतिप्रति:** तज्जलेन मार्जनम्।

**ॐ आप: शिवा: शिवतमा: शान्ता: शान्ततमा: ता: ते कृणवन्तु भेषजम्।**

ततो आचार्य: कुमारं शिक्षयति–

आचार्य: - ब्रह्मचारी असि ?

कुमार: - भवामि।

आचार्य: - अपोऽशान (जलं पिब)

कुमार: - अशानि (पिबानि)

आचार्य: - मा दिवा सुषुप्था:। (दिवसे शयनं मा कुरु)

कुमार: - न स्वपानि। (न करिष्यामि)

आचार्य: - वाचं यच्छ। (मधुरावाणी भवेत्)

कुमार: - यच्छानि। यच्छानि। (वदिष्यामि)

आचार्य: - अध्ययनं संपादय।

कुमारः – संपादयामि।

आचार्यः – अध्ययनं संपादय।

कुमारः – संपादयामि।

आचार्यः – समिधम् आधेहि। (समिधं धारय)

कुमारः – आदधानि। (धारयिष्यामि)

आचार्यः – अपोऽशान। (जलंपिब)

कुमारः – अशानि। (पिबानि)

**अथ गायत्रीमन्त्रदीक्षा** –

आचारात् कांस्यपात्रे तण्डुलान् प्रसार्य तत्र सुवर्ण शलाकया ॐकार – व्याहृतिपूर्वकं गायत्रीमन्त्रं लिखित्वा– सङ्कल्पः **( कुमारो जलं गृहीत्वा )**

विष्णुः विष्णुः विष्णुः .... मम ब्रह्मवर्चससिद्धिपूर्वक वेदाध्ययनाधिकारसिद्ध्यर्थं गायत्री – उपदेशाङ्गविहितं गायत्रीपूजनम् आचार्यपूजनम् अहं करिष्ये।

गायत्रीसहित–आचार्यपूजनम् :

तत्र गणपतेः पञ्चोपचारैः पूजनम्। ततः क्षौमं कार्पासकं वस्त्रम् अवगुण्ठ्य उपदेशं कुमाराय द्द्यात्।

**विनियोगः** – ॐ तत्सवितुरिति विश्वामित्र ऋषिः गायत्री छन्दः सूर्यो देवता उपदेशग्रहणे विनियोगः।

तत आचार्यो गायत्रीं बूयात्।

**मन्त्रोपदेशः**

ॐ भूर्भुवः स्वः। ॐ तत्सवितुर्व्वरेण्यं। भर्गोदेवस्य धीमहि। धीयोयोनिः प्रचोदयात् ॐ ॥

ततो यथोक्तमुपविश्यं प्रकृतेऽग्नौसमिदाधानं करोति कुमारः। तत्र अग्नेः संधुक्षणं कुर्यात् अर्थात् अग्निप्रज्वालनं कुर्यात्। पश्चात् समिदाधानम् अर्थात् समिधहोमः। तत्र मन्त्राः –

1. ॐ अग्नेसुश्रवः सुश्रवसंमा कुरु॥1॥
2. ॐ यथात्वमग्नेसुश्रवः सुश्रवाऽअसि॥2॥
3. ॐ एवं मा ᳯ सुश्रवः सौश्रवसंकुरु॥3॥
4. ॐ यथात्वमग्ने देवाना यज्ञस्य निधिपाऽअसि॥4॥
5. ॐ एवमहं मनुष्याणां वेदस्यनिधिपो भूयासम् ॥5॥

इति प्रतिमन्त्रै समित् होमः।

ततः ''वाक्चमऽआयतामिति मुखालम्भनम्।'' अत्र आलम्भनं मुखे स्पर्शः।

**ततो भस्मधारणम्**

ॐ त्र्यायुषञ्जमदग्नेरिति ललाटे॥

ॐ कश्श्यपस्य त्र्यायुषमिति ग्रीवायाम्॥

ॐ षद्देवेषुत्र्यायुषमिति दक्षिणांसे वामांसे च॥

[अंसे - भागे, स्कन्धे]

ॐ तन्नोऽअस्तुत्र्यायुषमिति हृदि॥

ततः कुमारो गोत्रनामपूर्वकवैश्वानरादीनामभिवादनं करोति।

**गोत्रोच्चारः**

अमुकगोत्रोत्पन्नः .......... अमुकप्रवरान्वितः ................

अमुकशर्माह .................

कुमारः - भो वैश्वानर ! त्वाम् अभिवादयामि।

आचार्यः -आयुष्मान् भव सौम्य।

कुमारः - भो गुरो ! त्वाम् अभिवादयामि।

आचार्यः - आयुष्मान् भव सौम्य।

कुमारः - भो मातापितरौ! युवाम् अभिवादयामि।

आचार्यः - आयुष्मान् भव सौम्य।

कुमारः - भो सूर्याचन्द्रमसौ ! युवाम् अभिवादयामि।

आचार्यः - आयुष्मान् भव सौम्य।

कुमारः - सर्वान् ब्राह्मणान् अभिवादयामि।

आचार्यः - आयुष्मान् भव सौम्य।

इत्यभिवादनम्।

अत आरभ्य आब्रह्मचर्यसमाप्तेर्ब्रह्मचारिणोनियमाः कथ्यन्ते आचार्येण।

आचार्यः - अधः शयीत। (भूमौ शयनं कुरु)

आचार्यः - लवणाशी स्यात्। (भोजने लवणं त्यज)

आचार्यः - अग्निपरिचरणं समिदाधानं कर्तव्यम्। (नित्यहोमादिकं प्रकर्तव्यम्)

आचार्यः – गुरुशुश्रुषा कर्तव्या। (गुरुसेवा कर्तव्या)

आचार्यः – भिक्षाचर्यं कर्तव्यम् । (भिक्षाटनं कर्तव्यम्)

आचार्यः – मधुमांसाशनं न कर्तव्यम्। मज्जनं न कर्तव्यम्। (कूपादिकेषुस्नानं न कर्तव्यम्)

आचार्यः – पर्यासने नोपविशेत्। (पर्यङ्के न उपवेशम्)

आचार्यः – स्त्रीणां मध्येऽवस्थानं न कर्तव्यम्। (नारीसमुदाये न स्थेयम्)

आचार्यः – अदतं न गृहणीयात्।

आचार्यः – अनृतं न वदेत्। (असत्यम्)

आचार्यः – अस्तसमये भास्करावलोकनम् न कुर्यात्।

आचार्यः – कांस्यपात्रे मृण्मयपात्रे भोजनं न कुर्यात्।

आचार्यः – ताम्बूलभक्षणं न कुर्यात्।

आचार्यः – अभ्यंगम्, अक्ष्णोः रञ्जनम्, उपान छत्र आदर्शम् च वर्जयेत्।

(सुगन्धिद्रव्य, कज्जल, पादत्राण, छत्र, दर्पणत्यागः)

॥ इति नियमाः ॥

**अर्पणम्** – कृतस्य मम पुत्रस्योपनयनाख्यस्य कर्मणः सांगतासिद्धयर्थं स्मृत्युक्तान् पंञ्चाशत्संख्याकान् ब्राह्मणान् यथाकाले यथासंपन्नेनान्नेनाहं भोजयिष्ये तेन कर्माङ्गदेवताः प्रीयन्ताम्॥

**शब्दार्थाः**

**आपः** जलम् **द्विजः** ब्राह्मणः **जातवेदः** अग्निः **वरुणः** जलाधिपतिः **प्रजापतिः** दक्षः।

**स्वाध्यायः**

**1. प्रदत्तविकल्पेभ्यः योग्यविकल्पं चित्वा उत्तरं यच्छत।**

(1) द्विजशब्दस्य कोऽर्थः ?

(क) यज्ञोपवीतसंस्कारः (ख) चुडाकर्म (ग) जातकर्म (घ) नामकरणम्

(2) अपोऽशान इति शब्दस्य कोऽर्थः ?

(क) उपविश्य (ख) जलं पिब (ग) आगच्छ (घ) तिष्ठ

(3) ॐ त्र्यायुषम्... इति मन्त्रेण का क्रिया भवति ?

(क) होमः (ख) आचमनम् (ग) भस्मधारणम् (घ) धूपार्पणम्

(4) गोत्रोच्चारपूर्वकं नमस्कारं कः करोति ?

(क) भूमौ (ख) पर्यङ्के (ग) याने (घ) वटवृक्षे

**2. सविस्तरम् उत्तरं दीयताम्।**

(1) अधारहोम-सहित-प्रणाहुतयः।

(2) प्रधानहोमः (द्विजसंस्कारे)।

(3) आचार्य-कुमार-संवादः।

**3. निम्नेषु त्रयाणामुतराणि एकैकेन वाक्येन लिखत।**

(1) गायत्रीदीक्षामन्त्रः कः?

(2) वेदाध्ययनाधिकारः केन भवति?

(3) द्विजः केन उच्यते?

(4) उपनयने कस्य अग्नेः पूजा भवति?

**शिक्षक-प्रवृत्तिः**

शिक्षकः छात्रेभ्यः सवितादेवतायाः उपासनायै प्रेरयेत्।

**छात्रप्रवृत्तिः**

छात्राः आचार्य-कुमार-संवादस्य कण्ठस्थीकरणं कुर्युः।

**सूक्तिः - तपसा कल्मषं हन्ति।**

●

# 17. वेदारम्भकेशान्त-संस्कारौ

**प्रस्तावना**

पारस्करमतेन अष्टवर्षं ब्राह्मणमुपनयेत् इति। अथवा ब्रह्मवर्चसकामस्य विप्रस्य पंचमे वर्षे कार्यम्। पिता स्वकीयबालकस्य शास्त्रमतानुसारम् उपनयन-संस्कारानन्तरं ब्रह्मचर्यव्रतपालनहेतुः सन्ध्यावन्दनं प्रातः सायंक्रम सहितं गायत्रीजपनियमान् शिक्षयति तथा च उपनयनानन्तरं द्वादशवर्षं यावत् गुरुकुले स्थित्वा वेदं पठित्वा संपूर्णब्रह्मचर्यव्रतपालनं भवेत्, तदर्थं वेदारम्भसंस्कारं कृत्वा गुरुकुले स्थित्वा वेदं पठित्वा संपूर्णब्रह्मचर्यव्रतपालनं भवेत्, तदर्थं वेदारम्भसंस्कारं कृत्वा गुरुकुले स्वशाखासहितं षडङ्गवेदाध्ययनं कारयति। केशान्तः षोडशेवर्षे, ब्रह्मणस्य विधीयते। ब्राह्मणस्य कृते केशान्तः संस्कारः षोडशे वर्षे भवति किन्तु यदा बालकः वेदाध्ययनं समाप्य गृहे आगच्छति तदा यस्मिन् वर्षे पंचकेशसहितं ब्रह्मचारिव्रतं धृतं तस्य समाप्तये चौलसंस्कारवत् केशान्तः संस्कारः भवति। ब्रह्मचारिव्रतं समाप्य संसारिक समावर्तनाधिकारप्राप्तये केशान्त संस्कारनन्तरं समावर्तनं कृत्वा संसारकर्मणि अधिकारी भवति। अतः वेदारम्भकेशान्तसंस्कारौ ब्रह्मवर्चसकामाय भवतः। पिता कारयति च।

---

**वेदारंभसंस्कारप्रयोगः**

**उपनीय गुरुः शिष्यं, महाव्याह्यतिपूर्वकम्। वेदमध्यापयेदेनं, शौचाचाराँश्च शिक्षयेत्॥**

**अधीत्य शाखामात्मीया-मन्यशाखां ततः पठेत्। स्वशाखां यः परित्यज्य, शाखारण्डः स उच्यते॥**

**य इमां पृथिवीं सर्वां, सर्वरत्नापशोभिताम्। दधात्छात्रं च शिष्येभ्यो, तच्च तच्च द्वयम् समम्॥**

गुरुणा स्वशिष्येभ्यः उपनयना ननीरं, महाव्या हृति उच्चारेण सह वेदाभ्यासं शौचाचारशिक्षापूर्वकम् पाठनीयम्। स्वशाखासहितं वेदंपठित्वा अन्यवेदं पठनीयं। रत्नसहितं पृथ्वीदानात् परं स्वशिष्येभ्यः वेदध्यानंवरं इति मत्या पाठनीयम्।

**आचम्य प्राणानायम्य** - सुमुश्चैकेत्यादि पठित्वा संकल्पः अस्य ब्रह्मचारिणः स्वशाखापूर्वकवेदारम्भमहं करिष्ये॥ ॐ गणानान्त्वा०। तत्रादौ निर्विघ्नतासिद्धयर्थं गणपतिपूजनं तदंगत्वेन स्वस्तिवाचनं, मातृकापूजनं वसोर्धारां नांदीश्राद्धं च करिष्ये। उक्तनांदिश्राद्धादिकर्म समाप्य, स्थण्डिले पंचभूसंस्कारपूर्वकं लौकिकाग्नेः स्थापनं कृत्वा ततो दक्षिणतो ब्रह्मासनादि चरुवर्ज्यं प्रकृतिवत्सवँ कुर्यात्। ब्रह्मान्वारब्धेन स्रुवेण होमः॥ मनसा॥ (ॐ प्रजापतये स्वाहा) इदं प्रजापतये न मम॥ ॐ इन्द्राय स्वाहा इदमिन्द्राय न मम। ॐ अग्नये स्वाहा इदमग्नये नमम॥ ॐ सोमाय स्वाहा इदं सोमाय न मम॥ हस्ते अक्षतान्गृहित्वा॥ ॐ अग्नेनयसुपथा०।

व्रतादेशे समुद्भवनामानं वह्निम् आवाहयामि॥ समुद्भवनमाम्ने वैश्वानराय नमः गंधपुष्पंसमर्पयामि॥ ततः सर्वाश्च वेदाहुतयो होतव्याः॥

(अथ यजुर्वेदाहुतयः) ॐ अन्तरिक्षाय स्वाहा इदमन्तरिक्षाय न मम॥

ॐ वायवे स्वाहा इदं वायवे न मम॥

ॐ ब्रह्मणे स्वाहा इदं ब्रह्मणे न मम॥

ॐ छंदोभ्यः स्वाहा इदं छंदोभ्यो० ॥

(अथ ऋग्वेदाहुतयः) ॐ पृथिव्यै स्वाहा इदं पृथ्विै० ॥

ॐ अग्नये स्वाहा इदमग्नये ० ॥

ॐ ब्रह्मणे स्वाहा इदं ब्रह्मणे ० ॥

ॐ छंदोभ्यः स्वाहा इदं छंदोभ्यो ० ॥

(अथ सामवेदाहुतयः) ॐ दिवे स्वाहा इदं दिवे० ॥

ॐ सूर्याय स्वाहा इदं सूर्याय ० ॥

ॐ ब्रह्मणे स्वाहा इदं ब्रह्मणे० ॥

ॐ छंदोभ्यः स्वाहा इदं छंदोभ्यो ० ॥

(अथाथर्ववेदाहुतयः) ॐ दिग्भ्यः स्वाहा इदं दिग्भ्यो ० ॥

ॐ चन्द्रमसे स्वाहा इदं चन्द्रमसे ० ॥

ॐ ब्रह्मणे स्वाहा इदं ब्रह्मणे न मम।

ॐ छंदोभ्यः स्वाहा इदं छंदोभ्यो ० ॥

ॐ प्रजापतये स्वाहा इदं प्रजापतये ० ॥

ॐ देवेभ्यः स्वाहा इदं देवेभ्यो ० ॥

ॐ चन्द्रमसे स्वाहा इदं चन्द्रमसे ० ॥

ॐ ऋषिभ्यः स्वाहा इदं ऋषिभ्यो ० ॥

ॐ श्रद्धायै स्वाहा इदं श्रद्धायै ० ॥

ॐ मेधायै स्वाहा इदं मेधायै ० ॥

ॐ सदसस्पतये स्वाहा इदं सदसस्पतये ० ॥

ॐ अनुमतये स्वाहा इदमनुमतये ० ॥

(ततो नवाहुतयः) ॐ भूः स्वाहा इदमग्नये न मम॥

ॐ भुवः स्वाहा इदं वायये ०॥

ॐ स्वः स्वाहा इदं सूर्याय ०॥

ॐ त्वन्नोऽअग्ने... इदमग्निवरुणाभ्यां न मम०॥

ॐ सत्वन्नोऽअग्ने... इदमग्निवरुणाभ्यां न मम०॥

ॐ अयाश्चाग्ने ० । इदमग्नये अयसे न मम०॥

ॐ येतेशतं ० । इदं वरुणाय सवित्रे विष्णवे विश्वेभ्यो देवेभ्यो मरूद्भ्यः स्वर्केभ्यश्च न मम०॥

ॐ उदुतमं ०। इदं वरुणायादित्यायादितये च न मम॥

ॐ प्रजापतये स्वाहा इदं प्रजापतये न मम॥

ॐ अग्नये स्विष्टकृते स्वाहा इदमग्नये स्विष्टकृते न मम॥

संस्रवप्राशनम् ॥ पवित्राभ्यां मार्जनम्॥ अग्नौ पवित्रप्रतिपतिः॥ ब्रह्मणे पूर्णपात्रदानम्॥

**संकल्पः** – कृतस्य वेदारंभसांगतासिद्धर्थं ब्रह्मन् अयं ते वरः प्रतिगृह्यताम्॥ पश्चिमे प्रणीताविमोकः॥ आपः शिवाः

**भोजनसंकल्पः** – कृतस्यवेदारंभकर्मणः सांगतासिद्धर्थं यथासंख्याकान् ब्राह्मणान् यथाकाले यथासम्पन्नेनान्नाहं भोजयिष्ये। तेन कर्मांगदेवताः प्रीयन्तां न मम॥ ततः शिष्टाचारात् वेदसरस्वतीपूजनम्।

**संकल्पः** – अद्येत्यादि तिथौब्रह्मवर्चससिद्धये वेदसरस्वतीपूजनमहं करिष्ये॥

**ॐ वेदोऽसि येन त्वं वेद वेद देवेभ्यो वेदोॐभवस्तेन मह्यं वेदो भूयाः। ॐ पावकानः सरस्वती वाजेभिर्वाजिनीवती। यज्ञं वष्टुधिया वसुः॥** ॐ भूर्भुवः स्वः भगवते वेदनारायणाय नमः तथा च भगवतीमहासरस्वत्यै नमः इति षोडशोपचारैः संपूज्य अंजलौ पुष्पाण्यादाय॥

शुक्लां ब्रह्मविचारसारपरमां, माद्यां जगद्व्यापिनी।

वीणापुस्तकधारिणीमभयदां, जाड्यांधकारापहाम्॥

हस्तेस्फाटिकमालिकां विदधतीं, पद्मासने संस्थिताम्।

वन्दे तां परमेश्वरीं भगवतीं, बुद्धिप्रदां शारदाम्॥

ॐ भूर्भुवः स्वः भगवतीमहासरस्वत्यै नमः प्रार्थनां समर्पयामि॥

**संकल्पः** - अनया पूजया वेदसरस्वत्यौ प्रीयेतां न मम। ततो यजुर्वेदादिमारभेत॥ **ॐ भूर्भुवः स्वः ॐ तत्सवितुर्वरेण्यं भर्गो देवस्य धीमहि। धियो यो नः प्रचोदयात्॥ ॐ इषेत्वोर्जेत्वा वायवस्थ देवोवः सविता प्रार्पयतु श्रेष्ठतमाय कर्मण आप्यायध्वमग्न्याऽ इन्द्रायभागं प्रजावतीरनमीवाऽ अयक्ष्मा मावस्तेनऽईशतमाधशꣳ (गूँ) सो ध्रुवा अस्मिन् गोपतौस्यातबह्वीर्यजमानस्य पशून्पाहि॥२॥** ॐ स्वस्ति॥ ॐ यजुर्वेदाय नमः॥

॥ऋग्वेदः॥ ॐ अग्निमीळे पुरोहितं यज्ञस्यदेवमृत्विजम् । होतारं रत्नधातमम्। ॐ स्वस्ति॥ ॐ ऋग्वेदाय नमः॥

॥सामवेदः॥ ॐ अग्नऽआयाहि वितये गुणानो हव्यदातये॥ निहोता सत्सि बर्हिषि॥ ॐ स्वस्ति॥ ॐ सामवेदाय नमः॥

अथर्ववेदः - **ॐ शन्नोदेवीरभिष्टयऽआपो भवन्तु पीतये। शंयोरभिस्त्रवन्तु नः॥** ॐ स्वस्ति॥ ॐ अथर्ववेदाय नमः॥ एवं वेदाध्ययनं कृत्वा संकल्पयेत्॥ कृतस्य वेदारंभख्य कर्मणः सांगतासिद्ध्यर्थं यथाशक्ति ब्राह्मणान् भोजयिष्ये। तेन श्रीकर्मांगदेवता प्रीयतां न मम॥ ॐ लम्बोदर ०॥ वेदारंभविधेः परिपूर्णताऽस्तु॥

## अथ केशान्तसंस्कारः

**केशान्तः षोडशे वर्षे, ब्राह्मणस्य विधीयते। राजन्यबन्धोर्द्वाविंशे, वैश्यस्य ह्यधिके ततः।**

केशांतसंस्कारः ब्राह्मणस्यकृते षोडशे वर्षे, क्षत्रियस्यद्वाविंशे, तथा वैश्यस्य तथाधिके कर्तव्यः।

बह्मचर्यव्रतविसर्गात्पूर्वम् उतरायणे चौलसंस्कारवत् तिथिनक्षत्रवारेषु गोदानं कृत्वा तदनन्तरम् अयं संस्कारः कर्तव्यः वा भवति।

यथा,

अत्र बहिः शाला॥ पितास्वपुत्रं दक्षिणहस्ते उपवेशयित्वा

**जलमादाय** - अस्य ब्रह्मचारिणः केशान्ताख्यं कर्माहं करिष्ये॥ तदंगत्वेन निर्विघ्नतासिद्ध्यर्थं गणपतिपूजनं, स्वस्तिपुण्याहवाचनमविघ्नपूजनं मंण्डपस्थापनं मातृकापूजनं, वसोर्धारापूजनमायुष्यमन्त्रजपः नांदीश्राद्धं च कृत्वा अग्निं प्रतिष्ठाप्य, ततो दक्षिणतो ब्रह्मासनमास्तीर्येत्यादि आचार्यवरणान्तं सर्व चूडाकरणवत् करणीयम्।

(करिष्ये)॥ **तत्र विशेषः**॥ उपकल्पनीये वरस्थाने गौः॥

**ॐ उष्णेन वा उदकेनेह्यदितेकेशस्मश्रुवप।**

इत्युदकासेके विशेषः। त्रिःक्षुरेण शिरः प्रदक्षिणं परिहरति संमुखं केशान्ते॥

**ॐ यत्क्षुरेण मंजयता सुपेशसा वप्त्वा वाऽऽवपति केशान् च्छिन्धि शिरो माऽस्यायुः प्रमोषीः॥** अनन्तरं नापितेन पूर्वं वा उदङ्मुखो भूत्वा मोनेन क्षौरकर्म करणीयम्। आचार्याय गोदानम्। संवत्सरं ब्रह्मचर्यवपनं च। द्वादशरात्रं षड्रात्रं त्रिरात्रमन्ततः॥

**शब्दार्थाः**

**केशान्तः** चौलम् मुण्डनम् **लौकिकाग्निः** सामान्याग्निः **ब्रह्मवर्चसम्** तेजस्विता **अभयदाम्** अभयवरदात्रीम् **पद्मासने** कमलासने **कर्मांगदेवः** - कर्मप्रधानदेवः, मुख्यदेवः।

**स्वाध्यायः**

**1. अधोलिखितानां प्रश्नानां द्वाभ्यां त्रिभिर्वा वाक्यैः उत्तराणि देयानि।**

(1) ब्राह्मणबटुकस्य वेदारंभसंस्कारः कस्मिन् वर्षे भवति?

(2) वेदाध्ययनं कुत्र स्थित्वा कस्याम् अवस्थायां करणीयम्?

(3) केन क्रमेण वेदाध्ययनं करणीयम्?

(4) वेदारंभात्पूर्वं किमर्थं वेदसरस्वतीपूजनं करणीयम्?

(5) विद्याप्राप्तिरूपसरस्वतीमंत्रं शुद्धं स्पष्टाक्षरेण लिखत।

(6) ब्राह्मणस्यकृते केशान्तसंस्कारः कदा भवति?

(7) केशान्तसंस्कारः किं सूचयति?

**2. एकेन वाक्येन उत्तरं यच्छत।**

(1) पास्करद्रान्थ मतेन बटुकं कदा उपनयेत?

(2) केशान्तसंस्कारः कस्मिन् वर्षे भवति?

(3) संस्कारशब्दे कः उपसर्गः?

(4) ''वेद'' शब्दस्य कोऽर्थः?

(5) ''गुरुः'' शब्दस्य का व्याख्या?

(6) ''गायत्री'' शब्दस्य का व्याख्या।

**शिक्षक-प्रवृत्तिः**

शिक्षकः छात्रान् वेदमंत्रकेशान्तसंस्कारमहत्त्वं ज्ञापयेत्।

**छात्रप्रवृत्तिः**

छात्राः वेदारम्भसंस्कारमहत्त्वं जानीयुः।

**सूक्तिः - वेदोवृक्षः मूलकान्यत्र विप्राः।**

●

| 18. | शिवसङ्कल्प-सूक्तम् |
|---|---|

**प्रस्तावना**

शिवसङ्कल्पस्य सूक्तमिति शिवसङ्कल्पसूत्रम्। शिवमर्थात् शुभं, कल्याणम्। यस्मिन् सूक्ते कल्याणस्य संकल्पना कामना कृता अस्ति तत् शिवसङ्कल्पसूक्तम्। सूक्तमिदं शुक्लयजुर्वेदसंहितायाः चतुस्त्रिंशत्तमे (34) अध्याये वर्तते। सूक्तस्यास्यापरं नाम शिवसङ्कल्पोपनिषद् वर्तते।

सूक्तेऽस्मिन् ''**तन्मे मनः शिवसङ्कल्पमस्तु**'' इति ध्रुवपङ्क्तिः वर्तते। अर्थात् तादृक् मम मनः कल्याणस्य कल्पनाकर्तृ भवेत् इति। मन्त्रेषु एतेषु मनसः विविधाः स्थितयः वर्णिताः सन्ति। एतेषां मन्त्राणामर्थान् विशेषेण पाठेऽस्मिन् ज्ञास्यामः।

---

**॥ अथ शिवसङ्कल्प-सूक्तम्॥**

**ॐ गणानान्त्वा गणपतिꣳ हवामहे प्प्रियाणान्त्वा प्रियपतिꣳ हवामहे निधीनान्त्वा निधिपतिꣳ हवामहे व्वसो मम। आहमजानिगर्ब्भधमात्त्वमजासि गर्ब्भधम्॥ 1॥**

**अन्वयः** – वसो गणानां त्वा गणपतिं हवामहे। प्रियाणां त्वा प्रियपतिं हवामहे। निधीनां त्वा निधिपतिं हवामहे मम। अहं गर्भधम् आ अजानि। त्वम् आ अजासि।

**शब्दार्थः वसो** हे अश्व **निधिः** भाण्डारः **हवामहे** आवाहयामः **गर्भधम्** रेतः **आ अजामि** आकृष्य क्षिपामि।

**भावार्थ** – गणेषु श्रेष्ठं गणपतिं याचामहे प्रियेषु श्रेष्ठं प्रियपतिं याचामहे निधिषु श्रेष्ठं निधिपतिं याचामहे। हे वसो! त्वमेव अस्माकं स्वामी भव। तव गर्भधारकं तेजः आकृष्य अहं मयि धारयामि। त्वमपि गर्भधारकं तेजः आकृष्य मयि धारय।

**ॐ गायत्रीत्रिष्ट्टुब्जगत्त्यनुष्ट्टप्पङ्क्त्यासह। बृहत्त्युष्णिहाककुप्सूचीभिः शम्मयन्तुत्त्वा॥ 2॥**

**अन्वयः** – (हे अश्व) गायत्री त्रिष्टुप् जगती अनुष्टुप् पङ्क्त्या सह बृहती उष्णिहा सह ककुप् सूचीभिः त्वा शम्यन्तु।

**शब्दार्थः सूचीभिः** रेतोभिः **शम्यन्तु** तोषयन्तु।

**भावार्थः** – गायत्री, त्रिष्टुप्, जगती, अनुष्टुप, पंक्त्या सह बृहती, उष्णिक्, ककुप् इत्यादीनि छन्दांसि हे अश्व! इमाभिः छन्दाः स्वरूपाभिः सूचीभिः त्वां संस्कुर्वन्तु (तव पथदर्शनं कुर्वन्तु।)

**ॐ द्विपदायाश्च्चतुष्प्पदास्त्रिपदायाश्च्चषट्पदाः।**
**व्विच्छन्दायाश्च्चसच्छन्दाः सूचीभिः शम्यन्तुत्त्वा॥ 3॥**

**अन्वयः** – (हे अश्व) याः द्विपदाः या त्रिपदाः याः चतुष्पदाः याश्च षट्पदाः याः विच्छन्दाः याश्च सच्छन्दाः सूचीभिः त्वा शम्यन्तु।

**शब्दार्थः विच्छन्दाः** च्छन्दोलक्षणहीनाः **सच्छन्दाः** च्छन्दोलक्षणसहिताः।

**भावार्थः** – यानि छन्दांसि द्विपदानि, त्रिपदानि, चतुष्पदानि, षट्पदानि च सन्ति। विगतछन्दोभावयुक्तानि वा छन्दोलक्षणयुक्तानि छन्दांसि सन्ति, हे अश्व! तानि इमाभिः सूचीभिः त्वां संस्कुर्वन्तु। (तव मार्गदर्शनं कुर्वन्तु।)

**ॐ सहस्तोमाः सहछन्दसऽआवृतः सहप्रमाऽऋषयः सप्तदैव्याः।**

**पूर्व्वेषाम्पन्थामनुदृश्यधीराऽअन्वालेभिरेरत्थ्योनरश्मीन्॥ 4॥**

**अन्वयः** – सहस्तोमाः सहच्छन्दसः आवृतः सहप्रमाः दैव्याः सप्त ऋषयः पूर्वेषां पन्थाम् अनुदृश्य रथ्यो न रश्मीन् अन्वालेभिरे।

**शब्दार्थः पन्थानम्** मार्गम् **सहस्तोमाः** स्तोमसहिताः **आवृतः** आवरणसहिताः **अन्वालेभिरे** सृष्टिवन्तः **रथ्यः** रथसारथिः।

**भावार्थः** – स्तुतिभिः छन्दोभिः, कर्मभिः, प्रमाणैश्च सह दिव्याः सप्तर्षयः सृष्टियज्ञं प्राप्तवन्तः। यथा सारथिः अश्वस्य प्रग्रहं गृह्णति तथैव। पूर्वकल्पेषु जायमानानां दिव्यानाम् अनुकरणं कुर्वन्तः ते बुद्धिमन्तः अस्य सृष्टियज्ञस्य प्रारंभं कृतवन्तः।

**ॐ यज्जाग्रतोदूरमुदैतिदैवन्तदुसुप्तस्यतथैवैति।**

**दूरङ्गमञ्ज्योतिषाञ्ज्योतिरेकन्तन्मेमनः शिवसङ्कल्प्पमस्तु॥ 5॥**

**अन्वयः** – यत् मनः जाग्रतो दूरम् उदैति तत् सुप्तस्य एवं तथा एति। दूरंगमम् एकं ज्योतिषां ज्योतिः तत् मे मनः शिवसङ्कल्पम् अस्तु।

**शब्दार्थः जाग्रतः** जाग्रत-अवस्थायाम् **उदैति** गच्छति **एति** गच्छति **दूरंगमम्** दूरंगामिविषयकम्।

**भावार्थः** – दिव्यशक्तिभिः युक्तं यत् मनः जाग्रतः पुरुषात् दूरं गच्छति। सुषुप्तस्य मानवस्यापि तेनैव प्रकारेण मनः दूरं गच्छति। दूरगमनशीलं प्रकाशानाम् एकम् एव प्रकाशरूपं तत् मम मनः शुभसंकल्पयुक्तं भवतु।

**ॐ येनकर्म्माण्ण्यपसोमनीषिणोयज्ञेकृण्ण्वन्तिव्विदथेषुधीराः।**

**यदपूर्व्वंयक्षमन्नतः प्रजानान्तन्मेमनः शिवसङ्कल्प्पमस्तु॥ 6॥**

**अन्वयः** – येन मनीषिणः कर्माणि कृणवन्ति अपसः विदधेषु धीराः यत् पूर्वं यक्षम् अन्तः प्रजानां तत् मे मनः शिवसङ्कल्पम् अस्तु।

**शब्दार्थः मनीषिणः** विद्वांसः **कृण्वन्ति** सम्पादयन्ति।

**भावार्थः** – कर्मशीलाः, मनीषिणः, धीराः मानवाः यज्ञेषु, अन्यज्ञानधनप्राप्त्यादिक्षेत्रेषु येन मनसा एव कर्म कुर्वन्ति। प्रजानां अन्तः यत् अपूर्वं, प्रभायुक्तं च यत् ज्योतिः स्वरूपं विद्यते तत् मम मनः शुभसंकल्पयुक्तं भवतु।

**ॐ यत्प्रज्ञानमुतचेतोधृतिश्च्चयज्ज्योतिरन्तरमृतम्प्रजासु।**

**यस्मान्नऽऋतेकिञ्चनकर्म्मक्रियतेतन्मेमनः शिवसङ्कल्प्पमस्तु॥ 7॥**

**अन्वयः** – यत् प्रज्ञानम् उत चेतः धृतिः च यत् प्रजासु अन्तरम् अमृतं ज्योतिः यस्मात् ऋते किञ्चन कर्म न क्रियते तत् मे मनः शिवसङ्कल्पम् अस्तु।

**शब्दार्थः प्रज्ञानम्** विशेषज्ञानम् **चेतः** चेतनशीलम् **ऋते** विना।

**भावार्थः** – यत् विशेषज्ञानयुक्तं, चेतनागुणयुक्तं, धृतियुक्तं, यच्च प्रजानाम्, अन्तः सत् सर्वेन्द्रियाणां प्रकाशकम्। येन विना किमपि कार्यं कर्तुं न शक्यते तादृशं मम मनः शुभसंकल्पयुक्तं भवतु।

**ॐ येनेदम्भूतम्भुवनम्भविष्यत्त्वरिगृहीतममृतेनसर्व्वम्।**

**येनयज्ञस्तायतेसप्तहोतातन्मेमनः शिवसङ्कल्प्पमस्तु॥ 8॥**

**अन्वयः** – येन इदं भूतं भुवनं भविष्यत् परिगृहीतम् सर्वम् अमृतेन। येन सप्तहोता यज्ञः तायते तत् मे मनः शिवसङ्कल्पम् अस्तु।

**शब्दार्थः भुवनम्** वर्तमानम् **परिगृहीतम्** सर्वतः स्वीकृतम्, **सप्तहोता** सप्तहोतृवान् अग्निष्टोमो यज्ञः, **तायते** क्रियते।

**भावार्थः** – येन अमृतमयेन मनसा इदं भूतभविष्यद्वर्तमानयुक्तं जगत् धृतं विद्यते। तथा येन सप्तहोतृयुक्तः यज्ञः विस्तार्यते तत् मम मनः शुभसंकल्पयुक्तं भवतु।

**ॐ यस्मिन्नृचः सामयजूᳬषियस्मिन्नप्रतिष्टिद्दुतारथनाभाविवाराः।**

**यस्मिँश्चित्तᳬ सर्व्वमोतम्प्रजानान्तन्मेमनः शिवसङ्कल्प्पमस्तु॥ 9॥**

**अन्वयः** – यस्मिन् रथना भाविवाराः ऋचः साम यजूंषि प्रतिष्ठिताः यस्मिन् चित्तं सर्वं प्रजानाम् ओतं तत् मे मनः शिवसङ्कल्पम् अस्तु।

**शब्दार्थः ऋचः** ऋग्वेदः **साम** सामवेदः **चित्तम्** मनः।

**भावार्थः** – यस्मिन् ऋग्मन्त्राः, सामयन्त्राः (गानानि), यजुर्मन्त्राः रथचक्रमध्ये आराः इव प्रतिष्ठिताः। अन्यच्च प्रजानां सदसद्ज्ञानम् ओतप्रोतं विद्यते तादृशं मम मनः शुभसंकल्पयुक्तं भवतु।

**ॐ सुषारथिरश्श्वानिवयन्मनुष्ष्यान्नेनीयतेभीषुभिर्व्वाजिनऽइव।**

**हृत्प्रतिष्ठ्ठुञ्जदजिरँयविष्ठन्तन्मेमनः शिवसङ्कल्प्पमस्तु॥ 10॥**

**अन्वयः** – सुषारथिः अश्वान् इव (नीयते) मनुष्यान् अभीशुभिः वाजिनः नेनीयते यत् अजिरं हृत्प्रतिष्ठं जविष्ठं तत् मे मनः शिवसङ्कल्पम् अस्तु।

**शब्दार्थः सुषारथिः** कुशलः सारथिः **नेनीयते** नीत्वा गच्छति **वाजिनः** अश्वान् **अजिरम्** अत्यन्तं वेगयुक्तम् **यविष्ठम्** अतिशयेन युवान् **हृत्प्रतिष्ठम्** हृदये विद्यमानम्।

**भावार्थः** – कुशलः सारथिः यथा अश्वान् अभीष्टं स्थानं प्रापयति, प्रग्रहैः अश्वान् नियन्त्रतान् अपि करोति, तद्वत् यत् मनुष्यान् अत्र-तत्र भ्रामयति, हृदये प्रतिष्ठितं यत् जरामरणादिभिः रहितं विद्यते, यच्च अत्यन्तं वेगवत् विद्यते, तत् मम मनः शुभसंकल्पयुक्तं भवतु।

**शब्दार्थाः**

**उदैति** गच्छति **मनीषिणः** प्रज्ञावन्तः **कृण्वन्ति** सम्पादयन्ति **ऋते** विना **धृतिः** धैर्यशीलः **परिगृहीतम्** सर्वतः गृहीतम् **तायते** विस्तारः क्रियते **रथनाभौ** रथस्य चक्रे **सुषारथिः** कुशलः-सारथिः **नेनीयते** नयति **अभिशुभिः** अश्वरज्जुद्वारा **अजिरम्** जरारहितम् **यविष्ठम्** अतिशयेन युवान्।

**स्वाध्यायः**

**1. प्रदत्तविकल्पेभ्यः योग्यविकल्पं चित्वा उत्तरं यच्छत।**

(1) शिवमर्थात् किम्?

(क) शुभम् (ख) अशुभम् (ग) हिंसा (घ) क्रोधः

(2) मनीषिणः इत्यस्य कोऽर्थः?

(क) बलवन्तः (ख) धैर्यवन्तः (ग) प्रज्ञावन्तः (घ) अज्ञानवन्तः

(3) केन विना किमपि कर्म न क्रियते?

(क) कायेन (ख) वाचा (ग) मनसा (घ) इन्द्रियेण

(4) अस्य सूक्तस्य अपरं नाम किम्?

(क) प्रकल्पोपनिषद् (ख) विकल्पोपनिषद् (ग) ज्ञानोपनिषद् (घ) शिवसङ्कल्पोपनिषद्

**2. अधोलिखितानां प्रश्नानां द्वाभ्यां त्रिभिर्वा वाक्यैः उत्तराणि देयानि।**

(1) शिवसङ्कल्पसूक्तस्य द्वितीयमन्त्रस्य व्याख्यानं कुरुत।

(2) तृतीये मन्त्रे कीदृशं मनः प्रदर्शितमस्ति?

(3) मनसः विशेषणानि प्रदर्शयत।

(4) चतुर्थे मन्त्रे कीदृशी मनःस्थितिः दर्शितास्ति?

(5) ''तन्मे मनः शिवसङ्कल्पमस्तु'' इति सूक्तिं स्वशब्दैः व्याख्यायत।

**3. मन्त्रपूर्ति कुरुत।**

(1) यज्जाग्रतो ............... शिवसङ्कल्पमस्तु॥

(2) यस्मिन्नृचः ............... शिवसङ्कल्पमस्तु॥

(3) सुषारथिः ............... शिवसङ्कल्पमस्तु॥

**शिक्षक-प्रवृत्तिः**

शिक्षकः शिवसूक्तस्य विश्वकल्याणपरायाः भावनायाः चर्चा कुर्यात्।

**छात्रप्रवृत्तिः**

छात्राः मन्त्राणां कण्ठस्थीकरणं कुर्युः।

**सूक्तिः - तन्मे मनः शिवसङ्कल्पमस्तु।**

●

# 19. अप्रतिरथ-सूक्तम्

**प्रस्तावना**

अप्रतिरथ (न प्रतियोद्धा) सूक्तमिति अप्रतिरथसूक्तम्। प्रतिरथः अर्थात् प्रतियोद्धा, योद्धाशून्यश्च। नास्ति प्रतिरथः प्रतियोद्धा यस्य सः अप्रतरिथः। सूक्तमिदं शुक्लयजुर्वेदसंहितायाः सप्तदशतमेऽध्याये त्रयस्त्रिंशतः एकोनपञ्चाशन्मन्त्रपर्यन्तं वर्तते।

सूक्तेऽस्मिन् ब्रह्मा मुख्यरूपेण इन्द्रं संबोध्य युद्धाय कृतनिश्चयं करोति। अन्तिममन्त्रेषु मरुन्मनुष्यादीन् अपि संबोध्य तान् अपि युद्धाय कृतनिश्चयान् करोति। सूक्तेऽस्मिन् इन्द्रस्य बहूनि विशेषणानि प्रदत्तानि सन्ति।

---

**॥ अथ अप्रतिरथ-सूक्तम्॥**

**ॐ आशुः शिशानोवृषभो न भीमो घनाघनः क्षोभणश्चर्षणीनाम्। संक्रन्दनो निमिषऽएकवीरः शतꣳसेनाऽअजयत्साकमिन्द्रः॥ 1॥**

**अन्वयः** – आशुः शिशानः वृषभः न भीमः घनाघनः चर्षणीनां क्षोभणः संक्रन्दनः अनिमिषः एकवीरः इन्द्रः शतं सेनाः साकम् अजयत्।

**शब्दार्थः** **आशुः** यस्य बहुः विस्तारः तादृशः **न** (अत्र) इव **घनाघनः** वृष्टिकर्ता **चर्षणीनाम्** मनुष्याणाम् **क्षोभणः** चालकः।

**भावार्थः** – शीघ्रगामी, स्ववज्रं तीक्ष्णं, कुर्वन्, वृषभः इव भयंकरः शत्रूणां घातयिता, शत्रुप्रजानां संक्षोभकः निनादकर्ता, निर्निमेषः अत्यन्तः वीरः इन्द्रः एकाकी एव शत्रूणां शतशः सेनाः जयति।

**ॐ संक्रन्दनेनानिमिषेण जिष्णुना युत्कारेण दुश्च्यवनेन धृष्णुना। तदिन्द्रेण जयततत्सहध्वंयुधोनरऽइषुहस्तेनव्वृष्णा॥ 2॥**

**अन्वयः** – (हे) युधो! नरः! संक्रन्दनेन अनिमिषेण जिष्णुना युत्कारेण दुश्च्यवनेन धृष्णुना इषुहस्तेन वृष्णा तदिन्द्रेण जयत तत्सहध्वम् (च)।

**शब्दार्थः** **दुश्च्यवनः** अजय्यः **धृष्णुना** प्रगल्भेन-निपुणेन **वृष्णा** येन वर्षा जायते तेन **संक्रन्दनेन** शब्दकारिणा **युधः** – युद्धकर्तारः।

**भावार्थः** – हे युद्धकर्तारः मानवाः। शब्दकारिणा, अनिमेषेण, जयशीलेन,युद्धकारिणी, अजेयेन, प्रगल्भेन, निर्भयबाणयुक्तहस्तेन, कामानां वर्षित्रा इन्द्रेण यूयं सर्वे स्वशत्रून् अभिभवध्वम्।

**ॐ सऽइषुहस्तैः स निषङ्गिभिर्वशी सꣳसृष्टा सयुधऽइन्द्रो गणेन। सꣳसृष्टजित्सोमपाबाहुशर्द्ध्युग्रधन्वा प्रतिहिता भिरस्ता॥ 3॥**

**अन्वयः** – सः संस्रष्टा वशी, संसृष्टजित्, सोमपाः बाहुशर्धी उग्रधन्वा इन्द्रः इषुहस्तैः निषङ्गिभिः युधः गणेन संस्रष्टा प्रतिहिताभिः (च) अस्ता।

**शब्दार्थः संस्त्रष्टा** निर्माणकर्ता **बाहुशर्धी** बाहुबली **निषङ्गिभिः** खङ्गिभिः।

**भावार्थः** - सः युद्धकारी इन्द्रः बाणहस्तैः खड्गहस्तैः च मरुद्गणैः संयुक्तः भूत्वा सर्वशत्रूणां वशकर्ता अस्ति। सः मिलित्वा युद्धकर्तृकाणां विजेता अस्ति। सः सोमपानकर्ता अस्ति। सः स्वभुजाभ्यां शत्रुघातकः अस्ति। सः अत्यन्तउद्दृगूणधनुर्युक्तः अस्ति। सः धारासारेण बाणवर्षकः अस्ति।

**ॐ बृहस्पते परिदीया रथेन रक्षोहामित्राँ२ऽअपबाधमानः। प्रभन्जन्त्सेनाः प्रमृणो युधा जयन्नस्माकमेध्यविता रथानाम्॥ 4॥**

**अन्वयः** - (हे) रक्षोहा, अमित्रान् अपबाधमानः, सेनाः प्रभञ्जन् युधा प्रमृणः बृहस्पते। रथेन परिदीय अस्माकं रथानाम् अविता एधि।

**शब्दार्थः परीदीय** सर्वतो गत्वा **प्रमृणः** हिंसकान् जयन् **युधा** - युद्धेन।

**भावार्थः** - हे बृहस्पते! त्वं रथेन सर्वत्र संचर। रक्षोघ्न, शत्रुनाशक, शत्रुसेनाध्वंसक, संहारक, युद्धेन शत्रूणां पराजयकर्ताः हे इन्द्र ! त्वम् अस्माकं रथानां रक्षको भव।

**ॐ बलविज्ञायस्थविरः प्रवीरः सहस्वान् वाजी सहमानऽउग्रः। अभिवीरोऽअभिसत्त्वा सहोजाजैत्रमिन्द्ररथमातिष्ठ गोवित्॥ 5॥**

**अन्वयः** - (हे) बलविज्ञायः स्थविरः प्रवीरः सहस्वान् वाजी सहमानः उग्रः अभिवीरः अभिसत्त्वा सहोजाः गोवित् जैत्रं रथम् आतिष्ठ।

**शब्दार्थः** **स्थविरः** पुरातनः **सहस्वान्** बलवान् **सहोजाः** बलादुत्पन्नः।

**भावार्थः** - शत्रूणां बलज्ञाता, चिरन्तनः, प्रकृष्टः, वीरः, बलवान्, अन्नवान्, शत्रुंसहः, उग्रः, वीरैः आवृतः, सेवकैः आवृत्तः, बलेन उत्पन्नः, स्तुतिज्ञः यः अस्ति तादृश हे इन्द्र! त्वं जयशीलं रथम् आरूढो भव।

**ॐ गोत्रभिदं गोविदं वज्रबाहुञ्जयन्तमज्मप्रमृणन्तमोजसा।**

**इमꣳ सजाताऽअनुवीरयध्वमिन्द्रꣳसखायोऽअनुसꣳरभध्वम्॥ 6॥**

**अन्वयः** - (हे) सजाताः! सखायः ! इमम् गोत्रभिदं गोविदं वज्रबाहुम् अज्म ओजसा प्रमृणन्तव वीरयध्वम् इन्द्रम् अनुसंरभध्वम्।

**शब्दार्थः** **वीरयध्वम्** वीरकर्म कुर्वाणम् **ओजसा** बलेन **अज्म** युद्धम् - युद्धजेता **अनुसंरभध्वम्** प्रोत्साहनं दत्त।

**भावार्थः** - पणिनां गोष्ठस्टय भेत्तारं, स्तुतिविदं, वज्रधारिणं, युद्धजेतारं, स्वबेलन शत्रून् मर्दयन्तं इन्द्रं हे समानजन्मानः सखायः ! स्तुतिभिः प्रोत्साहयत। तं च युद्धाय प्रेरयत।

**ॐ अभिगोत्राणि सहसा गाहमानो दयो व्वीरः शतमन्युरिन्द्रः। दुश्च्यवनः पृतनाषाडयुध्योस्माकꣳ सेनाऽअवतुप्रयुत्सु॥ 7॥**

**अन्वयः** - गोत्राणि अभिगाहमानः, अदय, वीरः शतमन्युः, दुश्च्यवनः, पृतनाषाट्, अयुद्धः इन्द्रः अस्माकं सेनाः युत्सु प्रावतु।

**शब्दार्थः** **अभिगाहमानः** सर्वतः मथिता **शतमन्युः** शतयज्ञः **पृतनाषाट्** संग्रामसहनकर्ता **प्रावतु** रक्षतु **युत्सु** युद्धेषु।

**भावार्थः** – असुरकुलानां मेघवृन्दानां वा विलोडयिता, दयाहीनः, वीरः, शतशः कोपवान्, अप्रच्याव्यः, सेनायाः, अभिवाचकः, प्रतियोधारहितः सः इन्द्रः युद्धेषु अस्माकं सेनायाः रक्षां करोतु।

**ॐ इन्द्रऽआसान्नेता बृहस्पतिर्दक्षिणा यज्ञः पुरऽएतु सोमः। देवसेनानामभिभञ्जतीनां जयन्तीनां मरुतोयन्त्वग्रम् ॥ 8 ॥**

**अन्वयः** – इन्द्रः बृहस्पतिः (च) आसां अभिभञ्जतीनां जयन्तीनां देवसेनानां नेता (भवतु)। यज्ञः दक्षिणा, सोमः (च) पुरः एतु। मरुतः अग्रं यन्तु।

**शब्दार्थः** **यज्ञः** विष्णुः **दक्षिणा** दक्षिणदिशतः।

**भावार्थः** – इन्द्रः प्रजापतिश्च अस्माकं सेनायाः नेतारौ स्तः। यज्ञस्य अधिष्ठाता विष्णुः दक्षिणपार्श्वे स्थितः, सोमः अग्रेसरः विद्यते। शत्रूणां सेनायाः शातयित्र्याः विजयन्त्याः च अस्माकं देवसेनायाः अग्रभागे मरुतः चलन्तु।

**ॐ इन्द्रस्य वृष्णो वरुणस्य राज्ञऽआदित्यानां मरुताꣳशर्धऽउग्रम्। महामनसां भवुनच्यवानां घोषो देवानां जयता मुदस्थात्॥ 9 ॥**

**अन्वयः** – वृष्णः इन्द्रस्य राज्ञः वरुणस्य द्वादशानाम् आदित्यानां मरुतां (च) महामनसां भुवनच्यवानां जयतां देवानाम् उग्रं शर्धः उदस्थात् घोषः जितम्।

**शब्दार्थः** **भुवनच्यवानाम्** लोकविजयीनाम् **उदस्थात्** उत्थितम् **शर्धः** बलम्।

**भावार्थः** – कामनानां वर्षकस्य इन्द्रस्य, राज्ञः वरुणस्य, आदित्यानां मरुतां, अत्यन्तउद्गूर्णबलेन महन्मनोयुक्तानां लोकानां प्रच्यावकः, विजेतृणां रथानाम् उद्घोषः भवतु।

**ॐ उद्धर्षय मघवन्नायुधान्युत्सत्वनां मामकानां मनाꣳसि । उद्वृत्रहन्वाजिनांवाजिनान्युद्रथानांजयताँ यन्तु घोषाः॥ 10 ॥**

**अन्वयः** – (हे) मधवन् ! वृत्रहन् ! आयुधानि, मामकानां सत्वनां मनांसि, वाजिनां वाजिनानि (च) उद्धर्षय। जयतां रथानां घोषाः उद्यन्तु।

**शब्दार्थः** **सत्वनाम्** प्राणिनाम् **वाजिनानि** शीघ्रगमनानि **घोषाः** शब्दाः **उद्धर्षय** उत्कर्षं कुरु।

**भावार्थः** – हे धनिक इन्द्र ! अस्माकं हतोत्साहितानां वीराणां मनोबलम् आयुधानि च पुनः वर्धय। हे वृत्रहन् ! वेगवताम् अश्वानां विजेतृणां रथानाम् उद्घोषः भवतु।

**ॐ अस्माकमिन्द्रः समृतेषुध्वजेष्वस्माकँया ऽइषवस्ताजयन्तु ।**
**अस्माकं वीराऽउत्तरे भवन्यत्वस्माँ२ऽउदेवाऽअवता हवेषु॥ 11 ॥**

**अन्वयः** – (हे) देवाः! ध्वजेषु समृतेषु अस्माकम् इन्द्रः। (रक्षिता भवतु) याः इषवाः ताः जयन्तु उ अस्माकं वीराः उत्तरे, हवेषु अवत।

**शब्दार्थः** **समृतेषु** संयुक्तेषु **उ** एवञ्च **उत्तरे** उत्कृष्टाः भवेयुः।

**भावार्थः** – उपर्युत्थिताः अस्माकं केतवः शत्रूणां ध्वजाभिमुखाः भवेयुः तदा इन्द्रस्य कृपया अस्माकं बाणाः शत्रून् जयन्तु। अस्माकं वीराः शत्रुजयिनः भवन्तु। हे देवाः! आहूताः यूयम् अस्माकं रक्षकाः भवत।

**ॐ अमीषां चित्तं प्रतिलोभयन्ती गृहाणाङ्गान्यप्वेपरेहि।**

**अभिप्रेहि निर्दह हृत्सु शोकैरन्धेनामित्रास्तमसासचन्ताम्॥ 12॥**

**अन्वयः** – (हे) अप्वे! अमीषां शत्रूणां चित्तं प्रतिलोभयन्ति अङ्गानि गृहाण (ततः) परोहि। अभिप्रेहि हृत्सु (च) शौकैः निर्दहः। अमित्राः अन्धेन तमसा सचन्ताम्।

**शब्दार्थः** **एहि** गच्छ **अमित्राः** शत्रवः **तमसा** अन्धकारेण **सचन्ताम्** सह गच्छतु।

**भावार्थः** – शत्रूणां चित्तचालिके हे अप्वदेवते ! एतेषां शत्रूणां चित्तानां चित्तानि लोभयन्ती त्वं तेषाम् अङ्गानि नीत्वा दूरं पलायनं कुरु। अन्येषाम् अङ्गानां ग्रहणाभिलाषया पुनः तेषु प्रविष्टा भव। त्वम् एतेषां हृदयानि पुत्रादीनां शोकपरितप्तानि कुरु। अस्माकं शत्रवः गाढान्धकारे संश्लिष्टाः भवेयुः।

**ॐ अवसृष्टापरापतशरव्ये ब्रह्मꣳशिते। गच्छामित्रान्प्रपद्यस्व मामीषाङ्कञ्चनोच्छिषः॥ 13॥**

**अन्वयः** – (हे) शरव्ये ! अवसृष्टा परापत। अमित्रान् गच्छ, प्रपद्यस्व, अमीषां कंचन मा उच्छिषः।

**शब्दार्थः** **शरव्ये** हे हिंसिके **अवसृष्टा** मुक्ता **प्रपद्यस्व** प्रविश।

**भावार्थः** – हे मन्त्रतिक्ष्णीकृते! हे शरवृष्टे ! त्वं क्षिप्तायां सत्यां शत्रून् अभिमुखिनी भव। शत्रून् प्रापय। हे शरवृष्टे! एतेषु शत्रुषु नैकोऽपि जीवितः अवशिष्येत।

**ॐ प्रेताजयतानरऽइन्द्रोवः शर्मयच्छतु। उग्रावः सन्तु बाहवोऽना धृष्य्यायथासथ॥ 14॥**

**अन्वयः** – (हे) नरः ! प्रेत जयत। इन्द्रः शर्म विच्छतु। अनाधृष्याः असथ, वः बाहवः उग्राः।

**शब्दार्थः** **प्रेत** गच्छत **शर्म** जयेन आगतं सुखम् **अनाधृष्याः** अतिरस्कार्याः **असथ** भवत।

**भावार्थः** – मम सेनायाः हे मानवाः ! यूयं शत्रूणाम् उपरि आक्रमणं कुरुत। तान् जयत। युष्मान् इन्द्रः सुखयतु। युष्माकं भुजाः तथा उद्दूर्णबलयुक्ताः भवेयुः यथा यूयं कदापि पराजिताः न भवेयुः।

**ॐ असौ यासेना मरुतः परेषामभ्येति नऽओजसास्प्पर्धमाना। ताङ्गूहततमसापव्व्रतेन यथामीऽअन्न्योऽअन्न्यं न यानन्॥ 15॥**

**अन्वयः** – (हे) मरुत ! असौ परेषां या ओजसा स्पर्धमाना सेना नः अभ्यैति, अपव्रतेन तमसा अमी अन्योन्यं न जानन् गूहत।

**शब्दार्थः** **अभ्यैति** आगच्छति **अपव्रतेन** अकर्मणा **जानन्** जानीयुः **गूहत** आवरणं कुरुत।

**भावार्थः** – हे मरुतः! बलेन भवद्भिः सह स्पर्धमाना इयं या शत्रुसेना अस्माकम् उपरि आक्रमणाय उद्युक्ता अस्ति, तां तथा प्रगाढे अन्धकारे आच्छादितां कुरु यथा सा किंकर्तव्यविमूढा भूत्वा परस्परम् अन्योन्यं ज्ञातुं न शक्नुयात्।

**ॐ यत्रबाणाः ससम्पतन्ति कुमारा व्विशिखाऽइव। तन्नऽइन्द्रो बृहस्प्पतिरदितिः शर्म यच्छतु व्विश्वाहा शर्म यच्छतु॥ 16॥**

**अन्वयः** – कुमाराः विशिखाः इव यत्र बाणाः संपतन्ति। बृहस्पतिः अदितिः विद्याहा इन्द्रः शर्म यच्छतु शर्म यच्छतु।

**शब्दार्थः** **विशिखाः** मुण्डिताः **अदितिः** अखण्डितशक्तिः **बृहस्पतिः** मन्त्रस्वामी **शर्म** जयतः आगतं सुखम्।

**भावार्थः** – यस्मिन् युद्धे कुमाराणां केशसदृशां बाणाः वर्षन्ति तत्र इन्द्रः, बृहस्पतिः तथा अदितिः च सदा अस्मान् शान्तिं प्रददतु।

**ॐ मर्माणि ते व्वर्मणा च्छादयामि सोमस्त्वा राजामृतेनानुवस्ताम्। उरोर्व्वरीयो व्वरुणस्ते कृणोतु - जयन्तन्त्वानुदेवा मदन्तु ॥17॥**

**अन्वयः** – मर्माणि ते वर्मणा च्छादयामि। राजा सोमः अमृतेन त्वा अनुवस्ताम्। वरुणः ते उरोः वरीयः कृणोतु। देवाः जयन्तं त्वा अनुमदन्तु।

**शब्दार्थः** – **मर्माणि** शरीरे जीवस्थानानि **वर्मणा** कवचेन **अनुवस्ताम्** आच्छादयेत् **अनुमदन्तु** अनुकूलाः भूत्वा उत्साहयन्तु।

**भावार्थः** – हे वीर! तव मर्मस्थानानि अहं कवचैः आच्छादयामि। राजा सोमः तुभ्यम् अमृते निवासयतु। राजा वरुणः तव कवचं पृथोः अपि सुदृढं भावयतु। जयिनं त्वां देवताः इतोऽप्यधिकं प्रोत्साहनं दद्युः।

**शब्दार्थाः**

**आशुः** शीघ्रगामी **चर्षणीनाम्** मनुष्याणाम् **अनिमिषेण** एकचित्तेन **बलविज्ञायः** बलस्य ज्ञाता **ओजसा** बलेन **युत्सु** युद्धेषु **एतु** गच्छतु **एन्तु** गच्छन्तु **मघवा** इन्द्रः **अवत** रक्षणं कुरुत **वः** युष्माकं **वर्मणा** कवचेन।

**स्वाध्यायः**

**1. प्रदत्तविकल्पेभ्यः योग्यविकल्पं चित्वा उत्तरं यच्छत।**

(1) प्रतिरथः अर्थात् किम्?

(क) रथः (ख) योद्धा (ग) सारथिः (घ) प्रतियोद्धा

(2) सूक्तमिदं संहितायाः कतमेऽध्याये वर्तते?

(क) सप्तदशतमे (ख) अष्टदशतमे (ग) विंशतितमे (घ) त्रिंशत्तमे

(3) चर्षणीनाम् इत्यस्य कोऽर्थः?

(क) दानवानाम् (ख) मनुष्याणाम् (ग) देवानाम् (घ) देवतानाम्

(4) यज्ञस्य अधिष्ठातृदेवः कः?

(क) इन्द्रः (ख) बृहस्पतिः (ग) विष्णुः (घ) ब्रह्मा

(5) सेनायाः नेता कः?

(क) इन्द्रः (ख) चन्द्रः (ग) मरुत् (घ) विजयिनी

**2. प्रश्नामुत्तराणि यच्छत।**

(1) आशुः शिशानो ...... मन्त्रस्य व्याख्यानं कुरुत।

(2) संक्रन्दनेन ....... इति मन्त्रे कं संबोध्य उच्यते ?

(3) इन्द्रस्य विशेषणानि प्रदर्शयत।

(4) अमीषां चित्तं ...... इति मन्त्रं व्याख्यायत।

(5) मनुष्येभ्यः कः सुखं ददातु ?

**3. मन्त्रपूर्ति कुरुत।**

(1) स इषुहस्तैः ................ प्रतिहताभिरस्ता॥

(2) गोत्रमिदं ................ अनुसꣳरभध्वम्॥

(3) प्रेताजयता ................ यथासथ॥

(4) यत्र बाणाः ................ यच्छतु॥

(5) मर्माणि ................ मदन्तु॥

**शिक्षक-प्रवृत्तिः**

शिक्षकः छात्रेभ्यः अप्रतिरथसूक्तविषयकं व्याख्यानं दद्यात्।

**छात्रप्रवृत्तिः**

छात्राः मन्त्राणां कण्ठस्थीकरणं कुर्युः।

**सूक्तिः - पुमान् पुमांसं परिपातु विश्वतः।**

●

# 20. मैत्रेय-सूक्तम्

**प्रस्तावना**

अस्माकं शास्त्रेषु सूर्यस्य उपासनायाः महत्त्वं बहु प्रतिपादितं वर्तते।

यथा – **'आरोग्यं भास्करादिच्छेत्'** इति।

मित्रः अर्थात् सूर्यः। मित्रा अर्थात् सूर्यस्य शक्तिः। तस्य प्रतिपादकं सूक्तं मैत्रेयसूक्तम्। मैत्रेय सूक्तमिदं शुक्लयजुर्वेदस्य त्रयस्त्रिंशत्तमे अध्याये अस्ति।

अस्मिन् सूक्ते सूर्यस्य वर्णनं कृतं वर्तते तथा च चराचरस्य अपि जगतः आत्मा सूर्यः एव निर्दिष्टः। सूर्यद्वारा रोगमुक्तिः जनानाञ्च चैतन्यवर्धनम्, ऊर्जाप्राप्तिः आदि जायते।

---

**॥ अथ मैत्रेय-सूक्तम्॥**

**ॐ विभ्राड् बृहत्पिबतु सौम्यं मध्युर्दधद्यज्ञपतावविहृतम्। व्वातजूतो मध्वाऽअभिरक्षतित्क्मना प्रजाः पुपोष पुरुधा व्विराजति॥ 1॥**

**अन्वयः** – बिभ्राट् बृहत् सोम्यं पिबतु। यज्ञपतौ अविहुतम् आयुः दधत् वातजूतः आत्मना प्रजाः अभिरक्षति पुपोष पुरुधा विराजते।

**शब्दार्थः** **विभ्राट्** विविधरीत्या प्रकाशमानः **पुरधा** बहुधा **अविहृतम्** अखण्डितम् **बृहत्** – महत्।

**भावार्थः** – विशेषतया शोभमानः महान् सूर्यः यज्ञपतौ यजमाने अचञ्चलम् आयुष्यं धारयन् सोममयं मधु पिबतु। वायुना प्रेरितः यः सूर्यः स्वयमेव प्रजाः रक्षति ताश्च विविधतया पोषयति। सः सूर्यः विशिष्य द्युलोके दीप्यते।

**ॐ उदुत्यञ्जातवेदसं देवं व्वहन्ति केतवः। दृशे व्विश्वाय सूर्य्यम्॥ 2॥**

**अन्वयः** – केतवः विधाय दृशे उदुत्यं जातवेदसं सूर्यं देवम् उद्वहन्ति स्वाहा।

**शब्दार्थः** **केतवः** रश्मयः **दृशे** दर्शनाय **जातवेदसम्** जातप्रज्ञानम्।

**भावार्थः** – तं जातप्रज्ञानं सूर्यदेवं तस्य रश्मयः विश्वदर्शनाय उपरि द्युलोकम् आनयन्ति।

**ॐ येना पावक चक्षसा भुरण्यन्तं जनाँ२ऽअनु। त्वं व्वरुण पश्यसि॥ 3॥**

**अन्वयः** – (हे) पावक ! येन चक्षसा भुरण्यन्तमनुपश्यसि। त्वं वरुण ! जनान्।

**शब्दार्थः** **पावक** अग्ने **भुरण्यम्** भुरण्युः पक्षीप्रकारः तादृशः।

**भावार्थः** – ये पवित्रकारिन् सूर्य ! त्वं स्वीयेन येन दर्शनेन सर्वमेधयाजिनम् आत्मानं कृत्वा जनान् पश्यसि। तेन दर्शनेन सर्वमेधयाजिनः अस्मान् अपि पश्य।

**ॐ दैव्यावध्यवर्यूऽआगतᳪरथेन सूर्य्यत्वचा**

**मध्वायज्ञᳪसमञ्ञाथे तं प्रत्क्नथायं व्वेनश्चित्रदेवानाम्॥ 4॥**

**अन्वयः** – (हे) देव्यौ अश्विनौ सूर्यत्वचा रथेन आगतम्। मध्वा यज्ञं समञ्जाथे। तं प्रत्क्नथा अयं वेनः चित्रं देवानाम्।

**शब्दार्थः** **मध्वा** मधुरेण **आगतम्** आगच्छतम् **समञ्जाथे** बहूनि हर्वीषि कुरुतम्।

**भावार्थः** – हे दिव्यौ वैद्यौ अश्विनौ! स्वकीयाभ्यां सूर्यप्रभामयाभ्यां रथाभ्यां यज्ञम् आगच्छताम्। मध्वादिभिः यज्ञं सम्प्रक्षयतम्।

**ॐ तं प्रत्क्नथा पूर्व्वथा विश्वथेमथा ज्येष्ठतातिम् बर्हिषदꣳस्वर्विदम्। प्रतीचीनं व्वृजनं दोहसे धुनिमाशुञ्जयन्तमनु यासु व्वर्द्धसे ॥5॥**

**अन्वयः** – तम् प्रत्क्नथा पूर्वथा विश्वथा इमथा ज्येष्ठतातिं बर्हिषदं स्वर्विदं प्रतीचीनं धुनिम् आशुं जयन्तं पासु अनुवर्धसे।

**शब्दार्थः** **प्रत्क्नथा** पुराणरीत्या **इमथा** अध्यतनरीत्या **तातिम्** विस्तारम् **आशुम्** विस्तारयुक्तम्।

**भावार्थः** – हे सोम ! चिरन्तन पूर्वकाल सर्वकाल वर्तमानकालस्थानां सर्वेषां ऋषीणाम् समानः सर्वश्रेष्ठः त्वं यस्य यजमानस्य यज्ञक्रियासु अनुवर्धसे तस्य यजमानस्य कृते यज्ञमागत्य दर्भासने उपवेशकम्, स्वर्गदम्, शत्रुं प्रति गमनशीलम्, बलवन्तं, शत्रून् धुन्वन्तं, शत्रून् धुन्वन्तं, क्षिप्रकारिणं, धनादिभिः शत्रुजयिनं च इन्द्रं प्रार्थयसि।

**ॐ अयं व्वेनश्चोदयत्पृश्निगर्भा ज्योतिर्जरायूरजसो व्विमाने। इममपाꣳसङ्गमे सूर्य्यस्य शिशुन्न विप्रा मतिभीरहन्ति॥6॥**

**अन्वयः** – अयं ज्योतिर्जरायुः वेनः रजसो विमाने पृश्निगर्भा अयः चोदयत्। इमम् अपां सूर्यस्य संगमे शिशुं न विप्राः मतिभिः इहन्ति।

**शब्दार्थः** **वेनः** कान्तः **चोदयत्** प्रेरयति **न** इव।

**भावार्थः** – विद्युतः ज्योतिषा जरायुवत् परिवेष्टितः अयं सोमः द्युलोकस्य गर्भे विद्यमानानां जलानां निर्माणे तान् सम्प्रेरयति अयं सोमः मेधाविनः अध्वर्योः, प्रतिष्ठातुः सूर्यस्य जलानि यदा संगतानि भवन्ति तदा जलानि बालकवत् स्तुतिभिः अर्चति।

**ॐ चित्रं देवानामुदगादनीकं चक्षुर्म्मित्रस्य व्वरुणस्याग्नेः।**
**आप्राद्यावापृथिवीऽअन्तरिक्षꣳसूर्य्यऽआत्मा जगतस्तस्तत्थुषश्च॥7॥**

**अन्वयः** – जगतः तस्थुषश्च आत्मा देवानामनीकम् सूर्यः चित्रमुदगात् मित्रस्य वरुणस्य अग्नेः द्यावापृथिवी आप्राः।

**शब्दार्थः** **अनीकम्** समूहः **तस्थुषः** स्थावरस्य **चित्रम्** आश्चर्यम् **आप्राः** आपूरितवान्।

**भावार्थः** – अस्यार्थं तृतीयेपाठे पश्यन्तु।

**ॐ आनऽइडाभिर्विदथे सुशस्ति व्विश्वानरः सवितादेवऽएतु। अपि यथा युवानो मत्सथा नो व्विश्वञ्जगदक्षिपित्वे मनीषा ॥8॥**

**अन्वयः** – विश्वानरः सविता देवः नः विदथे इडाभिः सुशस्ति आ एतु। (हे) युवानः! अपि अभिपित्वे नः विश्वं जगत् मनीषा मत्सथ।

**शब्दार्थः** **विदथे** यज्ञे **आ एतु** आगच्छतु **अभिपित्वे** अभिपतने **मत्सथ** तृप्यथ।

**भावार्थः** – सुप्रशस्यः सर्वेषाः नेता सूर्यः अस्माकं स्तुतिभिः संस्तुतः सन् यज्ञम् आगच्छतु। हे जराहिताः देवाः! आगमनकाले येन प्रकारेण यूयं प्रकारेण यूयं तृप्यथ तथा अस्माकं पुत्रगवादिकं विश्वं मनीषया तर्पयथ।

**ॐ यदद्य कच्च व्वृत्रहन्नुदगाऽअभिसू-सूर्य्य। सर्व्वं तदिन्द्र ते व्वशे॥9॥**

**अन्वयः** – (हे) वृत्रहन् ! सूर्य ! इन्द्र ! अश्व यत् कच्च अभ्युदगाः, सर्व तं वशे।

**शब्दार्थः** – **यत् कच्च** यत्र कुत्र चित् **अभ्युदगाः** अभ्युदेषि।

**भावार्थः** – हे अन्धकारनाशक सूर्य अद्य त्वं यदा उदयं प्राप्नुहि तदा हे ऐश्वर्यवन् ! अस्माकम् इदं हविरादिकं सर्व तवैव वशे भवतु।

**ॐ तरणिर्व्विश्वदर्शतो ज्जयोतिष्कृदसि सूर्य। व्विश्वमा भासि रोचनम्॥ 10॥**

**अन्वयः** – तरणिः विश्वदर्शतः ज्योतिष्कृत् (हे) सूर्य रोचनं विधमाभासि।

**शब्दार्थः** **तरणिः** तरणकर्ता **विधदर्शतः** दर्शनीयः **रोचनम्** दीप्यमानम् **आभासि** प्रकाशयसि।

**भावार्थः** – नौकासदृश तारक, सर्वेषां कृते योग्यदर्शन हे सूर्य ! त्वमेव ज्योतिर्धारकः असि। त्वमेव इदं प्रकाशमानं विश्वं आभासितं करोषि।

**ॐ तत्सूर्य्यस्य देवत्त्वं तन्महित्वं मद्ध्या कर्त्तोर्व्विततठ्ठसञ्जभार। ष्वदेदयुक्त हरितः सधस्थादाद्रात्री व्वासस्तनुते सिमस्म्मै ॥ 11॥**

**अन्वयः** – सूर्यस्त तत् महित्वं देवत्वं कर्तोः मध्या विततं संजभारः यदा इत् हरितः सधस्थात् अयुक्त आत् रात्री सिमस्मै वासः तनुते।

**शब्दार्थः** **महित्वम्** महत्त्वम् **मध्या** मध्ये **विततम्** विस्तारितम् **इत्** एव **आत्** अनन्तरम्।

**भावार्थः** – तदेव सूर्यस्य देवत्वं, स एव तस्य महिमा यत् सः कर्मकारकः कार्यसमाप्तेः मध्ये एव स्थगयति। यदा अयं सूर्यः रसहारिणः रश्मीन् तस्य सहवासस्थानात् पृथिव्याः स्वमण्डले प्रतिहरति तदा रात्रिः सर्वेषां कृते कृष्णवस्त्रमयम् अन्धकारं विस्तारयति।

**ॐ तन्मित्रस्य व्वरुणस्याभिचक्षे सूर्य्यो रूपङ्कृणते द्यौरुपस्थे।**

**अनन्तमन्यद्रुशदस्य पाजः कृष्णमन्यद्धरितः सम्भरन्ति॥12॥**

**अन्वयः** – सूर्यः द्योः उपस्थे मित्रस्य वरुणस्य कृणुते अभिचक्षे। अन्यत् एकं याजः अनन्तं रुशत् कृष्णम् अन्यत् हरितः संभरन्ति।

**शब्दार्थः** **उपस्थे** उत्संगे **अभिचक्षे** पश्यति **याजः** रूपम् **रुशत्** शुक्तम्।

**भावार्थः** – मित्रावरुणयोः दर्शनाय सूर्यः द्युलोके स्वरूपं प्रकटयति। अस्य सूर्यस्य भ्रामत् तेजः स्वरूपं भिन्नम् अनन्तं चास्ति। अस्य अपरं कृष्णस्वरूपं रसहारकाः रश्मयः एव वहन्ति।

**ॐ बण्महाँर॒ऽसि सूर्य्य बडादित्य महाँ२ऽअसि। महस्ते सतो महिमा पनस्यतेद्धा देव महाँ२ऽअसि॥ 13॥**

**अन्वयः** – (हे) सूर्य सुवति बट् सत्यं महान् असि। (हे) आदित्य आदतेंऽशु महः सतः ते महिमा पनस्यते। हे देव ! अद्धा।

**शब्दार्थः** **सुवति** प्रेरयति **बट्** सत्यम्।

**भावार्थः** – हे सूर्य! सत्यं त्वं महान् असि। हे आदित्य! त्वं निश्चयेन महान् असि। सत्यं तव सूर्यस्य तेजोमहिमा संस्तुतः भवति। हे देव! सत्यं त्वं महान् असि।

**ॐ बट् सूर्य्य श्श्रवसा मर्हा२ऽअसि सत्रादेवमहा२ऽअसि। मह्ना देवानामसुसूर्य्यः पुरोहितो विभु ज्योतिरदाभ्यम्॥ 14॥**

**अन्वयः** – (हे) सूर्य !बट् श्रवसा मह्ना असुर्यः पुरोहितः ज्योतिः अदाब्यं देवानां महान् असि।

**शब्दार्थः** **मह्ना** महत्त्वेन **श्रवसा** धनेन **अदाभ्यम्** अनुपहिंसितम्।

**भावार्थ** – हे सूर्य ! त्वं यशसा महान् असि। इदं सत्यमेव अस्ति। हे देव! त्वं महान् असि। प्राणवान् अयं सूर्यः स्वमहिम्ना देवानां पुरोहितः अस्ति। सः व्यापकः अनुपहिंसितज्योतिः स्वरूपः चास्ति।

**ॐ श्रायन्तऽइव सूर्य्यं व्विश्वेदिन्द्रस्य भक्षत। व्वसूनि जाते जनमानऽओजसा प्रति भागन्न दीधिम॥ 15॥**

**अन्वयः** – सूर्यं श्रायन्त इव इन्द्रस्य विश्वा इत् भक्षत। वसूनि जाते ओजसा भागं न प्रतिदीधिम।

**शब्दार्थः** – **प्रतिदीद्दिम** स्थापयेम **इत्** एव।

**भावार्थः** – सूर्यम् आश्रित्य एव सूर्यरश्मयः इन्द्रस्य धनवर्षां सर्वत्र विकिरन्ति। तथैव वयमपि तेजसा उत्पादितानि धनानि, उत्पन्नेषु उत्पत्स्यमानेषु पुत्रादिषु दायभागरूपेण धारयामः।

**ॐ अद्यादेवाऽउदिता सूर्य्यस्य निरंहसः पिपृतानिरवद्यात्। तन्नो मित्रो व्वरुणो मामहन्तामदितिः सिन्धुः पृथिवीऽउतद्यौः॥ 16॥**

**अन्वयः** – देवाः ! नः अंहसः अवद्यात् अद्य सूर्यस्य उदिता निः पिपृत। तत्रः मित्रः वरुणः अदितिः देवमाता सिन्धुः समुद्रो नदी पृथिवी उत द्यौः मामहन्ताम्।

**शब्दार्थः** – **उत** एवञ्च **निःपिपृत** निर्मुञ्चत **अंहसः** पापात् **अवद्यात्** दुर्यशसः मामहन्ताम् पूजयन्तु।

**भावार्थः** – अद्य सूर्योदये सति हे देवाः ! अस्मान् पापेभ्यः अपयशोभ्यः च मोचयत। मित्रः, वरुणः, अदितिः, सिन्धुः, पृथिवी, द्यौश्च मां तथैव निष्पापतया अनिन्द्यतया स्वीकुर्वन्तु।

**ॐ आ कृष्णेन न रजसा व्वर्तमानो निवेशयन्नमृतं मर्त्यञ्च। हिरण्ययेन सविता रथेना देवो याति भुवनानि पश्यन् ॥ 17॥**

**अन्वयः** – सविता देवः हिरण्ययेन रथेन कृष्णेन रजसा आवर्तमानः अमृतं मर्त्यं निवेशयन् भुवनानि पश्यन् आयाति।

**शब्दार्थः** **हिरण्ययेन** सुवर्णमयेन **आवर्तमानः** पुनर्भ्रमणं कुर्वन् **निवेशयन्** स्थापयन्।

**भावार्थः** – कृष्णेन प्रकाशेन सह वर्तमानः सूर्यः मनुष्यान् देवान् च स्वस्वस्थानेषु प्रतिष्ठापितान् कुर्वन्, लोकलोकान्तरान् पश्यन् स्वर्णिमेन रथेन संचरति।

**शब्दार्थाः**

**विभ्राट्** सूर्यः **पुरुधा** बहुधा **आ एतु** आगच्छतु **आभासि** प्रकाशयसि **रोचनम्** दीप्यमानम् **विततम्** विस्तरितम् **आत्** अनन्तरम् **अभिचष्टे** पश्यति **रुशत्** शुक्लम् **बट्** सत्यम् **पनस्यते** लोकैः स्तूयते **महन्नो** महत्त्वेन **जनमाने** उत्पद्यमाने एवं जायमाने **प्रतिदीधिम** धारयाम **निःविवृत** निर्मुञ्चत।

**स्वाध्यायः**

1. **प्रदत्तविकल्पेभ्यः योग्यविकल्पं चित्वा उत्तरं यच्छत।**

(1) अस्मिन् सूक्ते कति मन्त्राः सन्ति?

(क) सप्तदश (ख) षोडश (ग) चतुर्दश (घ) त्रयोदश

(2) मित्रा अर्थात् किं भवति?

(क) सूर्यस्य महिमा (ख) सूर्यस्य बलम् (ग) सूर्यस्य शक्तिः (घ) एकमपि न

(3) अयं ....... चोदयत्पृश्निगर्भा। पूर्तिं कुर्वन्तु।

(क) श्येनः (ख) स्यन्दनम् (ग) वेनः (घ) कायः

(4) प्रतीचीनं ........ दोहसे। पूर्तिं कुर्वन्तु।

(क) सृजनं (ख) वृजिनं (ग) वृजनं (घ) ऋद्धिम्

(5) बट् सूर्य....... महाँ असि।

(क) सत्रादेव (ख) श्रवसा (ग) सूर्यः (घ) पुरोहितो

**2. प्रश्नामुत्तराणि लिखत।**

(1) मैत्रेयसूक्तं शब्दस्य व्याख्यां कुर्वन्तु ?

(2) 'बिभ्राड् बृहत् पिबतु' इति मन्त्रस्य भावार्थः लेखनीयः।

(3) नवममन्त्रे उदयानन्तरं किं प्रार्थितम् ?

(4) 'श्रायन्त इव' इति मन्त्रस्य भावार्थः लेखनीयः।

(5) अस्मिन् सूक्ते सूर्यस्य यन्महत्त्वं प्रतिपादितम् तस्य संक्षेपं कृत्वा लिखन्तु।

**3. मन्त्रपूर्ति कुरुत।**

(1) ब्बिभ्राड् ................ विराजति॥

(2) तन्मित्रस्य ................ सम्भरन्ति॥

(3) आ कृष्णेन ................ पश्यन्॥

**शिक्षक-प्रवृत्तिः**

शिक्षकः सूक्तस्यास्य कुत्र-कुत्र यज्ञेषु उपयोगो भवति इति ज्ञापयेत्।

**छात्रप्रवृत्तिः**

छात्राः अस्य सूक्तस्य विशिष्टेषु यागेषु कथमुपयोगः इति अन्वेषयन्तु।

**सूक्तिः - मित्रस्य चक्षुषा समीक्षामहे।**

●

| 21. | रुद्र-सूक्तम् (1) |
|---|---|

**प्रस्तावना**

प्रस्तुतं रुद्रसूक्तं शुक्लयजुर्वेदस्य षोडशे अध्याये वर्तते। अस्मिन् सूक्ते भगवतः रुद्रस्य स्तुतिः कृता वर्तते।

सूक्तस्य इदं वैशिष्ट्यं यत् अस्मिन् सूक्ते शस्त्र-विद्यायाः अपि प्रतिपादनमस्ति तथा च तस्यां नैपुण्यं कथमागच्छेत्। इत्यपि प्रतिपादितम्। तस्मादिदं सूक्तं ''विजयसूक्त'' मिति नाम्ना अपि विख्यातम्।

---

**॥ अथ रुद्रसूक्तम् ( 1 )॥**

**ॐ नमस्ते रुद्र मन्यवऽउतोतऽइषवे नमः। बाहुब्भ्यामुत ते नमः॥ 1॥**

**अन्वयः** - रुद्र ! ते नमः ते मन्यवे उत ते इषवे नमः। बाहुभ्यां ते उत नमः।

**शब्दार्थः** **उत** एवञ्च **मन्यवे** क्रोधाय **इषवे** बाणाय।

**भावार्थः** - हे रुद्र! तव रौद्ररूपाय नमः, अपि च तव बाणाय नमः, अपि च तव बाहुभ्यां नमः अस्तु।

**ॐ याते रुद्र शिवा तनूरघोरापापकाशिनी। तया नस्तन्वा शन्तमया गिरिशन्ताभिचाकशी हि॥ 2॥**

**अन्वयः** - रुद्र ! गिरिशन्त या ते शिवा अघोरा अपापकाशिनी तनूः तया तन्वा शन्तमयानः अभिचाकशीहि।

**शब्दार्थः** **शिवा** शान्ता **अघोरा** अविषमा **अभिचाकशीहि** पश्य।

**भावार्थ** - हे रुद्र! तव यत् मङ्गलमयं, अघोरं, अपापप्रकाशकम् इदृशं यत् शरीरम् अस्ति। हे गिरिशन्त! तेन शरीरेण अस्मान् अभिपश्य।

**ॐ यामिषुङ्गिरिशन्त हस्ते बिभर्ष्यस्तवे। शिवाङ्गिरित्रताङ्कुरु मा हि॑ꣳसीः पुरुषजगत्॥ 3॥**

**अन्वयः** - गिरिशन्त! यामिषुं अस्तवे हस्ते बिभर्षि। गिरित्र! तां शिवां कुरु। पुरुषं जगत् मा हिंसीः।

**शब्दार्थः** **अस्तवे** क्षेप्तुम् **बिभर्षि** धारयसि।

**भावार्थः** - हे गिरिश! शत्रुषु क्षेप्तं त्वं यं बाणं स्वहस्ते धारयसि, हे गिरित्रात ! त्वं तं शान्तं भावय। त्वं तेन बाणेन कमपि मनुष्यं चरं प्राणिनं वा मा जाहि।

**ॐ शिवेन व्वचसा त्वा गिरिशाच्छा व्वदामसि। यथानः सर्व्वमिज्जगदयक्ष्मꣳसुमनाऽअसत्॥ 4॥**

**अन्वयः** - गिरिश! शिवेन वचसा त्वा अच्छ। सर्वं नः इत् जगत् अपक्ष्मम् असत्।

**शब्दार्थः** **अच्छ** प्राप्नुयात् **इत्** एव **अपक्ष्मम्** नीरोगम् **असत्** भवेत्।

**भावार्थः** - हे गिरिशायिन् ! वयं शान्तिकारेण स्तोत्रेण त्वाम् अभिवदामः। येन अस्माकं समग्रं जगत् रोगरहितं प्रसन्नं च भवेत्।

**ॐ अद्ध्यवोचदधिवक्ता प्रथमो दैव्यो भिषक् ।**
**अहीँश्च सर्वाञ्जम्भयन्त्सर्व्वाश्च यातुधान्यो धराचीः परासुव ॥ 5॥**

**अन्वयः** - अधिवक्ता दैव्यः भिषक् माम् अध्यवोचत्। सर्वाश्च (अधराचीः) यातुधान्यः सर्वानहीन् जम्भयन् परासुव।

**शब्दार्थः** **भिषक्** वैद्यः **अधराचीः** अधोगम्याः **यातुधान्यः** राक्षस्य **जम्भयन्** विनाशयन्।

**भावार्थः** - सर्वप्रधानः, देवस्य एकमात्र वैद्यः, प्रथमः वक्ता शिवः अस्मान् अधिवक्तु। हे रुद्र ! सर्वान् सर्पान् स्तम्भयन् सर्वाः राक्षसीः अपि जडीभावयन् ताः दूरे क्षिप।

**ॐ असौयस्ताम्म्रोऽअरुणडऽउतबभ्रु: सुमङ्गल:। येचैनꣳरुद्राऽअभितो दिक्षुश्रिता: सहस्त्रशोवैषाꣳहेडऽईमहे ॥ 6 ॥**

**अन्वय:** – असौ य: ताम्र: अरुण: अ बभ्रु: सुमङ्गल:, ये रुद्रा: एनम् अभित: दिक्षु श्रिता: एषां हेड: ईमहे।

**शब्दार्थ:** **बभ्रु:** पिङ्गलवर्णी **हेड:** क्रोध: **ईमहे** –स्तुम:।

**भावार्थ:** – अयं य: सूर्यरूप: ताम्रवर्ण:, रक्तवर्ण:, बभ्रुवर्ण: मङ्गलरूप: रुद्र: अस्ति ये च अंशरूपा: सहस्त्रं रुद्रा: सर्वासु दिक्षु अधिश्रिता: तेषां क्रोध: दूरीभवतु इति प्रार्थयामहे।

**ॐ असौ यो वसर्पति नीलग्रीवो व्विलोहित: ।**

**उतैनङ्गोपा अदृश्रन्नदृश्रन्नुदहार्य्य: सदृष्टो मृडयातिन: ॥ 7 ॥**

**अन्वय:** – असौ य: नीलग्रीव: विलोहित: अवसर्पति। एनं गोपा: अदृश्रन् उत उदहार्य: अदृश्रन्। स: दृष्ट: न: मृडयाति।

**शब्दार्थ:** **नीलग्रीव:** नीलकण्ठ: **अवसर्पति** आगच्छति **अदृश्रन्** पश्यन्ति **उदहार्य:** जलहारिण्य:।

**भावार्थ:** – नीलकण्ठ:, विशेषतया रक्तवर्ण: अयं रुद्र: शनै: शनै: सर्पति, इमं तु सामान्या: गोपालका: पश्यन्ति, जलहारिण्य: अपि पश्यन्ति। अस्माभि: अपि सभयं दृष्टं अयं अस्मान् सुखितान् करोतु।

**ॐ नमोस्तुनीलग्रीवाय सहस्त्राक्षाय मीढुषे। अथो येऽअस्य सत्त्वानो हन्तेभ्योकरन्नम: ॥ 8 ॥**

**अन्वय:** – सहस्राक्षाय मीढुषे नीलग्रीवाय नमोऽस्तु। अथो अहं ये सत्त्वान: तेभ्य: नम: अकरम्।

**शब्दार्थ:** **मीढुषे** तरुणाय **अथो** तथा च **सत्त्वान:** प्राणिन: **अकरम्** अकरवम्।

**भावार्थ:** – नीलग्रीवाय, सहस्रनयनयुक्ताय, कामानां वर्षयित्रे रुद्राय नम:। अपि च रुद्रस्य ये प्राणिन: भृत्या: अहं तेभ्य: अपि नमस्कारं करोमि।

**ॐ प्रमुञ्च धन्वनस्त्वमुभयोरात्क्न्योर्ज्याम्। याश्च ते हस्तऽइषव: परा ता भगवो व्वप ॥ 9 ॥**

**अन्वय:** – (हे) भगव: ! धन्वन: त्वम् उभयो: आत्क्न्यो: ज्यां प्रमुञ्च। याश्च ते हस्ते इषव: ता: परावप।

**शब्दार्थ:** – **उभयो:** – द्वयो:, **ज्याम्** – मौर्वीम्, पृथ्वीम्, **इषव:** – बाणा:, **परावप** – पराक्षिप।

**भावार्थ:** – हे रुद्र! हे धनुष: उभयो: कोट्यो: स्थितां मौर्वीं दूरीकुरु। ये च तव हस्ते बाणा: सन्ति तान् अपि पराक्षिप।

**ॐ व्विज्यं धनु: कपर्द्दिनो व्विशल्यो बाणावाँ२ऽउत।**

**अनेशन्नस्य याऽइषव आभुरस्य निषङ्गधि: ॥ 10 ॥**

**अन्वय:** – बाणवान् विशल्य: कपर्दिन: विज्यं धनु: उत अस्य या इषव: आभु: निषङ्गधि: अनेशन्।

**शब्दार्थ:** **आभु:** रिक्त: **निषङ्गधि:** खड्गधारी **अनेशन्** नष्टा **विशल्य:** शल्यरहित:।

**भावार्थ:** – जटाधारिण: रुद्रस्य धनुष्यं मौर्वीरहितं भवतु। बाणवान् इषुधि: विफल: भवतु। अस्य रुद्रस्य ये बाणा: ते नश्यन्तु। अस्य रुद्रस्य निषङ्गधि: खड्गरहित: भवतु।

**ॐ याते हेतिर्म्मीढुष्टम हस्ते बभूव ते धुन:। तयास्मान्व्विश्वतस्त्वमयक्ष्मया परिभुज ॥11॥**

**अन्वय:** – (हे) मीढुष्टम ते हस्ते या धनु: हेति: बभूव। त्वं तया अपक्ष्मया विश्वत: परिभुज।

**शब्दार्थ:** **मीढुष्टम** वर्षुक **अपक्ष्मया** व्याधिरहितया **परिभुज** परिपालय।

**भावार्थ** – हे कामानां परिपूरक! तव हस्ते ये बाणा: सन्ति, यच्च धनु: अस्ति, तेन धनुषा रोगरहिता यथा भवेम तथा सर्वत: अस्मान् पालय।

**ॐ परि ते धन्वनो हेतिरस्मान्वृणक्तु विश्वतः। अथो यऽइषुधिस्तवारेऽअस्मन्निधेहि तम्॥ 12॥**

**अन्वयः** - (हे) रुद्र ! ते धन्वनः हेतिः विश्वतः अस्मान् परिवृणक्तु। अथो यः इषुधिः तम् अस्मत् तव आरे निधेहि।

**शब्दार्थः** **हेतिः** आयुधम् **अस्मत्** अस्मतः **आरे** दूरे **निधेहि** स्थापय।

**भावार्थः** - हे रुद्र! तव धनुर्धारिणः बाणाः अस्मान् सर्वतः त्यजन्तु। अपि च तव इषुधिः अस्मत्तः दूरे स्थापय।

**ॐ अवतत्य धनुष्ट्वꣳसहस्राक्ष शतेषुधे। निशीर्ष्य शल्यानाम् मुखा शिवोनः सुमना भव॥ 13॥**

**अन्वयः** - (हे) सहस्राक्ष! शतेषुधे ! त्वं धनुः अवतत्य शल्यानां मुखा निशीर्य नः शिवः सुमनाः भव।

**शब्दार्थः** **अवतत्य** अवतार्य **निशीर्य** शीर्णानि कृत्वा।

**भावार्थः** - हे सहस्राक्ष! शतेषुधे! धनुः अवतत्य, शल्यानां मुखानि शीर्णानि कृत्वा, त्वम् अस्मान् प्रति शान्तः शोभनचित्तवान् भव।

**ॐ नमस्तऽआयुधायानातताय धृष्णवे। उभाभ्यामुते ते नमो बाहुभ्यान्तव धन्वने॥ 14॥**

**अन्वयः** - (हे रुद्र !) ते धृष्णवे अनातताय आयुधाय नमः। तव उभाभ्यां बाहुभ्यां नमः उत ते धन्वने (नमः)।

**शब्दार्थः** - **अनातताप** - अनावतारिताय, **धृष्णवे** - घर्षणशीलाय।

**भावार्थः** - तव अनातताय, घर्षणशीलाय आयुधाय नमः। तव बाहुभ्यां, तव धनुष्याय च नमस्कारः अस्तु।

**ॐ मानो महान्तमुत मा नोऽअर्भकं मानऽउक्षन्त मुतमानऽउक्षितम्। मानो व्वधीः पितरं मोत मातरंमानः प्रियास्तन्वोरुद्ररीरिषः॥ 15॥**

**अन्वयः** - (हे) रुद्र ! महान्तं नः मा उत नः अर्भकं मा नः उक्षितं मा नः पितरं मा उत नः मातरं मा वधीः। प्रियाः नः मा रीरिषः।

**शब्दार्थः** **अर्भकम्** बालकम् **उक्षन्तम्** तरुणम् **उक्षितम्** गर्भस्थम्।

**भावार्थः** - हे रुद्र ! अस्माकं वृद्धं गुरुपितृव्यादिकं मा हिंसीः। अपि अस्माकं बालं मा विधीः। अस्माकं सिञ्चन्तं तरुणं मा वधीः। अस्माकं गर्भस्थं मा वधीः। अस्माकं जनकं, जननीं च मा वधीः। अस्माकं प्रियाः स्वजनाः तानपि मा हिंसीः।

**ॐ मा नस्तोके तनये मा नऽआयुषि मा नो गोषु मा नोऽअश्वेषुरीरिषः। मा नो व्वीरान्रुद्र भामिनो व्वधीर्हविष्मन्तः सदमित्वा हवामहे॥ 16॥**

**अन्वयः** - (हे) रुद्र! नः तोके मा नस्तनये मा नः आयुषिः नः गोषु मा नः अश्वेषु मा रीरिषः नः वीरान् मा (नः) भामिनः मा वधीः। (वयं) हविष्मन्तः सदमित् त्वा हवामहे।

**शब्दार्थः** **तोके** पुत्रे **तनये** पौत्रे **भामिनः** क्रोधयुतान्, भृत्यान् **सदम्** सदा।

**भावार्थः** - हे रुद्र! अस्माकं पुत्रं, पौत्रं मा हिंसीः। अस्माकं जीवनं मा हिंसीः। अस्माकं धेनून्, अश्वान् मा हिंसीः। क्रोधयुक्तानपि अस्माकं भृत्यान् मा वधीः। हविर्युक्ताः सदैव त्वां वयं यागाय आह्वयामः।

**ॐ नमो हिरण्यबाहवे सेनान्नये दिशाञ्च पतये नमो नमो व्वृक्षेभ्यो हरिकेशेभ्यः पशूनां पतये नमो नमः शष्पिञ्जराय त्विषीमते पथीनां पतये नमो नमो हरिकेशायोपवीतिने पुष्टानां पतये नमः॥ 17॥**

**अन्वयः** - हिरण्यबाहवे सेनान्ये नमः दिशां पतये च नमः। हरिकेशेभ्यः वृक्षेभ्यो नमः पशूनां पतये नमः। शष्पिञ्जराय त्विषीमते नमः पथीनां नमः। हरिकेशाय उपवीतिने नमः पुष्टानां पतये नमः।

**शब्दार्थः** **सेनान्ये** सेनानायकाय **त्विषीमते** दीप्तिमते।

**भावार्थः** – हिरण्यालंकारभूषितबाहवे नमः, सेनानायकाय नमः, दिशां पतये नमः, वृक्षरूपेभ्यो रुद्रेभ्यो नमः, पशूनां पतये नमः, शष्पवर्णयुक्ताय रुद्राय नमः, दीप्तियुक्ताय नमः, मार्गाधिपतये नमः, लोहितकेशाय नमः, यज्ञोपवीतधारिणे नमः, समृद्धानां पतये नमः।

**ॐ नमो बब्भ्लुशाय व्याधिनेऽन्नानां पतये नमो नमो भवस्य हेत्यै जगतां पतये नमो नमो रुद्रायाततायिने क्षेत्राणां पतये नमो नमः सूतायाहन्त्यै व्वनानां पतये नमः॥ 18॥**

**अन्वयः** – बभ्लुशाय व्याधिने नमः अन्नानां पतये नमः। भवस्य हेत्यै नमः, जगतां पतये नमः। आततापिने रुद्राय नमः, क्षेत्राणां पतये नमः। सूताय अहन्त्यै नमः, वनानां पतये नमः।

**शब्दार्थः** **बभ्लुशाय** कपिलवर्णाय **आततायिने** उद्यतायुधाय **अहन्त्यै** अहन्त्रे।

**भावार्थः** – कपिलवर्णाय नमः, शत्रूणां भेदकाय नमः, संसारस्य क्षेत्रे नमः, जङ्गमानां पतये नमः, उद्यतायुधाय रुद्राय नमः, क्षेत्राणां पतये नमः, अहन्त्रे संसारयस्य सारथिरूपाय नमः, वनानां पालकाय नमः।

**ॐ नमो रोहिताय स्थपतये व्वृक्षाणां पतये नमो नमो भुवन्तये व्वारिवस्कृतायौषधीनां पतये नमो नमो मन्त्रिणे व्वाणिजाय कक्षाणां पतये नमो नमऽउच्चैर्घोषायाक्रन्दयतेपत्तीनां पतये नमः॥ 19॥**

**अन्वयः** – रोहिताय स्थपतये नमः, वृक्षाणां पतये नमः। भुवन्तये वारिवस्कृताय नमः, ओषधीनां पतये नमः। मन्त्रिणे वणिनाय नमः, कक्षाणां पतये नमः। उच्चैर्घोषाय आक्रन्दयते नमः, पतीनां पतये नमः।

**शब्दार्थः** **रोहिताय** रक्तवर्णाय **वारिवस्कृताय** धनकृते **पत्तीनाम्** पदातीनाम्।

**भावार्थः** – रोहितवर्णाय नमः, गृहादिनिर्मात्रे विश्वकर्मरूपाय नमः, वृक्षाणां पालकाय नमः, पृथिव्याः विस्तारकाय नमः, ग्राम्यारण्यानाम् ओषधीनां पालकाय नमः, मन्त्रिणे नमः, वाणिजाय नमः, वनगतानां गुल्मवीरुधादीनां पालकाय नमः, महाशब्दकर्त्रे नमः, पदातीनां पालकाय नमः।

**ॐ नमः कृत्स्नायतया धावते सत्त्वनां पतये नमो नमः सहमानाय निव्याधिनऽआव्याधिनीनां पतये नमो नमो निषङ्गिणे ककुभाय स्तेनानां पतये नमो नमो निचेरवे परिचरायारण्यानां पतये नमः॥ 20॥**

**अन्वयः** – कृत्स्नायतया धावते नमः सत्वनां पतये नमः सहमानाय निव्याधिने नमः आव्याधिनीनां पतये नमः निषङ्गिणे ककुभाय नमः स्तेनानां नमः। निचेरवे परिचराय नमः अरण्यानां पतये नमः।

**शब्दार्थः** **कृत्स्नम्** समग्रम् **आयतम्** विस्तृतम् **निचेरवे** सततगमनशीलाय **ककुभाय** महते।

**भावार्थः** – कर्ण यावदाकृष्टनं धनुः नीत्वा युद्धे शीघ्रं गच्छते रुद्राय नमः, शरणागतानां प्राणिनां पतये नमः, शत्रून् सहमानाय नमः, शत्रूणां निःशेषेण हन्त्रे नमः, शूरसेनायाः पालकाय नमः, खड्गधारिणे, महते, गुप्तचौराणां पतये नमः, लुण्टाकतस्करादीनां पालकाय नमः, वनानां पतये नमः।

**ॐ नमो व्वञ्चते परिवञ्चते स्तायूनां पतये नमो नमो निषङ्गिणऽइषुधिमते तस्कराणां पतये नमो नमः सृकायिभ्यो जिघाꣳसद्भ्यो मुष्णतां पतये नमो नमो सिमद्भ्यो नक्तञ्चरद्भ्यो व्विकृन्तानां पतये नमः ॥ 21॥**

**अन्वयः** – वञ्चते परिवञ्चते नमः स्तायूनां पतये नमः। निषङ्गिगे इषुधिमते नमः तस्कराणां पतये नमः। सृकायिभ्यो जिघांसद्भ्यः नमः, मुष्णातां पतये नमः। असिमद्भ्यः नक्तं चरद्भ्यः नमः, विकृन्तानां पतये नमः।

**शब्दार्थः** **स्तायूनाम्** चौराणाम् **तस्कराणाम्** चौराणाम् **सृकायिभ्यः** वज्रसहितेभ्यः **विकृन्तानाम्** छेदनकर्तृणाम्।

**भावार्थः** – वञ्चकाय, परिवञ्चकाय, चौराणां पतये नमः, खड्गिने, तूणीरधारिणे, चौराणां पतये नमः आयुधधारिभ्यो नमः, हन्तुमिच्छद्भ्यो नमः, स्तैन्यं कुर्वद्भ्यो नमः, खडगधारिभ्यः, रात्रौ गच्छद्भ्यः, छित्वा अपहरणकर्तृणां पतये नमः।

**ॐ नमऽउष्णीषिणे गिरिचराय कुलुञ्चानां पतये नमो नमऽइषुमद्भ्यो धन्वायिभ्यश्च वो नमो नमऽआतन्वानेभ्यः प्रतिदधानेभ्यश्चवो नमो नमऽआयच्छद्भ्यो स्यद्भ्यश्चवो नमः॥ 22॥**

**अन्वयः** – उष्णीषिणे गिरिचराय नमः कुलुञ्चानां पतये नमः। इषुमद्भ्यः धन्वायिभ्यः च वः नमः। आतन्वानेभ्यः प्रतिदधानेभ्यश्च वः नमः। आयच्छद्भ्यः अस्यद्भ्यश्च वः नमः।

**शब्दार्थः** **उष्णीषिणे** शिरोवेष्टनयुताय **कुलुञ्चानाम्** भूमिहर्तृणाम् **धन्वायिभ्यः** धनुर्धारिभ्यः **आतन्वानेभ्यः** आरोपयद्भ्यः **आयच्छद्भ्यः** आकर्षद्भ्यः **अस्यद्भ्यः** क्षिपद्भ्यः।

**भावार्थः** – शिरोवष्टनधारिणे नमः, पर्वतचारिणे, क्षेत्रादिरूपां मि हरतां पालकाय नमः, बाणधारिभ्यो नमः, धनुर्धारिरुद्रेभ्यो नमः, धनुःसंधानकर्तृभ्यो नमः, बाणसंधानकर्तृभ्यो नमः, धनुषि ज्याम् आरोपयद्भ्यः रुद्रेभ्यो नमः, बाणसंधानं कुर्वद्भ्यो रुद्रेभ्यो नमः, धनुः कर्षद्भ्यो नमः, बाणान् क्षिपद्भ्यो रुद्रेभ्यो नमः।

**ॐ नमो विसृजद्भ्यो विदध्यश्च वो नमो नमः स्वपद्भ्यो जाग्रद्भ्यश्च वो नमो नमः शयानेभ्यऽआसीनेभ्यश्च वो नमो नमस्तिष्ठद्भ्यो धावद्भ्यश्च वो नमः॥ 23॥**

**अन्वयः** – विसृजद्भ्यः विध्यद्भ्यश्च वः नमः। स्वपद्भ्यः जाग्रद्भ्यश्च वः नमः। शयानेभ्यः आसीनेभ्यः च वः नमः। तिष्ठद्भ्यः धावद्भ्यश्च वः नमः।

**शब्दार्थः** **विध्यद्भ्यः** ताड्यद्भ्यः **स्वपद्भ्यः** शयनीकर्तृकेभ्यः।

**भावार्थः** – बाणान् विमुञ्चद्भ्यो नमः वेधुं कुर्वद्भ्यो नमः, शयनकर्तृभ्यो, जागरणकर्तृभ्यो युष्मभ्यं रुद्रेभ्यो नमः, स्वप्नशीलेभ्यः, उपविशद्भ्यः रुद्रेभ्यो नमः, गतिनिवृत्तेभ्यः रुद्रेभ्यो नमः, वेगवद्भ्यो रुद्रेभ्यो नमः।

### शब्दार्थाः

**रोहिताय** रक्तवर्णाय **वारिवस्कृताय** धनकृते **पत्तीनाम्** पदातीनाम् **अघोरा** अविषमा **अभिचाकशीहि** पश्य **तोके** पुत्रे **तनये** पौत्रे **भामिनः** क्रोधयुतान भृत्यान् **सदम्** सदा।

### स्वाध्यायः

**1. प्रदत्तविकल्पेभ्यः योग्यविकल्पं चित्वा उत्तरं यच्छत।**

(1) अस्य सूक्तस्य नाम किम्?

(क) विष्णुः (ख) सौरम् (ग) रौद्रम् (घ) विजयः

(2) अस्मिन् सूक्तो कति मन्त्राः?

(क) सप्तदश (ख) अष्टादश (ग) षोडश (घ) चतुर्दश

(3) प्रमुञ्च .......... त्वमुभयोः।

(क) खल्वः (ख) बलवन्तः (ग) धन्वनः (घ) गरिम्णः

(4) मानो ........... उत मा नः।

(क) बलवन्तम् (ख) जग्मिवन्तम् (ग) महान्तम् (घ) केशान्तम्

(5) परिते .......... हेतिरस्मान्।

(क) विधितः (ख) धन्वनो (ग) अथोप (घ) वृणक्तु

**2. प्रश्नामुत्तराणि लिखत।**

(1) सूक्तस्य सारांशो लेख्यः।

(2) कानिचन पञ्च विशेषणानि पाठप्रयुक्तानि लिखत।

(3) धनुर्धारिणां विषये यल्लिखितं तत्प्रतिपादयन्तु।

(4) अस्य सूक्तस्य अपरं नाम किम्? कथम्?

(5) प्रथमस्य मन्त्रस्य भावार्थो लेख्यः।

**3. मन्त्राणां पूर्तिं कृत्वा मातृभाषायां भावार्थो लेख्यः।**

(1) याते रुद्र शिवा ................ चाकशीहि॥

(2) शिवेन वचसा ................ असत्॥

(3) मानस्तोके ................ हवामहे॥

**शिक्षक-प्रवृत्तिः**

शिक्षकः अभिषेके सूक्तस्यास्य माहात्म्यं ज्ञापयन्तु।

**छात्रप्रवृत्तिः**

छात्राः सर्वे अध्यापकैः सह छात्राः अभिषेकं कुर्युः।

**सूक्तिः - शिवेन व्वचसा त्वा गिरिशाच्छावदामसि।**

●

# 22. रुद्र-सूक्तम् (2)

**प्रस्तावना**

अयं पाठोऽपि षोडशाध्यायादेव उद्धृतः। विजयसूक्तस्य अनन्तरं स्तुतिरियमागच्छति। अत्र शिवस्य विविधेभ्यो रूपेभ्यः नमस्कारः विहितः। 'नमः' इति पदस्य बाहुल्यमपि दृश्यते तस्मात् सूक्तमिदं 'नमकाध्यायः' इति नाम्ना अपि विख्यातम्।

**॥ अथ रुद्र-सूक्तम् ( 2 )॥**

**ॐ नमः सभाभ्यः सभापतिभ्यश्च वो नमो नमो श्वेभ्योश्वपतिभ्यश्च वो नमो नमऽआव्याधिनीभ्यो विविद्ध्यन्तीभ्यश्च नमो नमऽउगणाभ्यस्तऋंहतीभ्यश्च वो नमः॥ 24॥**

**अन्वयः** – सभाभ्यः सभापतिभ्यः च वः नमः। अश्वेभ्यः अश्वपतिभ्यः चः वः नमः। आव्याधिनीभ्यः विविध्यन्तीभ्यः च वः नमः। उगणाभ्यः तृं हतीभ्यः च वः नमः।

**शब्दार्थः** **आव्याधिनीभ्यः** सर्वत्र ताडयद्भ्यः **उगणाभ्यः** श्रेष्ठ बंधु समूहेभ्यः **तृं हतीभ्यः** हिं सन्तीभ्यः।

**भावार्थः** – सभाभ्योः नमः, सभापतिभ्योः नमः, अश्वेभ्यो नमः, अश्वानां पतिभ्यो नमः, सम्यक् वेधकारिणीभ्यः सेनाभ्यो नमः, उत्कृष्टभृत्यसमूहयुक्ताभ्यः ब्राह्मयोदितामातृकाभ्यो नमः, हिंसासमर्थाभ्यो दुर्गाप्रभृतिमातृकाभ्यो नमः।

**ॐ नमो गणेभ्यो गणपतिभ्यश्च वो नमो नमो व्र्रातेभ्यो व्र्रातपतिभ्यश्च वो नमो नमो गृत्सेभ्यो गृत्सपतिभ्यश्च वो नमो नमो व्विरूपेभ्यो व्विश्वरूपेभ्यश्च वो नमः॥ 25॥**

**अन्वयः** – गणेभ्यः गणपतिभ्यः च वः नमः। व्रातेभ्यः व्रातपतिभ्यः च वः नमः। गृत्सेभ्यः गृत्सपतिभ्यः च वः नमः। विरूपेभ्यः विश्वरूपेभ्यः च वः नमः।

**शब्दार्थः** **व्रातेभ्यः** नानाजातिसङ्घेभ्य **गृत्सेभ्यः** विषयलम्हेभ्यः मेधाविभ्यः।

**भावार्थः** – गणेभ्यो नमः, गणपतिभ्यो नमः, व्रातोभ्यो नमः, व्रातपतिभ्यो नमः, विषयलम्पटेभ्यो नमः, लम्पटानां स्वामिभ्यो नमः, विरूपेभ्यो नमः, नानाविधरूपधारिभ्यो नमः।

**ॐ नमः सेनाभ्यः सेनानिभ्यश्च वो नमो रथिभ्योऽअरथेभ्यश्च वो नमो नमः क्षत्तृभ्यः संग्रहीतृभ्यश्च वो नमो नमो महद्भ्योऽअर्भकेभ्यश्च वो नमः॥ 26॥**

**अन्वयः** – सेनाभ्यः सेनानिभ्यः च वः नमः। रथिभ्यः अरथेभ्यः च वः नमः। क्षतृभ्यः संगृहीतृभ्यः च वः नमः महद्भ्यः अर्भकेभ्यः च वः नमः

**शब्दार्थः** **क्षतृभ्यः** अधिष्ठातृभ्यः

**भावार्थः** – सेनाभ्यः सेनानिभ्यः च वः नमः, रथारोहिभ्यो नमः, रथहितेभ्यो नमः, रथानाम् अधिष्ठातृभ्यो नमः, सारथिभ्यो नमः, महद्भ्यो वीरेभ्यो नमः, वीरबालकेभ्यो नमः।

**ॐ नमस्तक्षभ्यो रथकारेभ्यश्च वो नमो नमः कुलालेभ्यः कर्म्मारेभ्यश्च वो नमो नमो निषादेभ्यः पुञ्जिष्ठेभ्यश्च वो नमो नमः श्वनिभ्यो मृगयुभ्यश्च वो नमः॥ 27॥**

**अन्वयः** - तक्षभ्यः रथकारेभ्यः च वः नमः। कुलालेभ्यः कमरिभ्यः च वः नमः। निषादेभ्यः पुञ्जिष्ठेभ्यः च वः नमः। धनिभ्यः मृगयुभ्यः च वः नमः।

**शब्दार्थः** **तक्षभ्यः** शिल्पजातिभ्यः **कमरिभ्यः** लौहकारेभ्यः **पुञ्जिष्ठेभ्यः** पशुपालकेभ्यः।

**भावार्थः** - रथनिर्मातृभ्यो नमः, कुम्भरारेभ्यो नमः, लौहकारेभ्यो नमः, निषादेभ्यो नमः, व्याधेभ्यो नमः, श्वगणिभ्यो नमः, मृगकामिभ्यो लुब्धकेभ्यो नमः।

**ॐ नमः श्वभ्यः श्वपतिभ्यश्च वो नमो नमो भवाय च रुद्राय च नमः शर्व्वाय च पशुपतये च नमो नीलग्रीवाय च शितिकण्ठाय च॥ 28॥**

**अन्वयः** - श्वभ्यः श्वपतिभ्यः च वः नमः। भवाय च रुद्राय च नमः। शर्वाय च पशु पतये च नमः। नीलग्रीवाय च शितिकण्ठाय च नमः।

**शब्दार्थः** **शितिकण्ठाय** श्वेतकण्ठाय।

**भावार्थः** - शुनकेभ्यो नमः शुनकानां स्वामिभ्यः किरातादिभ्यो नमः, भवाय नमः, रुद्राय नमः, शर्वाय नमः, पशुपतये नमः, नीलग्रीवाय नमः, श्वेतकण्ठयुक्ताय नमः।

**ॐ नमः कपर्द्दिने च व्युप्तकेशाय च नमः सहस्राक्षाय च शतधन्वने च नमो गिरिशयाय च शिपिविष्टाय नमो मीढुष्टमाय चेषुमते च॥ 29॥**

**अन्वयः** - कपर्दिने च व्युप्तकेशाय नमः। सहस्राक्षाय च शतधन्वने च नमः। गिरिशयाय च शिपिविष्टाय च नमः। मीढुष्टमाय च इषुमते च नमः।

**शब्दार्थः** **व्युप्तकेशाय** मुण्डितकेशाय **शिपिविष्टाय** विष्णुरूपाय।

**भावार्थः** - जटाधारिणे नमः, मुण्डितकेशाय नमः, सहस्रनयनाय नमः, अनेकधनुधार्रिणे नमः, पर्वतशायिने नमः, आदित्यरूपाय नमः, कामानां वर्षयित्रे नमः, बाणयुक्ताय नमः।

**ॐ नमो ह्रस्वाय व्वामनाय च नमो बृहते च व्वर्षीयसे च नमो व्वृद्धाय च सवृधे च नमोग्ग्र्याय च प्रथमाय च॥ 30॥**

**अन्वयः** - ह्रस्वाय, वामनाय, महते, वृद्धतमाय, अनुभविने, श्रेष्ठाय, प्रधानभूताय नमः।

**शब्दार्थः** **वर्षीयसे** अतिशयवृद्धाय।

**भावार्थः** - ह्रस्वाय, वामनाय, महते, वृद्धतमाय, अनुभविने, श्रेष्ठाय, प्रधानभूताय च नमः।

**ॐ नमऽआशवे चाजिराय च नमः शीग्घ्र्याय च शीभ्याय च नमऽऊउर्म्म्याचा वस्वन्याय च नमो नादेयाय च द्वीप्याय च ॥ 31॥**

**अन्वयः** - जगद्व्यापिने, गतिशीलाय, क्षिप्रकारिणे, जलप्रवाहिणे, तरंगयुक्ताय, स्थिरजलाय, नद्याः, उद्भूताय, द्वीपोत्पन्नाय च नमः।

**शब्दार्थः** **अजिराय** गतिमते **शीभ्याय** आत्मश्लाघिने **अवस्वन्याय** स्थिरजलाय **नादेयाय** नद्युत्पन्नाय।

**भावार्थः** - जगद्व्यापिने नमः, गतिशीलाय नमः, क्षिप्रकारिणे नमः, जलप्रवाहिणे नमः, तरंगयुक्ताय नमः, स्थिरजलाय नमः, नद्याः उद्भूताय नमः, द्वीपोत्पन्नाय नमः।

**ॐ नमो ज्येष्ठाय च कनिष्ठाय च नमः पूर्व्वजाय चा परजाय च नमो मध्यमाय चापगल्भ्याय च नमो जघन्याय च बुद्ध्न्याय च॥ 32॥**

**अन्वयः** – ज्येष्ठाय, कनिष्ठाय, पूर्वजाय, पश्चाद् उत्पन्नाय, मध्यमाय, अपगतधार्ष्टयाय, जघन्याय, निम्नस्थाय च नमः।

**शब्दार्थः** **जघन्याय** निंन्द्य।

**भावार्थः** – जयेष्ठाय नमः, कनिष्ठाय नमः, पूर्वजाय नमः, पश्चाद् उत्पन्नाय नमः, मध्यमाय नमः, अपगतधार्ष्टयाय नमः, जघन्याय नमः, निम्नस्थाय नमः।

**ॐ नमः सोब्भ्याय च प्रतिर्ष्याय च नमो याम्याय क्षेम्याय च नमः श्लोक्याय चा वसावन्याय च नमऽउर्व्वर्ष्याय च खल्याय च॥ 33॥**

**अन्वयः** – गन्धर्वनगरोत्पन्नाय, अभिचारोत्पन्नाय, कुशलोत्पन्नाय, श्लोकयोग्याय, समाप्तिसम्बद्धाय, उर्वरायां भूमौ धान्यरूपेणोत्पन्नाय, खल्याय च नमः।

**शब्दार्थः** **प्रतिसर्याय** विवाहोचिताय।

**भावार्थः** – गन्धर्वनगरोत्पन्नाय नमः अभिचारोत्पन्नाय नमः, कुशलोत्पन्नाय नमः, श्लोकयोग्याय नमः, समाप्तिसम्बद्धाय नमः, उर्वरायां भूमौ धान्यरूपेणोत्पन्नाय नमः, खल्याय नमः।

**ॐ नमो वन्याय च कक्ष्याय च नमः श्रवाय च प्रतिश्रवाय च नमऽआशुषेणाय चाशुरथाय च नमः शूराय चावभेदिने च ॥ 34॥**

**अन्वयः** – वनोत्पन्नाय, नदीकक्षोत्पन्नाय, शब्दाय, प्रतिध्वनये, शीघ्रसेनाय, शीघ्ररथाय, शूराय नमः, अवभेदिने नमः।

**शब्दार्थः** **आशुषेणः** शीघ्रसेनावते।

**भावार्थः** – वनोत्पन्नाय नमः, नदीकक्षोत्पन्नाय नमः, शब्दाय नमः, शब्दाय नमः, प्रतिध्वनये नमः, शीघ्रसेनाय नमः, शीघ्ररथाय नमः, शूराय नमः, अवभेदिने नमः।

**ॐ नमो बिल्मिने च कवचिने च नमो व्वर्मिणे च व्वरूथिने च। नमः श्रुताय च श्रुतसेनाय च नमो दुन्दुभ्याय चाहनन्न्याय च॥ 35॥**

**अन्वयः** – शिरस्त्राणयुक्ताय, कवचयुक्ताय, शरीरक्ष वर्मधारिण, वरूथिने, प्रसिद्धाय, प्रसिद्धसेनायुक्ताय, दुन्दुभौ उत्पन्नाय, अहननेन, उत्पन्नाय नमः।

**शब्दार्थः** **वर्मिणे** कवचिने **वरूथिने** गजोपरिस्थः गजाकारविशिष्टः कोष्ठः तस्मै।

**भावार्थः** – शिरस्त्राणयुक्ताय नमः, कवचयुक्ताय नमः, शरीररक्षक वर्मधारिणे नमः, वरूथिने नमः, प्रसिद्धाय नमः, प्रसिद्धसेनायुक्ताय नमः, दुन्दुभौ उत्पन्नाय नमः अहननेन उत्पन्नाय नमः।

**ॐ नमो धृष्णवे च प्रमृशाय च नमो निषङ्गिणे चेषुधिमते च नमस्तीक्ष्णेषवे चायुधिने च नमः स्वायुधाय च सुधन्वने च॥ 36॥**

**अन्वयः** – धर्षकाय, विमर्शकारिणे पण्डिताय, खड्धारिणे, तुणीरधारिणे, तीक्ष्णबाणयुक्ताय, आयुधधारिणे, शोभन आयुधयुक्ताय नमः, शोभनधनुर्युताय नमः।

**शब्दार्थः** **प्रमृशाय** विचारणे।

**भावार्थः** – धर्षकाय नमः, विमर्शकारिणे पण्डिताय नमः, खड्गधारिणे नमः, तूणीरधारिणे नमः, तीक्ष्णबाणयुक्ताय नमः, आयुधधारिणे नमः, शोभन आयुधयुक्ताय नमः, शोभनधनुर्युताय नमः।

**ॐ नमः स्त्रुत्याय च पथ्याय च नमः काट्याय च नीप्याय च नमः कुल्याय च सरस्याय च नमो नादेयाय च व्वैशन्ताय च॥ 37॥**

**अन्वयः** – क्षुद्रमार्गयुताय, विस्तृतमार्गयुताय, विषममार्गे भवाय, पर्वतस्य अधोभागे उत्पन्नाय, कुल्यायां जाताय, सरसि जाताय, नद्यां जाताय, तडागे जाताय च नमः।

**शब्दार्थः** **नीप्याय** अधोदेशे वहमाने जले भवाय।

**भावार्थः** – क्षुद्रमार्गयुताय नमः, विस्तृतमार्गयुताय नमः, विषममार्गे भवाय नमः, पर्वतस्य अधोभागे उत्पन्नाय नमः, कुल्यायां जाताय नमः, सरसि जाताय नमः, नद्यां जाताय नमः तडागे जाताय नमः।

**ॐ नमः कूप्याय चावट्टयाय च नमो व्वीध्र्याय चातप्याय च नमो मेग्घ्याय च विद्द्युत्त्याय च नमो व्वर्ष्यायचाव्वर्ष्याय च॥ 38॥**

**अन्वयः** – कूपे जाताय, गर्ते जाताय, घनच्छायायम् उत्पन्नाय, आतपे उत्पन्नाय, मेघे जाताय, विद्युति उत्पन्नाय, वर्षायां जाताय, वृष्टिहीने जाताय च नमः।

**शब्दार्थः** **आवट्याय** गर्ते भवाय।

**भावार्थः** – कूपे जाताय नमः, गर्ते जाताय नमः, घनच्छायायाम् उत्पन्नाय नमः, आतपे उत्पन्नाय नमः, मेघे जाताय नमः, विद्युत उत्पन्नाय नमः, वर्षायां जाताय नमः, वृष्टिहीने जाताय नमः।

**ॐ मनो व्वात्याय च रेष्म्याय च नमो व्वास्तव्याय च व्वास्तुपाय च नमः सोमाय च रुद्राय च नमस्ताम्म्राय चारुणाय च ॥ 39॥**

**अन्वयः** – वायुचक्रे जाताय, प्रलये जाताय, गृहे जाताय, गृहभूमेः पालकाय, सोमाय, रुद्राय, ताम्रवर्णाय नमः, अरुणवर्णाय नमः।

**शब्दार्थः** **रेष्म्याय** प्रलयकाले भवाय **सोमाय** उमया सहिताय चंद्राय।

**भावार्थः** – वायुचक्रे जाताय नमः, प्रलये जाताय नमः, गृहे जाताय नमः, गृहभूमेः पालकाय नमः, सोमाय नमः, रुद्राय नमः, ताम्रवर्णाय नमः, अरुणवर्णाय नमः।

**ॐ नमः शङ्गवे च पशुपतये च नमऽउग्राय च भीमाय च नमोग्रेवधाय च दूरेवधाय च नमो हन्त्रे च हनीयसे च नमो वृक्षेभ्यो हरिकेशेभ्यो नमस्ताराय॥ 40॥**

**अन्वयः** – सुखकारिणे, पशुपतये, उग्राय, भयंकराय, अग्रे स्थित्वा वधकारिणे, दूरे स्थित्वा वधकारिणे, हननकारिणे, अत्यन्तहन्त्रे, वृक्षेभ्यो, हरितकेशयुक्तेभ्यो, संसारतारकाय च नमः।

**शब्दार्थः** **शंगवे** सुखदाय **हनीयसे** अतिशयेन हन्त्रे।

**भावार्थः** – सुखकारिणे नमः, पशुपतये नमः, उग्राय नमः, भयंकराय नमः, अग्रे स्थित्वा वधकारिणे नमः, दूरे स्थित्वा वधकारिणे नमः, हननकारिणे नमः, अत्यन्तहन्त्रे नमः, वृक्षेभ्यो नमः, हरितकेशयुक्तेभ्यो नमः, संसारतारकाय नमः।

**ॐ नमः शम्भवाय च मयोभवाय च नमः शङ्कराय च मयस्कराय च नमः शिवाय च शिवतराय च॥ 41॥**

**अन्वयः** – सुखरूपाय, कल्याणमयाय, सुखकारिणे, कल्याणकारिणे, शिवाय, अत्यन्तशिवाय च नमः।

**शब्दार्थः** **मयस्कराय** सुखकराय।

**भावार्थः** – सुखरूपाय नमः, कल्याणमयाय नमः, सुखकारिणे नमः, कल्याणकारिणे नमः, शिवाय नमः, अत्यन्तशिवाय नमः।

**ॐ नमः पार्य्याय चावार्य्याय च नमः प्रतरणाय चोत्तरणाय च नमस्तीर्थ्याय च कूल्याय च नमः शष्प्याय च फेन्याय च ॥ 42॥**

**अन्वयः** – संसारस्य पारे भवाय, संसारमध्ये जाताय, उदरकरूपाय, नौरूपाय, तीर्थे जाताय, कूले जाताय, तृणे जाताय, फेने जाताय च नमः।

**शब्दार्थः** **अवार्याय** अर्वाक् तीरे भवाय।

**भावार्थः** – संसारस्य पारे भवाय नमः, संसारमध्ये जाताय नमः, उदकरूपाय नमः, नौरूपाय नमः, तीर्थे जाताय नमः, कूले जाताय नमः, तृणे जाताय नमः, फेने जाताय नमः।

**ॐ नमः सिकत्याय च प्रवाह्याय च नमः किᳮशिलाय च क्षयणाय च नमः कपर्द्दिने च पुलस्तये च नमऽइरिण्याय च प्रपथ्याय च॥॥ 43॥**

**अन्वयः** – वालुकायां जाताय, स्रोतोत्पन्नाय, प्रस्तरेषु भवाय, स्थिरजलप्रदेशाय कपर्दिने, सर्वान्तर्यामिणे, उर्वरप्रदेशोद्भवाय, सन्मार्गसम्भूताय च नमः।

**शब्दार्थः** **सिकत्याय** सिकतासु भवाय।

**भावार्थः** – वालुकायां जाताय नमः, स्रोतोत्पन्नाय नमः, प्रस्तरेषु भवाय नमः, स्थिरजलप्रदेशाय नमः, कपर्दिने नमः, सर्वान्तर्यामिणे नमः, उर्वरप्रदेशोद्भवाय नमः, सन्मार्गसम्भूताय नमः।

**ॐ नमो व्व्रज्याय च गोष्ठ्याय च नमस्तल्प्याय च गेह्याय च नमो हृदय्याय च निवेष्प्याय च नमो काट्याय च गह्वरेष्ठाय च॥ 44॥**

**अन्वयः** – गोसमूहे जाताय, गोभूमौ जाताय, शय्यायां जाताय, गृहे जाताय, हृदये जाताय, आवर्तजले उत्पन्नाय, कूपे जाताय, गिरिगह्वरे स्थिताय च नमः।

**शब्दार्थः** **व्रज्याय** – गोसमूहे भवाय, **तल्प्याय** – शय्यायां भवाय, **हृद्य्याय** – हृदये भवाय।

**भावार्थः** – गोसमूहे जाताय नमः, गोभूमौ जाताय नमः, शय्यायां जाताय नमः, गृहे जाताय नमः, हृदये जाताय, आवर्तजले उत्पन्नाय, कूपे जाताय, गिरिगह्वरे स्थिताय च नमः।

**ॐ नमः शुष्क्क्याय च हरित्त्याय च नमः पाᳬसव्याय च रजस्याय च नमो लोप्याय चोलप्याय च नमऽऊर्व्याय च सूर्व्याय च॥ 45॥**

**अन्वयः** – शुष्के जाताय, आर्द्रे जाताय, धूल्याम् उत्पन्नाय, रजसि जाताय, अगम्यप्रान्तोद्भवाय, बल्वजादितृणविशेषयुक्तदेशोद्भवाय, भूमौ जाताय, कल्पानले उत्पन्नाय च नमः।

**शब्दार्थः** **पांसव्याय** धुलिषु भवाय **उलप्याय** बल्वजादितृणविशेषे भवाय।

**भावार्थः** - शुष्के जाताय नमः, आर्द्रे जाताय नमः, धूल्याम् उत्पन्नाय नमः, रजसि जाताय नमः, अगम्यप्रान्तोद्भवाय नमः, बल्वजादितृणविशेषयुक्तदेशोद्भवाय नमः, भूमौ जाताय नमः, कल्पानले उत्पन्नाय नमः।

**ॐ नमः पर्ण्णाय च पर्ण्णशदाय च नमऽउद्‌गुरमाणाय चाभिघ्नते च नम आखिदते च प्रखिदते च नम इषुकृद्‌भ्यो धनुष्कृद्‌भ्यश्च वो नमो नमो वः किरिकेभ्यो देवानाᳫं हृदयेभ्यो नमो विचिन्वत्केभ्यो नमो विक्षिणत्केभ्यो नमऽआनिर्हतेभ्यः॥ 46॥**

**अन्वयः** - पर्णाय, विगतपर्णवते, उद्यमनशीलाय, अभिहननं कुर्वते, दुःखदाय, प्रकृष्टतया दुःखदायकाय, बाणनिर्मात्रे, धनुर्निर्मातृभ्यो, वृष्ट्यादिभिः जगदुत्पादकेभ्यो देवानां हृदयवत् प्रधानभूतेभ्यो अग्निवायुसूर्यरूपेभ्यो रुद्रेभ्यो, पापकारिणः पुण्यशालिनः च पृथक्कारिभ्यो, विविधान् हिंसद्‌भ्यो, समग्रतया गतियुक्तेभ्यो च नमः।

**शब्दार्थः** - **उद्गुरमाणाय** - उद्यमिने, **विचिन्वत्केभ्यः** - पृथक्कुर्वद्‌भ्यः, **विक्षिणत्केभ्यः** - हिंसद्‌भ्यः।

**भावार्थ** - पर्णाय नमः, विगतपर्णवते नमः, उद्यमशीलाय नमः, अभिहननं कुर्वते नमः, दुःखदाय नमः, प्रकृष्टतया दुःखदायकाय नमः, बाणनिर्मात्रे नमः, धनुर्निर्मातृभ्यो नमः, वृष्ट्यादिभिः जगदुत्पादकेभ्यो देवानां हृदयवत् प्रधानभूतेभ्यो अग्निवायुसूर्यरूपेभ्यो रुद्रेभ्यो नमः, पापकारिणः पुण्यशालिनः च पृथक्कारिभ्यो नमः, विविधान् हिंसद्‌भ्यो नमः, समग्रतया गतियुक्तेभ्यो नमः।

**शब्दार्थाः**

**नमो बिल्मिने च** विल्वप्रिया **कवचिने** कवचयुताय **इषुमद्‌भ्यः** बाणधरेभ्यः **वर्षीयसे** वृद्धतराय **शंकराय** शं सुखं करोति तस्मै शंकराय **पांसव्याय** धुलिषु भवाय **उलप्याय** बल्वजादितृणविशेषे भवाय।

**स्वाध्यायः**

**1. प्रदत्तविकल्पेभ्यः योग्यविकल्पं चित्वा उत्तरं यच्छत।**

(1) नमः सेनाभ्यः ..........।

(क) लोकिन्यै (ख) सेनानि (ग) जनान्ये (घ) प्रस्थिताय

(2) नमः कृत्स्नायतया ..........।

(क) खादते (ख) बृहते (ग) धावते (घ) मरुते

(3) नमः ह्रस्वाय च ..........।

(क) वृद्धाय (ख) वामनाय (ग) श्रेष्ठाय (घ) प्रधानाय

(4) श्रवाय च ..........।

(क) प्रतिश्रवाय (ख) गृभ्णाय (ग) शुरथाय (घ) विदथाय

(5) वर्मिणे च .......... च।

(क) वरूथिने (ख) वर्मणे (ग) धारिणे (घ) वामनाय

**2. प्रश्नामुत्तराणि लिखत।**

(1) 'नमो हिरण्यबाहवे' अस्य मन्त्रस्य भावार्थो लेख्यः।

(2) 'नमो कृत्स्नायतया' अस्य मन्त्रस्य भावार्थो लेख्यः।

(3) 'नमः सेनाभ्यः' अस्य मन्त्रस्य भावार्थो लेख्यः।

(4) अस्य सूक्तस्य अपरं नाम किम्? कथम्?

(5) 'नमः कूप्याय च' अस्य भावार्थ कः?

**3. मन्त्रपूर्तिः कार्या।**

(1) नमो गणेभ्यो ................ विश्वरूपेभ्यश्च वो नमः॥

(2) नमः श्वभ्यः ................ शितिकण्ठाय च॥

(3) नमः कपर्दिने ................ चेषुमते च॥

(4) नमः सोभ्याय ................ खल्याय च॥

(5) नमो वन्याय ................ चावभेदिने च॥

**शिक्षक-प्रवृत्तिः**

शिक्षकः छात्रेभ्यः स्वाहाकारस्य ज्ञानंप्रदेषुः।

**छात्रप्रवृत्तिः**

छात्राः स्वाहाकारेण सहितः पाठोऽयं कण्ठस्थी कुर्वन्तु।

**सूक्तिः - शिवस्य हृदयं विष्णुः विष्णोश्च हृदयं शिवः**

●

| 23. | रुद्र-सूक्तम् - (3) |
|---|---|

**प्रस्तावना**

अस्मिन् पाठे रुद्रस्य विविधनाम् उत्पत्तिस्थानानां वर्णनं वर्तते। सूक्तेऽस्मिन् रुद्रस्य गुणधर्माणां निरूपणम् कृतं वर्तते। सूक्तेऽस्मिन् निरामयमपि शिवादेव आकांक्षितं वर्तते।

---

**॥ अथ रुद्र-सूक्तम् ॥**

**ॐ द्रापेऽअन्धसस्पते दरिद्र नीललोहित। आसाम्प्रजानाम्मेषाम्पशूनाम् माभेर्म्मारोङ्मोचनः किञ्चनाममत् ॥ 47 ॥**

**अन्वयः** - (हे) नीललोहित! द्रापे ! अन्धसस्पते! दरिद्र! आसां प्रजानाम् एषां पशूनां (च) मा भेः मा रोक् मा च नः किञ्चन आममत्।

**शब्दार्थः** **मा अभेः** भयं न कुरु **मा अरोक्** भंगं न कुरु **मो** मा।

**भावार्थः** - हे पापिभ्यो दुर्गतिप्रदायक! हे सोमपालक! हे महाअकिंचन! हे नीलकण्ठ! इमाः प्रजाः पशून् वा भयभीतान् मा कुरु। कमपि रुग्णं मा कुरु, अस्माकं कोऽपि पशुप्रभृतिः विशूचकादिरोगवान् न भवेत्।

**ॐ इमा रुद्राय तवसे कपर्द्दिने क्षयद्वीराय प्रभरामहे मतीः। यथा समसद्विपदे चतुष्पदेव्विश्वम्पुष्टङ्ग्रामेऽअस्मिन्ननातुरम् ॥ 48 ॥**

**अन्वयः** - इमाः मतीः रुद्राय तवसे कपर्दिने क्षयद्वीराय प्रभरामहे। यथा द्विपदे चतुष्पदे शम् असत् भवति। अस्मिन् ग्रामे विश्वं पुष्टम् अनातुरम्।

**शब्दार्थः** **तवसे** बलवते **प्रभरामहे** प्रेरयामः **अनातुरम्** आपद्रहितम्।

**भावार्थः** - बलवते, जटाधारिणे, शत्रुवीराणां नाशकाय रुद्राय इमाः स्तुतिः प्रयोजयामः, यतः अस्माकं द्विपदः चतुष्पदः च कल्याणं भूयात्। अस्माकं अस्मिन् ग्रामे सर्वे पुष्टाः अनातुराः च भवेयुः।

**ॐ याते रुद्र शिवा तनूः शिवा व्विश्वाहा भेषजी। शिवा रुतस्य भेषजी तयानो मृड जीवसे ॥ 49 ॥**

**अन्वयः** - (हे) रुद्राय ते शिवा विश्वाहा भेषजी रुतस्य भेषजी तनूः नः जीवसे मृड।

**शब्दार्थः** **रुतस्य** शारीरव्याधेः **मृड** सुखी कुरु।

**भावार्थः** - हे रुद्र! तव इदं शरीरम् अतिशान्तम् अस्ति, यत् सर्वदा शान्तम् ओषधिरूपं चास्ति। शारीरिकरोगाणाम् एकमात्रम् औषधम् अस्ति। स्वीयेन तेनैव शरीरेण जीवनाय अस्मान् प्रसन्नान् कुरु।

**ॐ परिनो रुद्रस्य हेतिर्व्वृणक्तु परि त्वेषस्य दुर्म्मतिरघायोः। अव स्थिरा मघवद्भ्यस्तनुष्व मीढ्वस्तोकाय तनयायमृड ॥ 50 ॥**

**अन्वयः** - रुद्रस्य हेतिः नः परिवृणक्तु। त्वेषस्य अधायोः दुर्मतिः (परिवृणक्तु)। (हे) मीढ्वः स्थिराः तनुत्व। मघवद्भ्यः लोकाय अव।

**शब्दार्थः** **परिवृणक्तु** परिवर्जयतु।

**भावार्थः** - रुद्रस्य आयुधम् अस्मान् दूरतः हि मुञ्चतु, हिंसायाः इच्छुकस्य, कान्तियुक्तस्य रुद्रस्य हिंसाबुद्धिः अस्मत्तः दूरे भवतु। हे सेचनसमर्थ! धनवतां यजमानानां कृते त्वं आत्तं धनुः शिथिलं कुरु। हे रुद्र! अस्माकं पुत्रपौत्रादिषु दयां कुरु।

**ॐ मीढुष्टम शिवतम शिवो नः सुमना भव। परमे व्वृक्षऽआयुधन्निधाय कृत्तिं व्वसानऽआचरपिनाकम्बिभ्रदागहि॥ 51॥**

**अन्वयः** - मीढुष्टम शिवतम शिवः न सुमना भव। परमे वृक्षे आयुधं निधाय कृत्तिं वसानः आचर, पिनाकं बिभ्रत् आगहि।

**शब्दार्थः** **कृत्तिम्** चर्म **आचर** आगच्छ **आगहि** आगहि **बिभ्रत्** धारयन्।

**भावार्थः** - हे अत्यन्त सेचनसमर्थ! हे अत्यन्त कल्याणकारिन्! कल्याणरूपः त्वं अस्मान् प्रति प्रसन्नचित्तो भव। त्वं धनुरादिकं कस्मिंश्चित् उन्नते वृक्षे धारयित्वा चर्म धृत्वा भ्रमणं कुरु। स्वीयं पिनाकं धारयन् त्वं अस्मन्निकटे आगच्छ।

**ॐ व्विकिरिद्र व्विलोहित नमस्तेऽअस्तु भगवः। यास्ते सहस्रꣳहेतयो न्यमस्मन्निवपन्तुताः॥ 52॥**

**अन्वयः** - (हे) विकिरिद्र! विलोहित! भगवः ते नमः अस्तु। (हे रुद्र) ते याः सहस्रं हेतयः ताः अस्मत् अन्यं निवपन्तु।

**शब्दार्थः** **विकिरिद्र** विविधोपद्रपनाशक! **निवपन्तु** घ्नन्तु।

**भावार्थः** - हे बाणावर्षक! हे विगतकल्मष! हे भगवन् ते नमः अस्तु। तव यानि सहस्रम् आयुधानि तानि अस्मत्तः अन्यं पुरुषं घ्नन्तु।

**ॐ सहस्राणि सहस्रशो बाह्वोस्तव हेतयः। तासामीशानो भगवः पराचीनामुखाकृधि॥ 53॥**

**अन्वयः** - (हे) भगवः! तव बाह्वोः सहस्राणि सहस्रशः हेतयः (सन्ति)। ईशानः तासां मुखा पराचीना कृधि।

**शब्दार्थः** **पराचीना** पराङ्मुखा **कृधि** कुरु।

**भावार्थः** - हे रुद्र! तव बाहौ अनन्तप्रकारकाणि, अनेकानि आयुधानि सन्ति। हे भगवन्! त्वं तानि वशे कुरु। त्वं तेषां मुखानि अस्मत्तः पराङ्मुखानि कुरु।

**ॐ असंख्याता सहस्राणि ये रुद्राऽअधिभूम्याम्। तेषाꣳसहस्रयोजने वधन्वानि तन्मसि ॥54॥**

**अन्वयः** - ये असंख्याताः सहस्राणि रुद्राः अधिभूम्याम्। तेषां धन्वानि सहस्रयोजने अवतन्मसि।

**शब्दार्थः** **अधिभूम्याम्** भूमौ **अवतन्मसि** अवतारयामः।

**भावार्थः** - भूमौ ये सहस्रशः रुद्राः सन्ति तेषां सर्वेषां धनूंषि मन्त्रबलेन वयम् अवतारयामः।

**ॐ अस्मिन् महत्यर्णवेन्तरिक्षे भवाऽअधि। तेषाꣳसहस्रयोजने वधन्वानि तन्मसि॥ 55॥**

**अन्वयः** - अस्मिन् महति अर्णवे अन्तरिक्षे अधिभवाः। तेषां धन्वानि सहस्रयोजने अवतन्मसि।

**शब्दार्थः** **अर्णवे** समुद्रे **अधिभवाः** उपरि स्थिताः।

**भावार्थः** – अस्मिन् विस्तृते अन्तरिक्षे, जले च ये रुद्राः स्थिताः तेषां धनूंषि वयं सहस्त्रयोजनं अस्मत्तः दूरं क्षिपामः।

**ॐ नीलग्रीवाः शितिकण्ठादिवꣳरुद्राऽउपश्रिताः। तेषाꣳसहस्त्रयोजने वधन्वानि तन्मसि॥ 56॥**

**अन्वयः** – नीलग्रीवाः शितिकण्ठाः रुद्राः दिवमुपस्थिताः। तेषां धन्वानि सहस्त्रयोजने अवतन्मसि।

**शब्दार्थः** **द्युलोकम्** स्वर्गलोकम्

**भावार्थः** – नीलग्रीवाः श्वेतवचनाः ये रुद्राः द्युलोकमाश्रित्य स्थिताः तेषां धनूंषि वयम् अस्मत्तः सहस्त्रयोजनं दूरं क्षिपामः।

**ॐ नीलग्रीवाःशितिकण्ठाः शर्व्वाऽअधः क्षमाचराः। चेषाꣳसहस्त्रयोजने वधन्वानि तन्मसि ॥ 57॥**

**अन्वयः** – नीलग्रीवाःशितिकण्ठाः शर्वाः अधः क्षमाचराः। तेषां धन्वानि सहस्त्रयोजने अवतन्मसि।

**शब्दार्थः** **शर्वाः** रुद्राः।

**भावार्थः** – नीलग्रीवाः श्वेतवचटनाः ये रुद्राः भूमे अधः संचरणशीलाः सन्ति। तेषां धनूंषि वयम् अस्मत्तः सहस्त्रयोजनं दूरं क्षिपामः।

**ॐ ये व्वृक्षेषु शष्प्पिञ्जरा नीलग्रीवा व्विलोहिताः। तेषाꣳसहस्त्रयोजने वधन्वानि तन्मसि॥ 58॥**

**अन्वयः** – ये वृक्षेषु नीलग्रीवाः विलोहिताः। तेषां धन्वानि सहस्त्रयोजने अवतन्मसि।

**शब्दार्थः** **विलोहिताः** विशिष्टरीत्या रक्ताः।

**भावार्थः** – वृक्षेषु ये रुद्राः नवप्ररूढसस्यसदृशाः, पीताः, नीलग्रीवाः, रक्तनेत्राः च सन्ति। तेषां धनूंषि वयम् अस्मत्तः सहस्त्रयोजनं दूरं क्षिपामः।

**ॐ ये भूतानामधिपतयो व्विशिखासः कपर्दिनः। तेषाꣳसहस्त्रयोजने वधन्वानि तन्मसि॥ 59॥**

**अन्वयः** – ये भूतानामधिपतयः विशिखासः कपर्दिनः। तेषां धन्वनि सहस्त्रयोजने अवतन्मसि।

**शब्दार्थः** **भूतानाम्** समस्तप्रणिनाम्

**भावार्थः** – हे रुद्राः भूतानाम् अधिपतयः सन्ति, विगतशिखाः जटाधारिणः सन्ति, तेषां धनूंषि वयम् अस्मत्तः सहस्त्रयोजनं दूरं क्षिपामः।

**ॐ ये पथाम् पथिरक्षयऽऐलबृदाऽआयुर्म्युधः। तेषाꣳसहस्त्रयोजने वधन्वानि तन्मसि॥ 60॥**

**अन्वयः** – ये पथां पथिरक्षयः ऐलबृदाः आयुर्युधः। तेषां धन्वानि सहस्त्रयोजने अवतन्मसि।

**शब्दार्थः** **पथिरक्षयः** – मार्गरक्षकाः, **आयुर्युधः** – चौरादयः।

**भावार्थः** – ये रुद्राः मार्गरक्षकाः, अन्नधारकाः, यावज्जीवं युद्धकर्तारः च सन्ति, तेषां धनूंषि वयम् अस्मत्तः सहस्त्रयोजनं दूरं क्षिपामः।

**ॐ ये तीर्थानि प्प्रचरन्ति सृकाहस्तानिषङ्गिणः। तेषाꣳसहस्त्रयोजने वधन्वानि तन्मसि॥ 61॥**

**अन्वयः** – ये सृकाहस्ताः निषङ्गिणः तीर्थानि प्रचरन्ति। तेषां धन्वानि सहस्त्रयोजने अवतन्मसि।

**शब्दार्थः** **सृकाहस्ताः** सृकाधारिणः।

**भावार्थः** – ये रुद्राः आयुधहस्ताः, खड्गहस्ताः, तीर्थेषु भ्रमन्ति, तेषां धनूंषि वयम् अस्मत्तः सहस्रयोजनं दूरं क्षिपामः।

**ॐ येन्नेषु व्विविध्यन्ति पात्रेषु पिबतो जनान्। तेषाᳬसहस्रयोजने वधन्वानि तन्मसि ॥ 62॥**

**अन्वयः** – ये येन्नेषु पात्रेषु पिबतो जनान् विविध्यन्ति। तेषां धन्वानि सहस्रयोजने अवतन्मसि।

**शब्दार्थः** – **अन्नेषु** – खाद्यान्नेषु

**भावार्थः** – ये रुद्राः अन्नेषु मनुष्यान् घ्नन्ति, पात्रेषु च क्षीरोदकादिपानां कुर्वतः जनान् विविध्यन्ति, तेषां धनूंषि वयम् अस्मत्तः सहस्रयोजनं दूरं क्षिपामः।

**ॐ यऽएतावन्तश्च भूयाᳬसश्च दिशो रुद्राव्वितस्थिरे। तेषाᳬसहस्रयोजने वधन्वानि तन्मसि॥ 63॥**

**अन्वयः** – ये एतावन्तः भूयांसः च रुद्राः दिशः वितस्थिरे। तेषां धन्वानि सहस्रयोजने अवतन्मसि।

**शब्दार्थः** **एतावन्तः** एतावद्मात्रायाम्।

**भावार्थः** – ये एतावन्मात्राः, इतोऽप्यधिकाः, रुद्राः भूमौ दिक्षु विदिक्षु च व्याप्ताः सन्ति, तेषां धनूंषि वयम् अस्मत्तः सहस्रयोजनं दूरं क्षिपामः।

**ॐ नमोस्तु रुद्रेभ्यो ये दिवि येषां व्वर्षमिषवः। तेभ्यो दशप्राचीर्दशदक्षिणादशप्प्रतीचीर्दशोदीची-द्र्दशोर्द्ध्वाः। तेभ्यो नमोऽअस्तुतेनो वन्तुतेनो मृडयन्तु ते यन्द्विष्मो यश्चन द्वेष्टितमेषा ञ्जम्भेदद्ध्मः॥ 64॥**

**अन्वयः** – ये दिवि येषां वर्षम् इषवः (तेभ्यः) रुद्रेभ्यः नमः अस्तु। दश प्राचीः दश दक्षिणाः दश प्रतीचीः दश उदीचीः दश ऊर्ध्वाः तेभ्यः नमः अस्तु। ते नः अवन्तु। ते नः मृडयन्तु। यं द्विष्मः यः च नः द्वेष्टि तम् एषां जम्भे दध्मः।

**शब्दार्थः** **जम्भे** दंष्ट्राकराले मुखे **दध्मः** धारयामः।

**भावार्थ** – ये रुद्राः द्युलोके स्थिताः येषां च बाणाः वर्षारूपाः सन्ति तेभ्यो रुद्रेभ्यो नमः करोमि। तेषां कृते पूर्वतः, दक्षिणतः, पश्चिमतः, उत्तरतः, ऊर्ध्वतः दश अङ्गुलीः योजयित्वा नमस्करोमि। तेभ्योः नमः अस्तु। ते अस्मान् अवन्तु। ते अस्मान् सुखनिः कुर्वन्तु। वयं येषां द्वेषं कुर्मः, ये च अस्माकं द्वेषं कुर्वन्ति तान् वयं रुद्राणां दंष्ट्राकराले मुखे स्थापयामः।

**ॐ नमोस्तु रुद्रेभ्यो येन्तरिक्षे येषां व्वातऽइषवः। तेभ्यो दशप्राचीर्दशदक्षिणा दशप्प्रतीचीर्दशोदीचीद्र्दशोर्द्ध्वाः। तेभ्यो नमोऽअस्तुतेनो वन्तुतेनो मृडयन्तु ते यन्द्विष्मो यश्चनो द्वेष्टितमेषाञ्जम्भेदद्ध्मः ॥ 65॥**

**अन्वयः** – ये अन्तरिक्षे येषां वातः इषवः (तेभ्यः) रुद्रेभ्यः नमः अस्तु। दश प्राचीः दश दक्षिणाः दश प्रतीचीः दश उदीचीः दश ऊर्ध्वाः तेभ्यः नमः अस्तु। ते नः मृडयन्तु। यं द्विष्मः यः च नः द्वेष्टि तम् एषां जम्भे दध्मः।

**शब्दार्थः** **वातः इषवः** वायुरूपाः बाणाः

**भावार्थः** – ये रुद्राः अन्तरिक्षे स्थिताः येषां च बाणाः वायुरूपाः सन्ति तेभ्यो रुद्रेभ्यो नमः करोमि। तेषां कृते पूर्वतः,

दक्षिणतः, पश्चिमतः, उत्तरतः, ऊर्ध्वतः दश अङ्गुलीः योजयित्वा नमस्करोमि। तेभ्योः नमः अस्तु। ते अस्मान् अवन्तु। ते अस्मान् सुखिनः कुर्वन्तु। वयं येषां द्वेषं कुर्मः ये च अस्माकं द्वेषं कुर्वन्ति तान् वयं रुद्राणां दंष्ट्राकराले मुखे स्थापयामः।

**ॐ नमोस्तु रुद्रेभ्यो ये पृथिव्याँ य्येषामन्नमिषवः। तेभ्यो दशप्राचीर्दशदक्षिणादशप्प्रतीचीर्दशोदीची-दर्दशोर्द्ध्वाः। तेभ्यो नमोऽअस्तुतेनो वन्तुतेनो मृडयन्तु ते यन्द्विष्मो यश्चनोद्वेष्टितमेषाञ्जम्भेद-द्ध्मः॥ 66॥**

**अन्वयः** - ये पृथिव्यां येषाम् अन्नम् इषवः (तेभ्यः) रुद्रेभ्यः नमः अस्तु। दश प्राचीः दश दक्षिणाः दश प्रतीचीः दश उदीचीः दश ऊर्ध्वाः तेभ्य नमः अस्तु। ते नः अवन्तु। ते नः मृडयन्तु। यं द्विष्मः यः च नः द्वेष्टि तम् एषां जम्भे दध्मः।

**शब्दार्थः** **अन्नमिषवः** अन्नरूपाः बाणाः।

**भावार्थः** - ये रुद्राः पृथिव्यां स्थिताः येषां च बाणाः अन्नरूपाः सन्ति तेभ्यो रुद्रेभ्यो नमः करोमि। तेषां कृते पूर्वतः, दक्षिणतः, पश्चिमतः, उत्तरतः, ऊर्ध्वतः दश अङ्गुलीः योजियित्वा नमस्करोमि। तेभ्योः नमः अस्तु। ते अस्मान् अवन्तु। ते अस्मान् सुखिनः कुर्वन्तु। वयं येषां द्वेषं कुर्मः, ये च अस्माकं द्वेषं कुर्वन्ति तान् वयं रुद्राणां दंष्ट्राकराले मुखे स्थापयामः।

**शब्दार्थाः**

**शम्** सुखम् **कपर्दिने** जटिलाय **तनूः** शरीरम् **जम्भे** दंष्ट्राकराले मुखे, **दध्मः** - धारयामः **अर्णवे** समुद्रे **अधिभवाः** उपरि स्थिताः **अधिभूम्याम्** भूमौ **अवतन्मसि** अवतारयामः।

**स्वाध्यायः**

**1. प्रदत्तविकल्पेभ्यः योग्यविकल्पं चित्वा उत्तरं यच्छत।**

(1) द्रापे अन्धसस्पते _______ नीललोहित।

(क) दरिद्रः (ख) पशूनाम् (ग) आसाम् (घ) किञ्चनाममत्

(2) असंख्याता सहस्राणि ये रुद्रा _______ ।

(क) तेषाम् (ख) जने (ग) अधिभूम्याम् (घ) तन्मसि

(3) ये तीर्थानि _______ सृका।

(क) प्रचरन्ति (ख) अधियन्ति (ग) प्रभवन्ति (घ) मदयन्ति

(4) नमोऽस्तु रुद्रेभ्यो ये दिवि येषां _______ इषवः।

(क) दर्शनम् (ख) वर्षमिषवः (ग) भूमिः (घ) मृडयन्ति

(5) परि नो रुद्रस्य _______ वृणक्तु।

(क) हेतिः (ख) नेतिः (ग) वेतिः (घ) जेतिः

**2. निम्नाङ्कितानां प्रश्नानाम् उत्तरं यच्छत।**

(1) षडैश्वर्यसंपन्नस्य शिवस्य वर्णनं कुरुत।

(2) 'नमोऽस्तु रुद्रेभ्यो ये दिवि...' इति मन्त्रस्य भावार्थो लेख्यः

(3) 'नीलग्रीवाः शितिकण्ठाः...' इति मन्त्रस्य भावार्थो लेख्यः।

(4) 'ये भूतानामधिपतयो...' इति मन्त्रस्य भावार्थो लेख्यः।

(5) 'य एतावन्तश्च...' इति मन्त्रस्य भावार्थो लेख्यः।

**3. मन्त्राणां पूर्तिं कुरुत।**

(1) नमोऽस्तु रुद्रेभ्यो...

(2) ये वृक्षेषु....

(3) अस्मिन् महत्यर्णवे....

**शिक्षक-प्रवृत्तिः**

शिक्षकः सूक्तान्तानां मन्त्रत्रयाणां चर्चां कुर्यात्।

**छात्रप्रवृत्तिः**

छात्राः मन्त्राणां कण्ठस्थीकरणं कुर्युः।

**सूक्तिः** - वेदो नारायणो हरिः

●

| 24. | दशविधस्नानम् |
|---|---|

**प्रस्तावना**

यज्ञे यजनावसरे किमपि कर्तुं यः अधिकारो भवति तत्प्राप्तये कानिचित् कर्माणि भवन्ति। तेषु कर्मसु एकमिदं कर्म दशविधस्नानम्।

यज्ञकरणाय अधिकारप्राप्तये दशेभ्यः उपचारेभ्यः यजमानेन स्नातव्यं भवति येन च आन्तरिकी बाह्यशुद्धिश्च स्यात्।

तस्मात् प्रस्तूयते दशविधस्नानम्।

---

**॥ दशविधस्नानानि ॥**

अस्माकं धार्मिक विधौ देहशुद्धेः आवश्यकता अत्यधिका वर्तते। शरीरशुद्ध्यर्थं स्नानविधिः भवति। दशप्रकारकैः द्रव्यैः स्नानं भवति। तत्पूर्वं हेमाद्रिमुनिना रचितः स्नान सङ्कल्पः क्रियते। अस्मिन् सङ्कल्पे ब्रह्मणः सृष्टेः विस्तृतं वर्णनं अस्ति। तथा च पर्वतानां, ऋषीणां, पुराणां, अरण्यानां, नदीनां, प्रदेशादीनां नामानि अपि लिखितानि सन्ति। ब्रह्महत्यादि-चतुर्णां प्रमुख-रूपाणां पापानां निदर्शनं कृत्वा अनेन स्नान सङ्कल्पेन महर्षिः हेमाद्रिः भारतीय संस्कृतेः सूक्ष्मातिसूक्ष्मं दर्शनं कारयति। दशविधस्नानेन शरीरशुद्धिः तु भवत्येव अपरं च तेजोमयं शरीरम् अपि भवति।

अद्य पूर्वोच्चारित-शुभपुण्यतिथौ मम कायिकादि चतुर्विध पापानां क्षयार्थं करिष्यमाण प्रायश्चित्ताङ्गत्वेन गृहे देवतीर्थे वा हेमाद्रि प्रयोग श्रवणपूर्वकं दशविधस्नानविधिना सन्नानमहं करिष्ये।

**अथ हेमाद्रिप्रोक्तस्नानसङ्कल्पः**

**( जलनारिकेलकुशयवाक्षतान् गृहीत्वा सङ्कल्पं श्रुणुयात् )**

स्वस्तिश्रीमुकुन्दसच्चिदानन्दस्य ब्रह्मणोऽनिर्वाच्यमायाशक्तिविजृम्भिताविद्यायोगात् कालकर्मस्वभावाविर्भूत महत्तत्त्वोदिताहङ्कारोद्भूतवियदादिपञ्चमहाभूतेन्द्रियदेवतानिर्मितेऽण्डकटाहे चतुर्दशलोकात्मके लीलया तन्मध्यवर्तिभगवतः श्रीनारायणस्य नाभि कमलोद्भूतसकललोकपितामहस्य ब्रह्मणः सृष्टिं कुर्वतस्तदुद्धरणाय प्रजापति प्रार्थितस्य समस्तजगदुत्पत्तिस्थितिलयकारणस्य जगद्रक्षाशिक्षाविचक्षणस्य प्रणतपारिजातस्य अच्युतानन्तवीर्यस्य श्रीमद्भगवतो महापुरूषस्य अचिन्त्यापरिमितशक्त्या ध्रियमाणस्य महाजलौघमध्ये परिभ्रमप्रमाणानामनेककोटिब्रह्माण्डानामेकतमे अव्यक्तमहदहङ्कार पृथिव्यप्तेजोवाय्वाकाशाद्याचरणैरावृते अस्मिन्महति ब्रह्माण्डखण्डे आधारशक्ति श्रीमदादिवाराहदंष्ट्राग्रविराजिते कूर्मानन्तवासुकितक्षककुलिककर्कोटकपद्ममहापद्मशङ्खाद्यष्टमहानागैर्ध्रियमाणे ऐरावत-पुण्डरीक-वामन कुमुदाञ्जन-पुष्पदन्त-सार्वभौम सुप्रतीकाष्टदिग्गजप्रतिष्ठितानाम् अतलवितलसुतलातलरसातल-

महातलपाताललोकानामुपरिभागे भूर्लोकभुवर्लोकस्वर्लोकमहर्लोकजनोलोकतपोलोकसत्यलोकाख्यसप्तलोकानामधोभागे चक्रवालशैलमहावलयनाग मध्यवर्तिनो महाकालमहाफणिराजशेषस्य सहस्रफणानां मणिमण्डलमण्डिते दिग्दन्तिशुण्दण्डादण्डोत्त्दण्डिते त्तम्भिते इन्द्राग्नियमनिर्ऋतिवरुणवायुकुबेरेशानाष्टदिक्पालप्रतिष्ठिते वरध्रुवाघरसोमपाप्रभञ्जनानल प्रत्युयप्रभासाख्यष्ट वसुभिर्विराजिते हरत्र्यम्बकरुद्रमृगव्याघापराजितकपालिभैरवशम्भुकपर्दिवृषाकपिबटुरूपाख्यैकादशरुद्रैः संशोभिते रुद्रोपेन्द्रसवितृधातृत्वष्ट्र्यमेन्द्रेशानभगमित्रविष्णुपूषाख्यद्वादशादित्यैः प्रकाशिते यमनियमासनप्राणायामप्रत्याहारधारणाध्यानसमाध्यष्टाङ्गनिरत-वसिष्ठवालखिल्यविश्वामित्रदक्षकात्यायन-कौण्डिन्यगौतमाङ्गिरसपाराशर्यव्यासवाल्मीकशुकशौनकभरद्वाजसनकसनन्दनसनातनसनत्कुमारनारदादि मुख्यमुनिभिः पवित्रिते लोकालोकाचलवलयिते लवणेक्षुरसुरासर्पिदधिक्षीरोट्कयुक्त सप्तार्णवपरिवृते जम्बूप्लक्षशाल्मलिकुशक्रौञ्चशाकपुष्करख्यसप्तद्वीपयुते इन्द्रकांस्यताम्रगभस्तिनागसौम्यगन्धर्वचारणभारतेति नवखण्डमण्डिते सुवर्णगिरिकर्णिकोपेतमहारसोरुहाकारपञ्चाशत्कोटियोजनविस्तीर्णे भूमण्डले अयोध्यामथुरामायाकाशीकाञ्चीअवन्तिकाधारावतीतिसप्तपुरीप्रतिष्ठिते महामुक्तिप्रदस्थले शालग्रामशम्भलनन्दिग्रामेतिग्रामत्रयविराजिते चम्पकारण्यबदरिकाण्यदण्डकारण्यार्बुदारण्य-धर्मारण्यपद्मारण्यगुह्यारण्य जम्बुकारण्यविन्ध्यारण्यदाक्षारण्यनाहुषारण्यकाम्यकारण्यद्वैतारण्य-नैमिषारण्यादीनां मध्ये सुमेरुनिषधकूट-शुभ्रकूटश्रीकूटहेमकूटरजतकूटचित्रकूटत्रिकूटकिष्किन्धाश्वेताद्रिकूटहिमविन्ध्याचलानामुत्तरे स्वर्णप्रस्थचण्डप्रस्थ सूक्तिकावन्तकरमणकमहारमणक-पाञ्चजन्यसिंहललङ्केतिनवखण्डोपमण्डिते अशोकवत्यलंकावती गान्धर्वत्यादिपुण्यपुरीविराजिते दक्षिणावस्थितरेणुकाद्वयसूकरकाशीकाञ्चीकालिकालवटेश्वर कालञ्जरमहाकालेति नवोखरयुते द्वादश ज्योतिर्लिङ्ग गङ्गागोदावरीक्षिप्रायमुनानर्मदा-सरस्वतीतापीपयोष्णी चन्द्रभागाकावेरी मन्दाकिनीप्रवराकृष्णावेण्याभीमरथीतुङ्गभद्रा-मलापहाकृतमालाताम्रपर्णाविशालाक्षीवञ्जुला चर्मण्वतीवेत्रवतीभोगावतीविशोका कौशिकीगण्डकीवासिष्ठी-प्रमदाविश्वामित्रीफल्गुनीचित्र-काश्यपीसरयू-सर्वपापहारिणीकरतोयाप्रणीतावज्रावक्रगामिनीसुवर्णरेखाशोभा-भवनाशिनीशीघ्रगाकुशवर्तिनी-ब्रह्मानंदामहितनयेत्यनेकपुण्यनदीभिर्विलसितेब्रह्मपुत्रसिन्धुनदादिपरमपवित्रनदविराजिते हिमवन्मेरुगोवर्धनक्रौञ्चचित्रकूटहेमकूटमहेन्द्रमलयसहयेन्द्रकीलपारियात्राद्यनेकपर्वतसमन्विते मतङ्गमाल्यकिष्किन्धऋष्यश्रृङ्गेतिमहानगसमन्विते अङ्गबङ्गकलिङ्गकाश्मीरकाम्बोजसौवीरसौराष्ट्र-गुर्जरराष्ट्रमहाराष्ट्रमगधनेपालकेरलचोलपाञ्चालगौडमालवमलसिंहलद्रविडकर्णाटकललाटकरहाटवहारहाट पानाटपाण्डयनिषधमागधान्ध्रदशार्णवभोजकुरुगान्धारविदर्भविदेहबाल्हीकबर्बरकैकेय-कौशल-विराटशूरसेनकोंकणकैकटमत्स्यमद्रपारसिकखर्जूरजालन्धरेतिसिद्धवत्यन्यदेशविशेषभाषा भूमिपालविचित्रिते

इलावृतकुरुभद्राश्वकेतुमालकिम्पुरुषरमणकहिरण्मयादिनववर्षाणां मध्ये भरतखण्डे बकुलचम्पक पाटलाब्जपुन्नागजातिकरवीररसालकल्हारकेतक्यादिनानाविधकुसुमस्तबकविराजिते कोकन्तहिरण्य श्रृङ्गकुब्जार्बुदमणिकर्णीवटशालग्रामसूकरमथुरा गयानाष्क्रमणलोहार्गलपोतस्वामिप्रभासबदहीतिचतुर्दशगुह्य विलसिते जम्बूद्वीपे कुरुक्षेत्रादिसमभूमध्यरेखाया: पश्चिमदिग्भागेकुलमेरोर्दक्षिणदिग्भागे विन्ध्यस्य दक्षिणदेशे मत्स्यकूर्मवराहनृसिंहवामनपरशुरामरामकृष्णबुद्धकल्कीतिदशावताराणां मध्ये बौद्धावतारे गङ्गासरिद्भि: पाविते एवं नवसहस्रयोजनविस्तीर्णेभारतवर्षे निखिलजनपावनपरमभागवतोत्तमशौनकादिनिवासिते नैमिषारण्ये आर्यावर्तान्तर्गत-ब्रह्मावर्तैकदेशे सूर्यान्वयभूभृत्प्रतिष्ठिते श्रीमन्नारायणनाभिकमलोद्भूत-सकलजगत्स्त्रष्टु: परार्द्धद्वयजीविनो ब्रह्मणो द्वितीयपरार्द्ध एकपञ्चाशत्तमे वर्षे प्रथमपक्षे प्रथमदिवसे अह्नो द्वितीये यामे तृतीयेमुहूर्ते रथन्तरादिमन्वन्तराणां मध्यं सप्तमे वैवस्वतमन्वन्तरे कृतत्रेताद्वापरकलिसंशकानां चतुर्णां युगानां मध्ये वर्तमाने अष्टाविंशतितमे कलियुगे तत्प्रथमे विभागे श्रीमन्नृपविक्रमार्कात् श्रीमन्नृपशालीवाहनाद्या यथा अमुकनाम्नि संवत्सरे अमुकर्तौ अमुकमासे अमुकपक्षे अमुकतिथौ अमुकवासरे अमुकनक्षत्रे अमुकयोगे अमुककरणे अमुकराशिस्थिते चन्द्रे अमुकराशिस्थिते सूर्ये अमुकराशिस्थिते देवगुरौशेषेषु ग्रहेषु यथायथास्थानस्थितेषु सत्सु एवं ग्रहगुणविशेषेणविशिष्टायां शुभपुण्यतिथौ अमुकशर्मण: मम इह जन्मनि जन्मान्तरे वा बाल्ययौवनवार्द्धक्य-अवस्थासु वाक्पाणिपादपायूपस्थघ्राणरसनाचक्षु: स्पर्शनश्रोत्रमनोभिश्चरित-ज्ञाताज्ञातकामाकाममहापातकोपपातकादिसञ्चितानां पापानां ब्रह्महनन सुरापानसुवर्णस्तेय गुरुतल्पगमन तत्संसर्गरूप महापातकानां बुद्धिपूर्वकाणां मनोवाक्कायकृतानां बहुकालाभ्यस्तानाम् उपपातकानां च स्पृष्टास्पृष्ट सङ्करीकरण-मलिनीअपात्रीकरण जातिभ्रंशकरण विहिताकरण कर्मलोपजनितानां रसविक्रय कन्याविक्रय हयविक्रय गोविक्रय खरोष्ट्रविक्रयदासीविक्रय-अजादिपशुविक्रयस्वगृहविक्रयनीलीविक्रयाक्रेयविक्रय-पण्यविक्रयजलचरादिजन्तु विक्रय स्थलचरादिविक्रयखेचरादिविक्रयसम्भूतानां निरर्थकवृक्षच्छेदन ऋणानपाकरणब्रह्मस्वापहरणदेव स्वापहरणराजस्वपहरणचर द्रव्यापरहण तैलादिद्रव्यापहरणफलादिहरण-लोहादिहरणलोहादिहरणनानावस्तुहरणरूपाणां ब्रह्मणनिन्दा-गुरूनिन्दावेदनिन्दाशास्त्रनिन्दापरनिन्दा-अभक्ष्यभक्षण अभोज्यभोजन अचोष्यचोषण अलेह्यलेहन अपेयपान अस्पृश्यस्पर्शन अश्राव्यश्रवण अहिंस्य हिंसन अवन्द्यवन्दन अचिन्त्यचिन्तन अयाज्ययाजन अपूज्य पूजनरूपाणां मातृपितृतिरस्कारस्त्रीपुरुषप्रीतिभेदन परस्त्रीगमनविधवागमनवेश्यागमनदासीगमन चाण्डालादिहीन जातिगमनगुदगमनरजस्वलागमनश्वादि गमन रूपाणां कूटसाक्षित्वपैशून्यवादन-मिथ्यापवाद-गुरूवञ्चन-स्वामिवञ्चन-असत्यभाषण-गर्भपातन पथिताम्बूलचर्वणहीनजातिनिषेवसपरान्नभोजन गणान्नभोजनलशुनपलाण्डुगृञ्जनभक्षण-तालवृक्षफलभक्षण-उच्छिष्टभक्षणरूपाणां पंक्तिभेदकरणभ्रूणहिंसापशुहिंसाबालहिंसादि अनेक हिंसोद्भूतानां शौचत्याग-स्नानत्याग-

सन्ध्यात्यागौपासनाग्नित्याग वैश्वदेवत्यागरूपाणांनिषिद्धाचरणकुग्रामवास-ब्रह्मद्रोह-गुरुद्रोह-मातृपितृद्रोह परद्रोहपरनिन्दा आत्मस्तुति-दुष्टप्रतिग्रहसंसर्गरूपाणां गोयान, वृषभयान, महिषीयान, गर्दभयानोष्ट्रयानाजयान-भृत्याभरणस्वग्रामत्याग-गोत्रत्याग-कुलत्याग-दूरस्थमन्त्रण-विप्राशाभेदन अवन्दिताशीर्वादग्रहण पतितसम्भाषण रूपाणां पतितजनपंक्तिभोजन-अहःसङ्गमवृथामनोरथादिपापानां तथा च प्रकीर्ण पातकानां एतत्कालपर्यन्तं सञ्चितानां लघुस्थूलसूक्ष्माणां च निःशेषपरिहारार्थं दशापूर्वान् दशापरान् आत्मना सहितान् एकविंशति पुरूषानुद्धर्तुं ब्रह्मलोकावधि पञ्चाशत्कोटियोजनविस्तीर्णे अस्मिन् भूमण्डले सप्तर्षिमण्डलपर्यन्तं बालुकाभिः कृतराशे वर्षसहस्रावसाने एकैकबालुकापकर्षणक्रमेण सर्वराश्यपकर्षसम्मितकालपर्यन्तं ब्रह्मलोके ब्रह्मसायुज्यताप्राप्त्यर्थं तथा च मम समस्तपितृणाम् आत्मनश्च विष्णवादि लोक प्राप्तये श्री परमेश्वर प्रीत्यर्थं देव ब्राह्मण सवितृसूर्यनारायण सन्निधौ अमुकतीर्थे गृहतीर्थे वा स्नानं करिष्ये॥

इति सङ्कल्प्य गायत्रीमन्त्रेण दूर्वामार्जनम् अपामार्गेण मार्जनं च कुर्यात्।

**अथ दशविधस्नानम्**

**( प्रतिद्रव्यं सजलवामहस्ते गृहीत्वा स्नायात् पश्चात् तीर्थ जलेन प्रोक्षयेत् )**

**( 1 ) भस्मस्नानम्** -

यथाग्निर्दहते भस्मतृणकाष्ठादिसञ्चयम्।

तथा मे दह्यतां पापं कुरु भस्म शुचे शुचिम्॥

**ॐ नमस्ते रुद्रमन्यवऽउतोतऽइषवे नमः। बाहुभ्यामुतते नमः॥**

**( 2 ) मृत्तिकास्नानम्** -

अश्वक्रान्ते रथक्रान्ते विष्णुक्रान्ते वसुन्धरे।

शिरसा धारयिष्यामि रक्षस्व मां पदे पदे॥

उद्धृतासि वराहेण कृष्णेन शतबाहुना।

मृत्तिके हर मे पापं यन्मया दुष्कृतं कृतम्॥

मृत्तिके ब्रह्मपूतासि काश्यपेनाभिवन्दिता।

मृत्तिके देहि मे पुष्टिं त्वयि सर्वं प्रतिष्ठितम्॥

**ॐ इदं विष्णुर्विचक्रमे त्रेधानिदधे पदम्। समूढमस्यपाꣳसुरे स्वाहा॥**

**( 3 ) गोमयस्नानम्** -

गोमये वसते लक्ष्मीः पवित्रा सर्वमगंला।

स्नानार्थं संस्कृता देवी पापं मे हरगोमय॥

अग्रमग्रचरन्तीनाम् औषधीनां वनेवने।

तासामृषभपत्नीनां पवित्रं कायशोधनम्॥

**ॐ मानस्तोकेतनयेमानऽआयुषिमानोगोषुमानोऽअश्वेपुरीरिषः। मानो वीरान्रुद्र भामिनो वधीर्हविष्मन्तः सदमित्वा हवामहे॥**

**( 4 ) पञ्चगव्यस्नानम् -**

गोमूत्रं गोमयं क्षीरं दधि सर्पिः कुशोदकम्।

सर्वपापविशुद्ध्यर्थं पंचगव्यं पुनातु माम्॥

**ॐ सहस्रशीर्षा पुरुषः सहस्राक्षः सहस्रपात्। स भूमिꣳसर्वतस्पृत्वात्यतिष्ठद्दशाङ्गुलम्॥**

**( 5 ) गोरजः स्नानम् -**

गवांखूरेणनिर्धूतं यद्रेणु गगने गतम्।

शिरसा तेन संलेपो महापातकनाशनम्॥

**ॐ आयङ्गौः पृश्निरक्रमीदसदन्मातरम्पुरः। पितरञ्च प्रयन्त्स्वः॥**

**( 6 ) धान्यस्नानम् -**

धान्यौषधी मनुष्याणां जीवनं परमं स्मृतम्।

तेन स्नानेन देवेश मम पापं व्यपोहतु॥

**ॐ धान्यमसिधिनुहिदेवान्प्राणायत्वो दानायत्वा व्यानायत्वा। दीर्घामनु प्रसितिमायुषे धान्देवोवः सविताहिरण्यपाणिः प्रतिगृभ्णात्वच्छिद्रेण पाणिना चक्षुषेत्वामहीनाम्पयोसि॥**

**( 7 ) फलस्नानम् -**

वनस्पतिरसो दिव्यः फलपुष्पवृतः सदा।

तेन स्नानेन मे देव फलं लब्धमनंतकम्॥

**ॐ याः फलिनीर्याऽअफलाऽअपुष्पायाश्च पुष्पिणीः। बृहस्पति प्रसूतास्ता नो मुञ्चन्त्वꣳ हसः॥**

**( 8 ) सर्वोषधीस्नानम् -**

औषध्यः सर्ववृक्षाणां तृणगुल्मलतास्तु याः।

दूर्वासर्षपसंयुक्ताः सर्वौषध्यः पुनन्तु माम्॥

**ॐ ओषधयः समवदन्त सोमेन सहराज्ञा। यस्मै कृणोति ब्राह्मणस्तꣳ राजन्पारयामसि॥**

**( 9 ) कुशोदकस्नानम् -**

कुशमूले स्थितो ब्रह्मा कुशमध्ये जनार्दनः।

कुशाग्रे शंकरोदेवस्तेन नश्यतु पातकम्॥

**ॐ देवस्यत्वा सवितुः प्रसवेश्विनोर्बाहुभ्यांम्पूष्णोहस्ताभ्याम्॥**

**( 10 ) हिरण्यस्नानम् -**

हिरण्यगर्भ गर्भस्थं हेमबीजं विभावसोः।

अनन्तपुण्यफलदमतः शान्तिं प्रयच्छ मे॥

**ॐ आ कृष्णेन रजसा व्वर्तमानो निवेशयन्नमृतम्मर्त्यञ्च। हिरण्ययेन सविता रथेना देवो याति भुवनानि पश्यन्॥**

ततोगङ्गोदकस्नानम्-

विष्णुपादाग्रसम्भूते गङ्गे त्रिपथगामिनि।

धर्मद्रवेति विख्याता पापं मे हर जाह्नवि॥

ततो शुद्धोदकेन स्नायात्॥ आचम्य प्राणानायम्य। अद्येत्यादि.... तिथौ प्रायश्चित्ताङ्गभूतं यथाकाले अष्टौ ब्राह्मणान् भोजयिष्ये।

**( 11 ) उत्तराङ्गप्रायश्चित्तहोमः -**

यजमानः स्थण्डिल समीपे उपविश्य आचम्य। अत्राद्य..... तिथौ प्रायश्चित्तस्य उत्तराङ्गतया विहितं महाव्याहृतिभिः आज्येन अष्टोत्तरशतमष्टाविंशतिर्वा होमं करिष्ये।

इति सङ्कल्प्य स्थण्डिले पञ्चभूसंस्कार पूर्वकं लौकिकाग्निं ब्राह्मणद्वारा संस्थाप्य ब्रह्मोपवेशनाद्याज्यभागान्तं कुर्यात्। तत्र आसादने विशेषः - सुवर्णादिपात्रपद्मपलाशादिपत्रं वा। यज्ञियकाष्ठम्। हरितानि सप्तकुशपत्राणि। पञ्चगव्यं च (गोमूत्रादि पृथक्-पृथक्) ततः अष्टोत्तरशतमष्टाविंशतिर्वा आज्याहुतीनां व्यस्तसमस्ताभिः व्याहृतिभिः होमः॥

ह्रीं अग्नये स्वाहा, इदमग्नये न मम।

ह्रीं वायवे स्वाहा, इदं वायवे न मम।

ह्रीं सूर्याय स्वाहा, इदं सूर्याय न मम।

ह्रीं अग्निवायुसूर्येभ्यो स्वाहा इदमग्निवायुसूर्येभ्यो न मम।

एवं सप्तवारं कृते अष्टाविंशतिराहुतयः, सप्तविंशतिवारं कृते अष्टोत्तरशताहुतयश्च भवन्ति।

ततः सुवर्णादिपात्रे तदभावे पलाशादिपत्रे वा सति सम्भवे भिन्नभिन्नाया एकस्याः वा गोः पञ्चगव्यम् एकीकृत्य मूलमन्त्रेण आलोड्य यज्ञियकाष्ठेन निर्मथ्य मूलेन अभिमन्त्र्य दशाहुतीः जुहुयात।

तद्यथा -

1. ॐ विष्णवे स्वाहा, इदं विष्णवे न मम।
2. पुनः ॐ विष्णवे स्वाहा, इदं विष्णवे न मम।
3. ॐ आदित्याय स्वाहा, इदं आदित्याय न मम।
4. ॐ ब्रह्मणे स्वाहा, इदं ब्रह्मणे न मम।
5. ॐ अग्नये स्वाहा, इदं अग्नये न मम।
6. ॐ सोमाय स्वाहा, इदं सोमाय न मम।

7. ॐ सवित्रे स्वाहा, इदं सवित्रे न मम।

8. ॐ परमात्मने स्वाहा, इदं परमात्मने नमम।

9. ॐ अग्निवायुसूर्येभ्यः स्वाहा, इदं अग्निवायुसूर्येभ्यो न मम।

10. ॐ अग्नये स्विष्टकृते स्वाहा, इदं अग्नयेस्विष्टकृते न मम।

**( 12 ) ततो नवाहुतयः -**

1. ॐ अग्नये स्वाहा, इदं अग्नये न मम।
2. ॐ वायवे स्वाहा, इदं वायवे न मम।
3. ॐ सूर्याय स्वाहा, इदं सूर्याय न मम।
4. ॐ अग्निवरुणाभ्यां स्वाहा, इदं अग्निवरुणाभ्यां न मम।
5. पुनः ॐ अग्निवरुणाभ्यां स्वाहा, इदं अग्निवरुणाभ्यां न मम।
6. अग्नये अयसे स्वाहा, इदं अग्नये अयसे न मम।
7. ॐ वरुणाय सवित्रे विष्णवेविश्वेभ्यो देवेभ्यो मरुद्भ्यः स्वर्केभ्यश्च स्वाहा, इदं वरुणाय सवित्रे विष्णवे विश्वेभ्यो देवेभ्यो मरुद्भ्यः स्वर्केभ्यश्च न मम।
8. ॐ वरुणादित्यायादितये स्वाहा, इदं वरुणादित्यादितये न मम।
9. (मनसा) ॐ प्रजापतये स्वाहा, इदं प्रजापतये न मम।

**( 13 ) व्याहृति होमः**

घृतेन अग्निवायुसूर्येभ्यः स्वाहा इति व्याहृतिभिः 54 आहुतीः दद्यात्। ततः संस्रव प्राशनादिप्रणीता विमोकान्तं कृत्वा ब्रह्मणे पूर्णपात्रादिकं समर्प्य।

हुतशेषस्य पञ्चगव्यस्य मूलमन्त्रेण प्राशनम्। अशक्तौ तु गोमूत्रादि स्वल्पं ग्राह्यम्।

**( 14 ) अथ उत्तराङ्गविष्णुश्राद्धः -**

'विष्णवे नमः' एतत्ते पादावनेजनं पाद प्रक्षालनम्। इदमत्र चन्दनं च पुष्पम्। (स्वपादौ करौ प्रक्षाल्य आचम्य) अक्षतैः दिग्बन्धनं कुर्यात्।

नमस्ते देवदेवेश पुराण पुरुषोत्तम।

इदं श्राद्धं हृषीकेश रक्षत्वं सर्वतो दिशि॥

पूर्वे नारायणः पातु वारिजास्तु दक्षिणे।

प्रद्युम्नः पश्चिमे पातु वासुदेव तथोत्तरे।

ऊर्ध्वं गोवर्धनो रक्षेदधस्ताच्च त्रिविक्रमः॥

वैष्णवश्राद्धोपहाराणां पवित्रता अस्तु। जलं गृहीत्वा-अत्राद्य....तिथौ उत्तराङ्गं विहितं वैष्णवश्राद्धमहं करिष्ये। विष्णवे नमः इदमासनम्। इदमत्र गन्धं, धूपं, दीपं, नैवेद्यं, यथादत्तं न मम। इदं ते ज्योतिः। वैष्णवश्राद्धस्यार्चन विधेः परिपूर्णाऽस्तु। आचम्य। विष्णु प्रीत्यर्थं त्रिभ्योऽधिकान् युग्मान् ब्राह्मणान् पूजापूर्वकं भोजयिष्ये वा भोजननिष्क्रय-द्रव्यम् आमात्रं दास्ये। सुप्रोक्षितादिकरणम्। दास्यमानां दक्षिणां विष्णुश्राद्ध निमित्तां विष्णवे न मम।

अद्येत्यादि....... तिथौ प्रायश्चित्तविधेः परिपूर्णता अस्तु॥

यजमानः - अहं निष्पापो भूयासम्?

विप्राः - त्वं निष्पापोभूयाः।

यजमानः - ममदेहशुद्धिरस्तु?

विप्राः - तवदेहशुद्धिरस्तु।

यजमानः - अहं एतत्कर्म योग्यो भूयासम्?

विप्राः - त्वं एतत्कर्म योग्योभूयाः।

**(15) अथमुखावलोकनम्-**

अद्येत्यादि... तिथौ कृतस्य प्रायश्चितकर्मणः साङ्गतासिद्ध्यर्थं मुखालोकनमहं करिष्ये। हस्ते मुखावलोकनार्थं घृतपूरितं कांस्यपात्रं गृहीत्वा-

दिव्यन्तरिक्षभूमौ वा यन्मे किल्बिषमागतम्।

तत्सर्वमाज्य संस्पर्शात् प्रणाशमुपगच्छतु॥

अलक्ष्मीर्यच्च दौर्भाग्यं मम गोत्रेऽप्यवस्थितम्।

तत्सर्वं शमत्वाज्यं लक्ष्मीं पुष्टिं ददातु मे॥

इदं कांस्यपात्रं सदक्षिणां छायादोष-निवृत्तये कस्मैचिद् ब्राह्मणाय अहं दास्ये। सूर्यावेक्षणम्। क्षमापनम् विसर्जनम्।

ॐ विष्णवे नमः। ॐ विष्णवे नमः। ॐ विष्णवे नमः।

**शब्दार्थाः**

**व्यपोहतु** दूरीकरोतु **मृतिका** मृत् **ब्रह्मपूता** ब्रह्मणा पवित्रा **पञ्चगव्यम्** गोमूत्रं-गोमयं-क्षीरं-दधि-घृतम् च **पुनातु** पवित्रीकरोतु।

**स्वाध्यायः**

**1. प्रदत्तविकल्पेभ्यः योग्यविकल्पं चित्वा उत्तरं यच्छत।**

(1) भस्मस्नानं केन मन्त्रेण भवति?

(क) अग्निरिति भस्म (ख) त्र्यायुषं (ग) मानस्तोके (घ) मानो महान्त

(2) का वराहेण उद्धृता ?

(क) मृत्तिका (ख) वसुन्धरा (ग) पृथ्वी (घ) एकमपि न

(3) कृष्णेन कया रीत्या उद्धृता ?

(क) शौर्येण (ख) शतबाहुना (ग) सुदर्शनेन (घ) शङ्खेन

(4) 'आयं गौः' इति मन्त्रेण किं स्नानं क्रियते ?

(क) धान्यम् (ख) गोरजम् (ग) गोमयम् (घ) भस्म

(5) कुशाः केन संभूताः ?

(क) विष्णुना (ख) वामनेन (ग) महावराहेण (घ) परशुरामेण

**2. सविस्तरमुत्तरं लिखत।**

(1) दशविधस्नानस्य महत्त्वं प्रतिपादयन्तु।

(2) धान्यास्नानस्य श्लोकं लिखत।

(3) फलस्नानस्य मंत्रं लिखत।

(4) सर्वौषधीस्नानस्य मंत्रं लिखत।

(5) गोमयस्नानस्य श्लोकं लिखत।

**3. मन्त्र-श्लोकपूर्तिं कुर्वन्तु।**

(1) अश्वक्रान्ते............ काश्यपेनाभिवन्दिता॥

(2) इदं विष्णुर्विचक्रमे ............॥

(3) गोमूत्रं ............ पुनातुमाम्॥

**शिक्षक-प्रवृत्तिः**

शिक्षकः छात्रेभ्यः दशविधस्नानस्य महत्त्वं ज्ञापयितव्यम्।

**छात्रप्रवृत्तिः**

छात्राः प्रत्येकस्य स्नानस्य शरीरे को लाभः इति अन्वेषयन्तु।

**सूक्तिः - 'शतं विहाय भोक्तव्यं सहस्रं स्नानमाचरेत्।**
**लक्षं विहाय दातव्यं कोटिं त्यक्त्वा हरिं भजेत्॥'**

●

# 25. सत्येशपूजनम्

**प्रस्तावना**

प्रत्येकेषु पूजनेषु वा यज्ञकार्येषु देहशुद्धिप्रायश्चितान्तर्गतसत्येशपूजनम् अवश्यं करणीयम्।

सत्येशपूजने सत्येशसहिताष्टशक्तीनां पूजनम् अर्चनं भवति। तेन सहस्त्र, लक्ष, कोटि, शतानि पापानि सत्येश सन्निधौ विलयन्ति। जन्मजन्मान्तरस्य पातकं सत्येशपूजनेन नश्यति। यानि कानि पापानि क्रियन्ते तानि सर्वाणि सत्येशपूजनेन विलयं यान्ति।

---

तत्रादौ श्वेतवस्त्रोपरि तंडुलैरष्टदलं कृत्वा तस्मिन् ईशानादिक्रमेण अष्टशक्तिनां स्थापनम्।

अष्टदलमध्येकर्णिकायां ताम्रमयं कलशं विश्वाधारासि0 इत्यादिना यथाविधि संस्थाप्य तदुपरि सुवर्णादिनिर्मितां कृताग्न्युत्तारणप्राणप्रतिष्ठां सत्येशमूर्तिं वा शालिग्रामं संस्थाप्य।

**जलमादाय** – अद्येत्यादि 0 तिथौ मम सर्वपातकनिवृत्त्यर्थं रुकिमण्यादिसहितसत्येशस्थापनप्रतिष्ठापूजनमहंकरिष्ये।

**वामहस्ते अक्षतान् गृहीत्वा** –

(ईशान्या) आवाहयामि देवेशीं रुक्मिणीं कृष्णवल्लभांम्।
गदापद्मसमायुक्तां तां समावाहयाम्यहम्॥
ॐ रुक्मिणयै नमः रुक्मिणीम् आवाहयामि स्थापयामि।

(पूर्वे) सत्यभामां महाभागां सर्वसिद्धिप्रदायिनीम्।
नर्कासुरवघोपेतां सत्यभामां ह्वयाम्हम्॥
ॐ सत्यभामायै नमः सत्यभामाम् आवाहयामि स्थापयामि।

(आग्नेयां) जाम्बुवतीं महाभागां शुभाङ्गीं जननीं शुभाम्।
कृष्णेन संस्थितां देवीं शश्वद्भक्त्या सदाम्बिकाम्॥
ॐ जाम्बुवत्यै नमः जाम्बुवतीम् आवाहयामि स्थापयामि।

(दक्षिणे) सत्यासत्ये समायुक्ते त्रैलोक्यजननीं पुरा।
धर्मार्थकामदां चैव सत्यामावाह्वयाम्यहम्॥
ॐ सत्यायै नमः सत्याम् आवाहयामि स्थापयामि।

(नैऋत्यां) सत्यां कृष्णेन संयुक्तां देवासुरविराजिताम्।
पुत्रदां धनदां चैव कालिन्दीं शुभदां सदा॥
ॐ कालिन्द्यै नमः कालिन्दीम् आवाहयामि स्थापयामि।

(पश्चिमे) भद्रासनेन संयुक्तां सर्वाभरणभूषिताम्।
मानवानां च देवानां महाभयविनाशिनीम्।

ॐ मित्रविन्दायै नमः मित्रविन्दाम् आवाहयामि स्थापयामि।

(वायव्याम्) विष्णोर्भगवतीं भार्यां सर्वविघ्नविनाशिनीम्।

हव्यं ददासि देवेभ्यः कव्यं पितृभ्य एव च॥

ॐ लक्ष्मणायै नमः लक्ष्मणाम् आवाहयामि स्थापयामि।

(उतरे) चारुहाससमायुक्ते चारुनेत्रसुशोभिते।

चारुकेशवति देवि ह्यागच्छ चारुहासिनि॥

ॐ चारुहासिन्यै नमः चारुहासिनीम् आवाहयामि स्थापयामि।

मध्यकलशोपरि - ऊर्व्यां क्षीरसमुद्रेऽस्मिन् शीतचन्द्रे सकर्णिके।

तत्र त्वं सत्यया सार्द्धं सत्यशे भव सन्निधौ॥

ॐ सत्येशाय नमः सत्येशं आवाहयामि स्थापयामि।

प्रतिष्ठा सर्वदेवानां मित्रावरुणनिर्मिता।

प्रतिष्ठान्ते करोम्यत्र मण्डलैर्देवतैस्सह॥ इति

ॐ अष्टशक्तिसहितसत्येश सुप्रतिष्ठितो वरदो भव।

ॐ अष्टशक्तिसहितसत्येशाय नमः इति मन्त्रेण यथासम्भवं पूजनं कुर्यात्।

**अष्टशक्तिसहितसत्येशषोडशोपचारपूजा**

**ध्यानम्** -

सत्यव्रतं सत्यपरं त्रिसत्यं सत्यस्ययोनिर्निहितं च सत्ये।

सत्यस्य सत्यामृतस्यनेत्रं सत्यात्मकं त्वां शरणं प्रपन्नाः॥

**आसनम्** - सोमसूर्याग्निसंकाशं पद्ममष्टदलान्वितम्।

संगृहाणासनं देव त्रैलोक्यस्थितिकारणम् ॥

**पाद्यम्** - रत्नाभरणसर्वाङ्ग सर्वदेव नमस्कृत।

पाद्यं गृहाण देवेश गन्धपुष्पाक्षतैर्युतम्॥

**अर्घ्यम्** - सत्येश सुखभूयिष्ठ सत्येश मुक्तिदायक।

सत्येश सत्यया युक्त गृहाणार्घ्यं नमोऽस्तुते॥

**आचमनम्** - गङ्गाजलं समानीतं सुवर्णकलशे स्थितम्।

गृहाणाचमनं देव त्रैलोक्यस्यापि पावनम्॥

**स्नानम्** - क्षीरसागरकल्लोलेः स्नाहि पापनिषूदन।

रक्ष मां भूतभव्येश दत्तेन जलबिन्दुना॥

**वस्त्रम्** - हरस्व सर्वदुरितं येन त्वं वेष्टितो हरे।
वस्त्रेणानेनशुभ्रेण सत्येश कुरु वाञ्छितम्॥

**यज्ञोपवीतम्** - यज्ञोपवीतं परमं पवित्रं पापनाशनम्।
यज्ञोपवीत दानेन कुरु मां सर्वपावनम्॥

**गन्धः** - सुगन्धि चन्दनं दिव्यं केशरागरूसंयुतम्।
विलेपनं सुरश्रेष्ठ गृहाण परमेश्वर॥

**पुष्पाणि** - सत्येशाय नमस्तुभ्यं मूर्त्तामूर्त्तस्वरूपिणे।
वासुदेवेश गृहयन्तां पुष्पाणि पूजनाय च॥

**धूप** - शक्तिवृंदयतो देव पूजां धूपमनोहरम्।
गृहाण सत्यया सार्धं रक्ष मां परमेश्वर॥

**दीपः** - ज्योतिरूपमरूपं त्वां वदन्ति मुनिपुङ्गवाः।
ज्योतिर्मध्येस्थितं दीपं गृहाण त्वं नमोस्तुते॥

**नैवेद्यम्** - त्राता त्वमेव सत्येश सत्यया सह चिन्त्यते।
गृहाण देवदेवेश मम नैवेद्यमुतमम्॥

**ताम्बूलम्** - पूगीफलं सकर्पूरं ताम्बूलं सुमनोहरम्।
पवित्रीकरणं नित्यं सत्येश प्रतिगृह्यताम्॥

**प्रदक्षिणा** - नमस्ते देवदेवेश पुराणपुरूषोत्तम।
पापोपशमनार्थाय गृहाण त्वं प्रदक्षिणाम्॥

**पुष्पाञ्जलिं** - नारायण नमस्तेऽस्तु वासुदेव नमो नमः।
त्रैलोक्यजगदाधार त्राहि मां मधुसूदन॥

**जलमादाय** - अनया पूजया अष्टशक्तिसहितसत्येशः प्रीयताम्। ततः शक्तिश्चेत् गोभूमितिलसहिरण्याज्य वस्त्रधान्यगुऽरौप्यलवणादीनि दशदानानि दधात्॥

पूर्वाङ्गविष्णुश्राद्धम् शालिग्रामे चटे वा विष्णुश्राद्धं कुर्यात्।

श्री विष्णो एतत्ते पाद्यं पादावनेजनं पादप्रक्षालनम्। एष ते अर्घः। इदमत्र चन्दनपुष्पम्। स्वपादौ करौ प्रक्षाल्य आचम्य विष्णुमन्त्रेण दिग्बन्धः।

अक्षतान्गृहीत्वा नमस्ते देवदेवेश पुराण पुरूषोत्तम।

इदं श्राद्धं हृषीकेश रक्ष त्वं सर्वतो दिशि॥

पूर्वे नारायणः पातु वारिजाक्षस्तुदक्षिणे।

प्रद्युम्नः पश्चिमे पातु वासुदेवस्तथोत्तरे॥

उर्ध्वं गोवर्धनो रक्षेदस्ताच्च त्रिविक्रमः॥

वैष्णवश्रद्धोपहाराणां पवित्रता अस्तु।

जलं गृहीत्वा अत्राद्य.... तिथौ प्रायश्चित्तपूर्वाङ्गतयाविहितं वैष्णव श्राद्धमहं करिष्ये।

विष्णवे नम इदमासनम्। इदमत्र गन्धं, धूपं, दीपं, नैवेद्यं यथादत्तं न मम। इदं ते ज्योतिः॥

वैष्णवश्राद्धस्यार्चनविधेः परिपूर्णताऽस्तु॥आचम्य॥ विष्णुप्रीत्यर्थं त्रिभ्य अधिकान् युग्मान् ब्राह्मणान् पूजापूर्वकं भोजयिष्ये वा भोजननिष्क्रयद्रव्यं दास्ये। सुप्रोक्षितादिकरणम्। वैष्णवश्राद्धस्य साङ्गतासिद्ध्यर्थं यथाशक्ति दक्षिणां विष्णवे न मम॥ अद्य पूर्वोच्चारितशुभपुण्यतिथौ वैष्णवश्राद्धस्य परिपूर्णता अस्तु॥

## पूर्वाङ्गप्रायश्चित्तहोमः

यजमानः स्थण्डिलसमीपे उपविश्य आचम्य। अत्राद्य.... तिथौ प्रायश्चित्तस्य पूर्वाङ्गतया विहितं महाव्याहृतिभिः आज्येन अष्टोत्तरशतमष्टाविंशतिर्वा होमं करिष्ये। इति सङ्कल्प।

स्थण्डिले पञ्चभूसंस्कारपूर्वकं लौकिकाग्निब्राह्मणद्वारा संस्थाप्य ब्रह्मोपवेशनादाज्यभागान्तं कुर्यात्। तत्र आसादने विशेषः। सुवर्णादि पात्रं पद्म पलाशादि यन्त्रं वा। यज्ञीयकाष्ठम्। हरितानि सप्तकुशपत्राणि। पञ्चगव्यं च (गोमूत्रादि पृथक् पृथक्) ततः अष्टोत्तरशतमष्टाविंशतिर्वा आज्याहुतीनां व्यस्तसमस्ताभिः व्याहृतिभिः होमः॥

ह्रीं अग्नये स्वाहा, इदमग्नये न मम।

ह्रीं वायवे स्वाहा, इदं वायवे न मम।

ह्रीं सूर्याय स्वाहा, इदं सूर्याय न मम।

ह्रीं अग्निवायुसूर्येभ्यो स्वाहा इदमग्निवायुसूर्येभ्यो न मम। एवं सप्तवारं कृते अष्टोत्तरशताहुतयश्च भवन्ति॥

ततः सुवर्णादिपात्रे तदभावे पलाशादिपत्रे वा सति सम्भवे भिन्नभिन्नाया एकस्याः वा गोः पञ्चगव्यमेकीकृत्य मूलमन्त्रेण आलोड्य यज्ञियकाष्ठेन निर्मथ्य मूलेन अभिमन्त्र्य दशाहुतीः जुहुयात्।

तद्यथा -

ॐ विष्णवे स्वाहा, इदं विष्णवे न मम॥ 1॥

ॐ विष्णवे स्वाहा, इदं विष्णवे न मम॥ 2॥

ॐ आदित्याय स्वाहा, इदं आदित्याय न मम॥ 3॥

ॐ ब्रह्मणे स्वाहा, इदं ब्रह्मणे न मम॥ 4॥

ॐ अग्नये स्वाहा, इदं अग्नये न मम॥ 5॥

ॐ सोमाय स्वाहा, इदं सोमाय न मम॥ 6॥

ॐ सवित्रे स्वाहा, इदं सवित्रे न मम॥ 7॥

ॐ परमात्मने स्वाहा, इदं परमात्मने न मम॥ 8॥

ॐ अग्निवायुसूर्येभ्यः स्वाहा, इदं अग्निवायुसूर्येभ्यो न मम॥ 9॥

ॐ अग्नये स्विष्टकृते स्वाहा, इदमग्नयेस्विष्टकृते न मम॥ 10॥

**ततो नवाहुतयः**

ॐ अग्नये स्वाहा, इदं अग्नये न मम ॥ 1 ॥

ॐ वायवे स्वाहा, इदं वायवे न मम ॥ 2 ॥

ॐ सूर्याय स्वाहा, इदं सूर्याय न मम ॥ 3 ॥

ॐ अग्निवरुणाभ्यां स्वाहा, इदमग्निवरुणाभ्यां न मम ॥ 4 ॥

ॐ अग्निवरुणाभ्यां स्वाहा, इदं अग्निवरुणाभ्यां न मम ॥ 5 ॥

अग्नये अयसे स्वाहा, इदं अग्नये अयसे न मम ॥ 6 ॥

ॐ वरुणाय सवित्रे विष्णवे विश्वेभ्यो देवेभ्यो मरुद्भ्यः स्वर्केभ्यश्च स्वाहा, इदं वरुणाय सवित्रे विष्णवे विश्वेभ्यो देवेभ्यो मरुद्भ्यः स्वर्केभ्यश्च न मम ॥ 7 ॥

ॐ वरुणादित्यायादितये स्वाहा, इदं वरुणादित्यायादितये न मम ॥ 8 ॥

(मनसा) ॐ प्रजापतये स्वाहा, इदं प्रजापतये न मम ॥ 9 ॥

ततः संस्रव प्राशनादिप्रणीताविमोकान्तं कृत्वा ब्रह्मणे पूर्णपात्रादिकं समर्प्य, हुतशेषस्य पञ्चगव्यस्य मूलमन्त्रेण प्राशनम् ॥

**गोब्राह्मण प्रार्थना** – तत्रादौ प्रायश्चित्तीं गां वा सनारिकेलं गोमिथुनं द्रव्यं गृहीत्वा उत्थाय सत्येशस्य प्रदक्षिणां कृत्वा यजमानः प्रार्थयेत् –

अपराधसहस्त्राणि लक्षकोटिशतानि च।

नश्यन्ति तत्क्षणात्पापं सत्येश तव सन्निधौ ॥ 1 ॥

अनेकजन्मसम्भूतं पातकं यन्मयाऽर्जितम्

सर्वं नाशयेत् पापं सत्येशतवसान्निधौ ॥ 2 ॥

पापोऽहं पापकर्माहं पापात्मा पापसम्भवः।

त्राहि मां पुण्डरीकाक्ष सर्वपापहरो हरिः ॥ 3 ॥

यानि कानि च पापानि ब्रह्महत्यासमानि च।

तानि सर्वाणि नश्यन्ति प्रदक्षिणपदे पदे ॥ 4 ॥

**ब्राह्मणप्रार्थना** – आब्रह्मस्तम्बपर्यन्तं भवद्वशमिदं जगत्।

यक्षरक्षपिशाचादि सदेवासुरमानुषम् ॥ 1 ॥

सर्वधर्मविवेक्तारो गोप्तारः सकलाद्विजाः।

मम देहस्य संशुद्धिं कुर्वन्तु द्विजसत्तमाः ॥ 2 ॥

पूज्यैः कृतपवित्रोऽहं भविष्याम्यनघस्तथा।

प्रसाद:क्रियतां मह्यं शुभानुज्ञां प्रयच्छथ ॥ 3 ॥

पुराकृतं मया घोरं ज्ञाताज्ञातं च किल्बिषम्।

जन्मतोऽद्यदिनं यावत्तस्मात्पापात्पुनातु माम् ॥ 4 ॥

इति द्विजाग्रे नारिकेलं समर्प्य तत उपकल्पितं

गोमिथुनद्रव्यं सर्वेभ्यो दत्वा प्रणमेत् ॥

**गोप्रार्थना -**

गावो ममाग्रतः सन्तु गावो मे सन्तु पृष्ठतः।

गावो मे हृदये सन्तु गवां मध्ये वसाम्यहम् ॥ 1 ॥

पञ्चगावः समुत्पन्ना मथ्यमाने महोदधौ।

तासां मध्ये तु या नन्दा तस्यै धेन्वै नमो नमः ॥ 2 ॥

अदितिर्देवमाता च वेदमाता च धीश्वरी।

धेनुरूपेण सा देवी मम पापं व्यपोहतु ॥ 3 ॥

**शब्दार्थाः**

**सत्येशः** सत्यस्य ईशः **प्रायश्चित्तम्** कृतदोषपापयोर्निवारणोपायः **अष्टशक्तयः** रुक्मिण्यादयः देव्यः **पातकम्** पापम् **वल्लभाम्** प्रियाम् **पुत्रदा** पुत्रदात्री ॥

**स्वाध्यायः**

**1. प्रदत्तविकल्पेभ्यः योग्यविकल्पं चित्वा उत्तरं यच्छत।**

(1) सत्येशपूजने कति शक्तीनां पूजनं भवति?

(क) सप्त (ख) पञ्च (ग) अष्ट (घ) नव

(2) 'सत्यभामां महाभागाम्...' इत्यनेन श्लोकेन कस्याः देव्याः आवाहनम्?

(क) रुक्मिण्याः (ख) जाम्बंवत्याः (ग) भ्रदासनायाः (घ) सत्यभामायाः

(3) स्नानविधेः श्लोकं दर्शयत

(क) क्षीरसागरकल्लोकैः (ख) रत्नभरण सर्वाङ्ग

(ग) गङ्गाजल समानीतम् (घ) हरस्व सर्वदुरितम्

(4) 'ज्योतीरूपमरूपं त्वाम्...' इति कस्य विधेः श्लोकः?

(क) गन्धस्य (ख) दीपस्य (ग) अर्घ्यस्य (घ) धूपस्य

**2. अधोलिखितानां प्रश्नानाम् उत्तरं यच्छत।**

(1) पाद्यस्य श्लोकं लिखत।

(2) यज्ञोपवीतविधेः कः श्लोकः प्रदर्शितः ?

(3) होमविधेः निरूपणं कुरुत।

(4) यजमान प्रार्थनायाः श्लोकं सार्थं लिखत।

(5) गो प्रार्थनायाः श्लोकद्वयं वर्णयत।

**3. मन्त्राणां पूर्तिं कुरुत।**

(1) सत्यवृतं... शरणं प्रपन्नाः।

(2) नमस्ते देव.... त्वं प्रदक्षिणाम्॥

(3) नारायण नमस्तेऽस्तुं.... मां मधुसूदन॥

(4) पापोऽहं पापकर्माहं.... सर्वपापहरो हरिः॥

(5) अदिर्तिदेवमाता.... पापं व्यपोहतु॥

**शिक्षक-प्रवृत्तिः**

शिक्षकः छात्रेभ्यः सत्येशपूजनस्य प्रायोगिकं ज्ञानं दद्यात्।

**छात्रप्रवृत्तिः**

छात्राः मन्त्राणां कण्ठस्थीकरणं कुर्युः।

**सूक्तिः - सत्यं ज्ञानमनन्तं ब्रह्म।**

●